१५२

(महाभारत)

भगवद्गीता अष्टादश
टीकासहिता एका
दशाध्यायः

२७२१

एकादशोध्याय

शांकरभाष्य
आनंदगिरिविकृतटी.
श्रीधरी स्वामिकृता
पिशाचभाष्य
रामानुजभाष्य
अभिनवगुप्ती
परमार्थप्रपा
वनमाली
ऋषभवैजयन्ती
मधुसूदनी
सदानंदी
नीलकंठी
आनंदी
रामकंठी
लासिकी
पंचोली ॥

भाषा अनुवाद ॥

अर्जुन उवाच मदनुग्रहाय परमं गुह्यम
ध्यात्मसंज्ञितं यत्त्वयोक्तं वचस्तेन मोहो
यं विगतो मम १

शाङ्करभाष्यं १

भगवतो विभूतय उक्तास्तत्र च विष्टभ्याहमिदं कृत्स्नमेकां
शेन स्थितो जगदिति भगवताभिहितं श्रुत्वा यज्जगदात्मरू
पमाद्यमैश्वरं तत् साक्षात् कर्तुमिच्छन्नर्जुन उवाच मदनुग्रहा
र्थं परमं निरतिशयं गुह्यं गोप्यं अध्यात्मसंज्ञितमात्मानात्मविवेक
विषये निरतिशयं यत्त्वयोक्तं वचोवाक्यं तेन वचसा मोहोयं वि
गतो ममाविवेकबुद्धिरपगतेत्यर्थः १

आनन्दगिरिकृतटीका २

तेन तेनात्मना भगवदनुसन्धानार्थमुक्ता विभूतीरनुवदति भ
गवत इति परस्य सोपाधिकं निरुपाधिकञ्च चिद्रूपं ध्येयत्वेन
ज्ञेयत्वेन चोक्तमित्यर्थः सोपाधिकमैश्वरं रूपमशेषजगदात्मकं
विश्वरूपाख्यमधिकृत्याध्यायान्तरमवतारयन्ननन्तरश्लोकोपयो
गित्वेन वृत्तं कीर्तयति तत्र चेति यदेतदशेषप्रपञ्चात्मकमखिल
स्यैतस्य जगतः कारणं सर्वज्ञं सर्वैश्वर्यवद्रूपमुक्तं तदिदं श्रु
त्वा तस्य साक्षात्कारं पिपादयिषुराद्यं श्लोकमाह श्रुत्वेति म
यि करुणां निमित्तीकृत्योपकारं ग्रहस्तदर्थमिति वचसो विशे
षणं निरतिशयत्वं परमपुरुषार्थसाधनत्वं श्लोकव्याख्यानप्रसादितं
दार्थप्रधानवाक्यं मोहस्यापगमित्यात्मसात्तिकत्वं दर्शयति १

स्वामिकृतटीका ३

विभूतिवैभवं प्रोक्तं कृपया परया हरिः दिदृक्षोरर्जुनस्याथ विश्वरूप
मदर्शयत् पूर्वाध्यायान्ते विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जग
दिति विश्वात्मकं पारमेश्वररूपमुपलिप्सितुर्दिदृक्षुः पूर्वोक्तमभि
नन्दति मदनुग्रहायेति चतुर्भिः ममानुग्रहाय शोक
निवृत्तये परमं परमार्थनिष्ठं गुह्यं गोप्यमपि अध्यात्म संज्ञितं

आत्मानात्मविवेकविषयं यत्त्वयोक्तं वचः अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे इत्यादि षष्ठाध्यायपर्यंतं यदुक्तं तेन ममायं मोहोहं हंता मतेहं हत इत्यादिलक्षणो भ्रमो विगतो विनष्टः आत्मनः कर्तृत्वाद्यभावोक्तेः १

पैशाचभाष्यम् ५

एवं भगवन्मुखोक्तं ते पवित्रतामधिगतं [illegible] विभूतिं श्रुत्वा परस्वरूपं द्रष्टुकामोर्जुन उवाच मदनुग्रहायेति अध्यात्मसंज्ञितमध्यात्मप्रतिपादकं वचनमुपचारेणाध्यात्मसंज्ञितमित्युच्यते १

रामानुजभाष्यं ५

एवं भक्तियोगनिष्पत्तये तद्विवृद्धये च सकलेतरविलक्षणेन स्वाभाविकेन भगवदसाधारणेन कल्याणगुणगणेन सह भगवतः सर्वात्मत्वं तत एव तद्व्यतिरिक्तस्य कृत्स्नस्य चिदचिदात्मकस्य वस्तुजातस्य तच्छरीरतया तदायत्तस्वरूपस्थितिप्रवृत्तित्वं चोक्तं तदेव भगवदसाधारणस्वभावं कृत्स्नस्य तदायत्तस्वरूपस्थितिप्रवृत्तितां च भगवत्सकाशादुपश्रुत्य एवमेवेति च निश्चित्य तथाभूतं भगवंतं साक्षात्कर्तुकामोर्जुन उवाच तथैव भगवत्प्रसादादनंतरं द्रक्ष्यति सर्वाश्चर्यमयं देवमनंतं विश्वतोमुखं तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधेति मदनुग्रहायेति देहात्माभिमानरूपमोहेन मोहितस्य मम मदनुग्रहैकप्रयोजनाय परमं गुह्यं परमरहस्यमध्यात्मसंज्ञितमात्मनि वक्तव्यं वचः न त्वेवाहं जातु नासमित्यादि तस्माद्योगी भवार्जुनेत्येतदंतं यत्त्वयोक्तं तेनायं ममात्मविषयो विमोहः सर्वो विगतः दूरतो निरस्तः १

अभिनवगुप्तकृतटी० ६

समनंतरेणाध्यायेन यदेवार्थजातमुक्तं तदेव प्रकटीकर्तुमर्जुनः पृच्छति स एव चायमनुग्रहः यो गुरूपदेशक्रमेणार्थोवगतः स एव प्रमत्तसंविदापाकलम्यमानः स्फुटीभवतीति तदर्थमेवमेवमुक्तिप्रत्युक्तिरुच्यते ॥ १ पश्य मे पार्थ रूपाणि इत्यादि त्वमक्षरं परमं वेदितव्यमित्यंतम् ॥ १ ॥

परमार्थप्रपाटीका ७

पूर्वाध्यायांते विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदित्युक्ते तद्वितादृग्रूपं कीदृग्विध्यतो निर्दिष्टमपेत मत्तोर्जुनः प्रार्थयन्नुच्यते स

दनुग्रहायेति चतुर्भिः मदनुग्रहाय शोकनिवृत्तये परमं रहस्यं गुह्यं
गोप्यमध्यात्मसंज्ञितं आत्मानात्मविवेकरूपं देही नित्यमवध्योयमि
ति तथाश्वत्थके वक्तिमापन्नमिति तथा मया ततमिदं विश्वमिति तथा
समोहं सर्वभूतेष्वित्यादि यद्वच उक्तं तेन मे मोहो विगतः निःशेषो
गतः १

वनमालीटीका ३

पूर्वाध्याये नानाविभूतीरुक्त्वा विष्टभ्याहमिदं कृत्स्नमित्यादिना
सर्वव्यापकमैश्वरं रूपमुक्तं श्रुत्वा परमोत्कण्ठितस्तत्साक्षात्कर्तुका
मोर्जुनः पृच्छति मदिति पूर्वषट्के मामनुग्रहीतुमात्मज्ञानं तदुपा
यकर्म समाधियोगप्रतिपादकं परमं गोप्यमात्मपरमात्मविषयत्वा
दध्यात्मसंज्ञितं यद्वचस्त्वयोक्तं तेन वाच्यवादिविषयो मोहोपि नष्टः १

वैजयन्तीटीका ४

एकादशे विश्वरूपमर्जुनायेत्थं यद्धरिः तेन स्वतः पुनः सौम्यस्वरूपो
भूदितीर्यते [margin: हृ] दशमेध्याये मामात्मा गुडाकेश सर्वभूताशयस्थितः वि
ष्टभ्याहमिदं कृत्स्नमित्युपक्रमोपसंहाररूपाभ्यां चेतनाचेतनात्मकस्य
सर्वस्य जगतो भगवत्स्वरूपत्वं भगवन्मुखाच्छ्रुत्वा तमेव विश्वात्मकं
भगवत्स्वरूपं द्रष्टुकामोर्जुनः स्वसारथिं भगवन्तं पृच्छति चतुर्भिः
मदनुग्रहायेति मदनुग्रहाय मम शोकमोहाद्यज्ञाननिवृत्तये परमं प
रमार्थरूपं गुह्यं सर्वविदितरदेवाद्यगोचरं अध्यात्मसंज्ञितं देहात्मविष [margin: या]
यकं अशोच्यानन्वशोचस्त्वमित्यादिविषयाध्यायान्तकं यद्वचः यद्वाक्यं त्व
या सर्वेश्वरेण सर्वज्ञेन मन्मित्रेण लोकपूर्वकं कथितं तेन वचसा मम त
त्प्रसादलब्धात्मज्ञानस्यायं बुद्धिस्थितो मोहो देहादावात्मेत्याकारक
सर्व आत्मविषयो भ्रमो विगतो विशेषेण दूरतो निरस्तः १

मधुसूदनीटीका ५

पूर्वाध्याये नानाविभूतीरुक्त्वा विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् इति विश्वात्मकं परमेश्वररूपं भगवताभिहितं श्रुत्वा परमोत्कण्ठितस्तत्साक्षात्कर्तुमिच्छन् पूर्वोक्तमभिनन्दन् [margin: अर्जुन उवाच] मदनुग्रहाय शोकनिवृत्त्युपकाराय परमं निरतिशयपुरुषार्थप्रकाशकं गुह्यं गोप्यं यस्मै कस्मैचिद्वक्तुमनर्हमपि अध्यात्मसंज्ञितमध्यात्ममितिशब्दितमात्मानात्मविवेकविषयम् अशोच्यानन्वशोचस्त्वमित्यादि षष्ठाध्यायपर्यन्तं त्वंपदार्थप्रधानं यत्त्वया परमकारुणिकेन सर्वज्ञे

नोक्तं वचो वाक्यं तेन वाक्येनाहं मे योऽहं नाममयो देहस्त्वं ते इत्यादि विविध
विपर्यासलक्षणो मोहोऽयमनुभवसाक्षिको विगतो विनष्टः ममतत्र
सकृदात्मनः सर्वविक्रियाशून्यत्वेनोक्तेः १

मधुसूदनी टीका १ ११

सदा लक्ष्म्यावासे सकलमुनिवर्यैः स्तवनिधौ महाभाग्यैर्ध्येये विदलितसम
करे देसमतिदेविपीशायास्वाधीकुशयवशविन्देरतिपदे मनो भ्रमो
मे श्रीहरिपदसरोजे प्रविशतु । पूर्वाध्याये विभूतीः स्वाः प्रोच्याते ऽपो
क्त्वा तिति विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् २ इति विश्वा
त्मकं रूपं स्फुटं भगवतेरितं तस्माल्लोककर्तृकामः सन्सर्वोत्तममभि
नंदति ३ अर्जुनो भगवद्भक्तिविशुद्धान्तर्मनायतः समशोकनिवृत्त
थे वाक्यं गोपितं यदीरितं ४ यदुत्कृष्टफलेनासौ तत्पर्यवसायि सर्वथा
आत्मानात्मविवेकैकविषयं संशयापहं ५ तेन मोहो विनष्टो मे दे
हाद्यध्यासलक्षणः अशेषाव्यानन्दरूपो वस्तुस्मारभ्यविवेचनं ६ ब
हूध्यायातमेवोक्तं तत्पदार्थसमुच्चतः तेनाहं तन्नाहं ममेतिहं ममेति
ममेति च ७ मोहो नष्टो क्रियं ज्ञात्वात्मानमजरामरं तथैव स
मनाध्यायादारभ्य दशमांततः ८ तत्पदार्थो विनिर्णीतः श्रीहरे
वैचसाक्षितः कृत्स्नपादारविंदेयुस्मानमेषप्रदायते ९ मायाहरम
यानीर्णीतेन स्थितेन निश्चिते १ [illegible]
[illegible]
[illegible]
[illegible]
[illegible] १

नीलकंठी टीका १२

पूर्वस्मिन्नध्याये योगो विभूतिश्च व्याख्यातो यत्वेन प्रतिज्ञातौ यतो विभू
तियोगं च मम यो वेत्तीति आत्मनो योगं विभूतिं च जनार्दन भूयः
कथयेति तेन रणे च प्रार्थितेन तस्य प्रार्थितो तत्र अहमात्मा गुडाकेश स
र्वभूताशयस्थित इति संक्षेपेण योगो भगवतः सर्वभूताधारत्वल
क्षणोऽयं प्रागिव विभूतिकथनात् तदंते च विष्टभ्याहमिदं कृत्स्नमे
कांशेन स्थितो जगदिति कुसूलेन धान्यमिव मयेदं जगद्विष्टभ्य स्थि
तमित्यापवसारितत्त्वदेव भगवतः सर्वभूताधारत्वं साक्षात्कर्तुं
॥ ॥ ॥

कामोऽर्जुन उवाच मदनुग्रहायेति मयि अनुग्रहोऽनुकंपा तदर्थं मदनु-
ग्रहाय परमेस्मयः शोकमोहनिवर्त्तकत्वेन उत्कृष्टं गुह्यं गोप्यं अध्या-
त्मसंज्ञितं आत्मानात्मविवेकार्थं शास्त्रं अध्यात्मतत्संज्ञितं यत्त्वयाव-
चः अशोच्यानन्वशोचस्त्वमित्यादिना षष्ठाध्यायपर्यंतेन पदार्थशुद्धिप्र-
धानेनायेहेतिनहमतस्मात्मनोऽकर्त्तृत्वाभोक्तृत्वप्रतिपादकेन
न मममोहः अविवेकोऽयं विशेषेण गतो नष्टः अतः अथमेपादेऽगत
ताधिकमार्थं ॥ १॥

[illegible]आनंदीटीका

एवं च तत्तदंशास्येश्वरस्य प्रकृतिपुरुषाधिष्ठापिष्ठानेन विश्वात्मतां विविदि-
षयागतिनस्यकालस्तद्रूपस्य परीसार्थमर्जुन उवाच अध्यात्मसंज्ञितं पर-
मात्मविषयं तत्तं यम् मोहोऽयमनात्मन्यात्मबुद्धिः १

१म

[illegible]नकंठीटीका

अथाध्यायदशकेन भगवदुपदिष्टज्ञानविज्ञानशब्दं मम सत्ताभिधेयवस्तुअ-
वगमाद्यादेव भगवतः परमेश्वरत्वावगमात्तस्य परमकारुणत्वेन उक्तेव-
चस्थितयोक्तफलाविसंवादकतया प्रकृष्टोपायत्वं निश्चित्य ससंदेहमात्मान-
मावेदयंश्च कृतिमात्रप्रतिपत्तत्साक्षात्कारदर्शनेच्छं प्रकटीकरिणोऽर्जुन उवाच मदनु-
ग्रहाय मामनुगृहीतुं निजयापरयाकृपया प्रवोधयितुं त्वया परमेश्वरेण स्वयं
प्रतिपादितस्वभावेनैतद्वचनमध्यायदशकात्मकं वाक्यमध्यात्मसंज्ञितमा-
त्मविषयत्वात्मनयमतपवपरमंगुह्यं तिप्रकृष्टं रहस्यमुक्तमुपदिष्टं तेनहेतु-
भूतेनायंसर्वजनकोऽशकौराग्यस्थितो मोहः इति प्रतिपादितपरमार्थप्रति-
पत्यान्यथाप्रतीतिलक्षणामज्ञानेमम विदिहतोऽपगतः १

[illegible]तिको [illegible]मीटीका

एवं दशमेनाध्यायेन भगवन्मावाद्वैश्वरयोगप्रवेशमोपानभूताविभूतीः
सम्यकश्रुत्वा अधुनाविश्वरूपात्मनो योगं विभूतिं चेत्यादिनासृष्टमपि भ-
गवतैकादशाध्यायेऽभिविक्रमिषयानुवादितं महाभागिरूपमैश्वरं योगमसौ का-
क्षितं पूर्वोक्तमभिनंदन्नर्जुन उवाच मदनुग्रहायमामनुगृहीतुं परमं गुह्यं प्रकृ-
ष्टं रहस्यमध्यात्मसंज्ञितम् आत्मनपेश्वरस्वरूपस्यवलक्षणतयानित्यत्वं गम्यापि
सतः सर्गादिहंभावाधिकृतिलाभावमैश्वर्यापरपर्यायमहमिदमीत्यवेल

२

गीं
टीं
प
3

लणेवा अहमादिर्हि देवानामहं सर्वस्य प्रभवस्त्मादियद्वचस्त्वयामर्व ज्ञोनोपदिष्टम् तेनैतत्तमेतेनायंजगद्दैविज्ञविषयोमोहस्तन्वाप्रतिपत्तिः किंकारणकमेतद्वैविश्वमित्येवंरूपोविगतेनष्टः ॥ १ ॥

पंचोलीटीका

विभूतिवैभवंश्रोत्वा अध्यायांते विष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितो जगत् इतिभगवतायज्जगदात्मरूपसाध्यमैश्वरंरूपमभिहितंतत्साक्षात्चिकीर्षुः पूर्वोक्तमभिनंदन् अर्जुनउवाच मदनुग्रहायेति हे कृष्ण त्वयामदनुग्रहायममानुग्रहार्थंयत्परमंनिरतिशयंगुह्यमध्यात्मसंज्ञितंज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः संपन्नंविश्वस्वरूपविषयमात्मानात्मविवेकविषयंवचः वाक्यंउक्तंतेनममअयंमोहः अविवेकः विगतः अपगतः ॥ १

गीतार्थसंबोधिनी

भगवद्भक्तियुक्तस्यरणवीरमहीभुजः आकल्पमस्तुतद्विश्वरूपदर्शनतःस्थितिः । अस्यामुक्तलक्षणांविभूतिमद्भगवद्वाक्यश्रवणात् स्वविषयोस्वधर्मानुकूलकृतार्थतांनिश्चित्येदानींप्रत्यक्षतएश्वरंरूपंदिदृक्षुरर्जुनःप्रार्थनापूर्वकमपृष्टोऽपिभगवंतंप्रत्याह मदनुग्रहायेति मदनुग्रहाय मय्यनुग्रहो मदनुग्रहस्तस्मै निमित्तभूताय शोकार्तस्यानुग्रहंकर्तुमध्यात्मसंज्ञितमात्मानात्मविवेकमधिकृत्यसंज्ञितं चेश्वराज्ञापितं संज्ञास्याप्येततनात्मानं देहमधिकृत्य संज्ञितं नायत्परमंपरात्परंगुह्यंगोप्यंनान्येनेतिपरमंगुह्यंस्वेतिवादनानुक्तं अतएवगुह्यंरहस्यंवचस्त्वयोक्तंमयुनाभवतैववचसा कथंभीष्मादीन् त्वे अन्यानुकूलवचनाः प्रतिकूलव्यापारेयमेवमोहोविगतोमम विमूढस्यापिमेविगतः ममशोकोऽधुनैवसंजाताध्यात्मविवेकोऽहमस्मीतिभावः ॥ १ ॥

॥ १ ॥

मध्वभाष्य

भाषा अनुवाद

श्रीभगवान कृष्णचन्द्र अति कृपा करके अपनी विभूति का
विभव कहा और सो सुनि के दर्शनेच्छु अर्जुन का विष्टभ्या
हमिदं कृत्स्नमेकांशेन स्थितो जगदित्यादि श्लोक से भगवा
न ने विश्वात्मक परमेश्वर स्वरूप प्रसंग वशातें दिखाया तो
अर्जुन भगवदुक्त पूर्व वचनों की प्रशंसा करते हुये अब एका
दश अध्याय के आरम्भ में चारि श्लोक से कहते हैं कि अशोच्या
नन्वशोचस्त्वमित्यादि दूसरे अध्याय के ग्यारहें श्लोक से ले कर
छठयें अध्याय तक मेरे शोक निवृत्ति के अर्थ परमात्मनिष्ठ
अति गोपनीय आत्म अनात्म विचार के जो वचन आपने कहा
उन से हम हन्ता और ये शत्रु गण मारने योग्य ऐसी जो मेरी भ्रम
सो नष्ट हो गई क्यों कि आत्मा को कर्तृत्व आदि कुछ नहीं है
यह आपने कहा सो ठीक ही है ।

दोहा

मोहि अनुग्रह सें परम गुप्त अध्यात्म नाम कह्यो जो तुम तिहि
वाक ते यह मम मोह निशान ।

भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया।
त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययं २

शाङ्करभाष्य १

किञ्च भवेति। भव उत्पत्तिरप्ययः प्रलयो भूतानां तौ भवाप्य
यौ श्रुतौ विस्तरशो मया न संक्षेपतस्त्वत्तः त्वत्सकाशात् कम
लपत्राक्ष कमलस्य पत्रं कमलपत्रं तद्वत् अक्षिणी यस्य तव
स त्वं कमलपत्राक्षः हे कमलपत्राक्ष माहात्म्यमपि चाव्ययमक्ष
यं श्रुतमित्यनुवर्तते २

आनन्दगिरिकृतटीका २

अविवेकबुद्धिरज्ञानविपर्ययात्मिका सप्तमादारभ्य तत्पदार्थनि
र्णयार्थमपि भगवदुक्तं वचो मया श्रुतमित्याह किञ्चेति तौ
भूतानामुत्पत्तिप्रलयौ त्वत्तः श्रुतौ विस्ताराभ्यां सम्बध्यते माहात्म्यं
तत्त्वभावो माहात्म्यं पारमार्थिकं सोपाधिकं वा सर्वात्मत्वा
दिरूपं श्रुतमिति परिणामानुवृत्तिं द्योतयितुं अपि चेत्युक्तं २

स्वामिकृतटीका ३

किं च भवाप्ययाविति भूतानां भवाप्ययौ सृष्टिप्रलयौ त्वत्तः सका
शादेव भवत इति श्रुतौ मया अहं कृत्स्नस्य जगतः प्रभवः प्रलयः
स्तथा इत्यादौ विस्तरशः पुनः पुनः कमलस्य पत्रे इव प्रसन्ने विशाले
अक्षिणी यस्य तव हे कमलपत्राक्ष माहात्म्यमपि चाव्ययमक्षयं श्रुतं
विश्वसृष्ट्यादिकर्तृत्वेऽपि सर्वनियन्तृत्वेऽपि शुभाशुभकर्मकारयितृ
त्वेऽपि बन्धमोक्षादिफलदातृत्वेऽपि अविकारित्वं वैषम्यासंगौदासीन्या
दिलक्षणमपरिमितं महत्त्वं च श्रुतं अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मया
ततमिदं सर्वं न च मां तानि कर्माणि निबध्नन्ति समोऽहं सर्वभूतेष्वित्या
दिना अतस्त्वत्तस्त्वादपि जीवानामहं कर्तृत्वादिमदीयो मोहो
विगत इति भावः २

पैशाचभाष्यम् ४

भवाप्ययौ उत्पत्तिप्रलयौ २

श्री· गी· टी· ८

5

रामानुजभाष्यम् ५

भवाप्ययाविति तथा सप्तमप्रभृतिदशमपर्यन्तेन त्वद्व्यतिरिक्तानां सर्वेषां भूतानां त्वत्तः परमात्मनो भवाप्ययावुत्पत्तिप्रलयौ विस्तरशो मया श्रुतौ हे कमलपत्राक्ष तवाव्ययं नित्यं चेतनाचेतनवस्तुशेषित्वज्ञानबलादिकल्याणगुणैस्तवैव परतरत्वं सर्वाधारत्वं चिंतितनिमिषितादिप्रवृत्तिषु तवैव प्रवर्तयितृत्वमित्यपरिमितं माहात्म्यं च श्रुतं हि शब्दो वक्ष्यमाणदिदृक्षाद्योतनार्थः २

अभिनवगुप्तकृतटीका· ६

स्पष्टार्थं २ ॥ ॥ ॥

परमार्थप्रपाटीका· ७

भवाप्ययाविति त्वत्तस्त्वत्सकाशाद्भूतानां भवाप्ययावुत्पत्तिप्रलयौ श्रुतं कमलत्वस्य जगतः प्रभवः प्रलयस्त्यादिवाक्यैर्विस्तरशो विस्तरेण मया श्रुतौ अव्ययमविनाशि माहात्म्यं सामर्थ्यमपि श्रुतं विश्वसृष्ट्यादिकर्तृत्वेऽप्यकर्तृत्वं सर्वनियंतृत्वेऽप्यसंगत्वं विचित्रफलेऽप्युदासीनत्वलक्षणं माहात्म्यमित्यर्थः २

वनमालीटीका· ८

भूतानां भवाप्ययावुत्पत्तिप्रलयौ यौ त्वत्त एव भवेतां त्वत्त एव विस्तरशो मया श्रुतौ न तु संक्षेपेण सकृदित्यर्थः कमलस्य पत्रे इव दीर्घे रक्ते नेत्रे यस्य स त्वं हे कमलपत्राक्ष सौन्दर्यातिशयो हि विश्वस्यैव मातिप्रियात् न केवलं भवाप्ययौ त्वत्तः श्रुतौ माहात्म्यं निरतिशयैश्वर्यं सृष्ट्यादिकर्तृत्वेऽप्यविकारित्वं शुभाशुभकर्मकारयितृत्वेऽप्यवैषम्यम् वैषम्योतादिविचित्रफलदातृत्वेऽप्यौदासीन्यमन्यदपि महत्त्वादुक्तादिप्रयुक्तकार्यकर्तृत्वादिकमव्ययं सदेकाकारं त्वत्तः श्रुतम् २

समवैजयन्तीटी· ९

किंच भवाप्ययाविति हे कमलपत्राक्ष कमलपत्रस्येव रम्ये दीर्घे रक्ते ते वेदिनी नेत्रे यस्य स तथा तस्य संबोधने हे कमलपत्रनेत्र त्वत्तो भगवतः तोः ति प्रसन्नत्वेन यावत्कार्योपदेष्टात्व निरतिशयस्नोत्कर्षेण प्रमाण्य दृत्वं च सूचितम्· त्वत्तः सर्वेश्वरात्कुत्र कस्मात् भूतानां ब्रह्मादिस्थावरान्तानां सर्वेषां चेतनाचेतनात्मकानां भवाप्ययौ सर्गप्रलयौ विस्तरतोऽस

कृत्स्नयात्वत्कृपयात्वेण श्रुतौ सप्तमारभ्यदशमाध्यायपर्यंतेन
ग्रंथेनहिंशहेतुनपालनमपिश्रुतंचपुनस्तवाव्ययंनिःसमंमाहात्म्य
महानंतगुणशक्तियुक्तआत्मास्वरूपंयस्यसमहात्मातस्यत
वभावोमाहात्म्यंनिरतिशयपरमैश्वर्यंविश्वसृष्ट्यादिकर्तृत्वे
ऽप्यविकारित्वंसर्वशुभाशुभकर्मकारयितृत्वेपितत्कर्मासंस्पृष्ट
त्वेनतत्कर्मानुगुणादेवतिर्यगादिविविधयोनिप्रापकत्वेप्यवै
षम्येनघृणादिनिःसर्वाधारत्वसर्वात्मत्वादिकमपिमयाश्रुतमि
त्यर्थः २

मधुसूदनीटीका ९

तथासप्तमादारभ्यदशमपर्यंतेनमदर्थनिर्णयप्रधानमपि
भगवतोवचनेनमयाश्रुतमित्याह भूतानांभवाप्ययौउत्पत्तिप्र
लयौतत्तत एव विस्तरशोमयाश्रुतौनतुसंक्षेपेणासकृदित्यर्थः
कमलस्यपत्रइवदीर्घेरक्तेतिपरममनोरमेअक्षिणीयस्यतव
सत्वंहेकमलपत्राक्ष अतिसौंदर्यातिशयात्प्रेमातिशया
त् नकेवलंभवाप्ययौत्वत्तःश्रुतौतवमहात्मनोभावोमहात्म्य
मनतिशयैश्वर्यंविश्वसृष्ट्यादिकर्तृत्वेप्यविकारित्वंशुभाशुभ
कर्मकारयितृत्वेपिवैषम्यंबंधमोक्षादिविचित्रफलदातृत्वेपि
असंगौदासीन्यमप्यसदपिसर्वात्मत्वादिसोपाधिकंनिरुपाधिक
मपिचाव्ययमक्षयंमयाश्रुतमितिपरिणतमनुवर्तनेचकारा
त् २

सदानंदी टीका ११

भूतानांजन्मविलयौविस्तरशस्त्वत्तःश्रुतौ पद्मपत्रविशाला
क्षतवैश्वर्यमपिश्रुतं । विश्वसृष्ट्यादिकर्तृत्वेप्यवि
कारित्वमात्मनःशुभादेःकारयितृत्वेप्यवैषम्यमहे
शितुः विचित्रफलदातृत्वेप्यौदासीन्यमसंगता इत्या
दितवमाहात्म्यमव्ययंचश्रुतंमया २ २ ॥

नीलकंठीटीका १२

भवेति तथासप्तमाध्यायमारभ्यदशमपर्यंतेनतथाभूतानांभवा
प्ययावपिउक्तौअहंसर्वस्यप्रभवोमत्तःसर्वंप्रवर्ततइति ताव
पिमयाविस्तरशःत्वत्तःश्रुतौहेकमलपत्राक्ष अव्ययंमाहात्म्य

श्री॰
गी॰ टी॰
प

6

मपि न त्वमंतो निकर्माणि लिंपंतीति विषमसृष्टिकर्तृत्वेपि वैषम्य
नैर्घृण्यदोषाभावात्सजगत्कर्त्तृत्वेपि विकारगंधोनास्तीत्येवमादि
रूपं तत् [illegible] तमिमसुघगः २

श्रानंदीटीका

त्वत्तः परमकारणादेकस्मात्सर्वेषां भूतानामुत्पत्तिप्रलयौ मयावि
स्तरतः श्रुतौ अव्ययमनंतं च माहात्म्यं परमव्यापकत्वमपि विभ
तिलक्षणं श्रुतम् २

रामकंठीटीका

प्रकृतहेतुमाह — यस्मात्त्वत्तः परमकारणादेकस्मात्समस्तानां स्थावरजंगमभूतानां
प्रभवाप्ययावुत्पत्तिप्रलयौ विस्तरतो वेदांतेन मया श्रुतौ श्रुतिमात्रे
णप्रतिपादितत्वेनावधारितावपि वाव्ययं नित्यं माहात्म्यं निरतिशा
यैश्वर्यलक्षणं महत्त्वं श्रुतमहं हे कृत्स्नस्य जगतः प्रभवः प्रलयस्त
थामत्तः परतरं नान्यत्किंचिदस्तीत्यादेरविसंवादिनो भगवद्वचना
देव भगवानेव सकलभूतभावकारणं तथाभावेपि विशुद्धचि
न्मात्रस्वभावाप्रच्युतेरद्भुतमैश्वर्यमेकांतिकमस्य
मित्यर्थः [illegible] स्यदमिति च मया प्रतिपन्न
[illegible] २

लासिकी [illegible]टीका

मोहापगममेवाह — भूतानां स्थावरजंगमात्मकानामुत्पत्तिविलयौ त्वत्तः सकाशा
देव भवतः इति सर्वभूतानि कौंतेयेत्यादिना विस्तरेण मया श्रुतौ
श्रुतिमात्रेणावधारितौ न त्वनुभूतौ तथाव्ययं जगद्विवर्तरूपे
इदं तावभासमानत्वेपि स्वरूपेणाविकृतत्वलक्षणमात्मस्वभावाप्रच्युतिरूपं
माहात्म्यं व्यापकत्वं च विष्टभ्याहमिदं कृत्स्नमित्यादिना श्रुतम् न
तमाहात्म्यम् [illegible] २ ॥

पंचोलीटीका

किंच भवाप्ययाविति हे कमलपत्राक्ष हि यस्मान्मया त्वत्तः भूता
नां भवाप्ययौ भवउत्पत्तिरप्ययः प्रलयस्तौ त्वत्सकाशात् विस्तरे
ण श्रुतौ च अन्यत् अव्ययमनंतं माहात्म्यमपि श्रुतं २ ॥

मवाप्स्ययाविति द्विमाह्वोत्रवाक्यावयारणोकमलपत्राक्षेतिसंबोध
नमनुग्रहसूचनार्थंमयानुभूतानामन्यत्रवस्तूनांमवाप्स्ययात्रुप
तिविनाशोत्वत्स्वतनुरवाङ्कुतावेवाधुनाद्वयदत्ययंमाद्दत्यंतद
विश्रोतमिच्छामीतिशेषः २॥

मधुभाष्य

२॥

भाषा अनुवाद

और भूतों को सृष्टि तथा प्रलय भी आपही से होती यह भी मैं ने
विस्तार से सुना और हे कमलपत्राक्ष श्रीकृष्ण आप का अव्यय कहे
अलय माहात्म्य भी आपसे सुना इस से अब जीव सकल आपके आ
धीन हैं यह जाना और अहं कर्त्ता भोक्ता इत्यादि रूप मेरा मोह स
मूलि दूर हो गया २

दोहा

उत्पति लय सब भूत की सुनी विस्तार सें मैंह तोसें पद्मदलन
यन पुन महात्म अव्यय पद २

एवमेतद्यथात्थत्वमात्मानं परमेश्वरं द्रष्टुमि-
च्छामि ते रूपमैश्वरं पुरुषोत्तम ३

शाङ्करभाष्य १

एवमिति एवमेतन्नान्यथा यथा येन प्रकारेणात्थ कथयसि
त्वमात्मानं परेश्वरं तथापि द्रष्टुमिच्छामि ते तव ज्ञानैश्वर्यशक्ति
बलवीर्यतेजोभिः संपन्नमैश्वरं वैष्णवं रूपं पुरुषोत्तम ३

आनन्दगिरिकृतटीका· २

वक्तर्यर्थे विश्वासाभावात् न तस्मिन् दिदृक्षा किंतु कृतार्थी
बुभूषया इत्याह एवमेतदिति येन प्रकारेण सोपाधिकेन नि-
रुपाधिकेन चेत्यर्थः यदिममात्मत्वं निश्चितं महावाक्यं तेमानं न
हि किमिति मदुक्ते कृतार्थीबुभूषयेत्यर्थं मत्वाह तथापीति च
तर्भुजादिरूपविशिष्टमर्थमाह ऐश्वरमिति तद्व्याचष्टे ज्ञानेत्यादिना
३

दिदृक्षते

स्वामिकृतटीका· ३

किंच एवमिति भवाप्ययौ हि भूतानामित्यादि मया श्रुतं यथा चे-
दानीमात्मानं त्वमात्थ विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदि-
त्येवं कथयसि हे परमेश्वर एवमेतत् अत्राप्यविश्वासो मम नास्तीत्य-
र्थः तथापि हे पुरुषोत्तम तवैश्वरं ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः सं-
पन्नं तव रूपं कौतूहलादहं द्रष्टुमिच्छामि ३

पैशाचभाष्यम् ४ टी·

एवमिति ईश्वरस्येदमैश्वरं ३

रामानुजभाष्यम् ५ टी·

एवमिति हे परमेश्वर एवमेतदिति पुरुषोत्तम त्वदसाधारणं सर्वस्य प्रशा-
स्तृत्वं पालयितृत्वं स्रष्टृत्वं संहर्तृत्वं कल्याणगुणाकरत्वं परतरत्वं सक-
लेतरविसजातीयत्वं यथा त्वमात्मानं ब्रवीषि प्रभुत्वे चावस्थितं
रूपं द्रष्टुं साक्षात्कर्तुमिच्छामि ३

निधु · भर्तृत्वे · यत्वमि

अभिनवगुप्तकृतटीका· ६

स्पष्टार्थः ३ ॥ ॥

परमार्थप्रपाटीका· ७

गी·
टी· ५

९६

एवमिति विष्टभ्याहमिदं कृत्स्नमितीदानीमात्मानं त्वं यदात्थ यद्धत्तमि
एतत्तेऽपेक्ष्यां ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः संपन्नं रूपं द्रष्टुमिच्छामि
पुरुषोत्तमेति संतुष्ट्याऽलौकिकदर्शनकौतूहले दिदृक्षास्मीति सूचि
तं श्रुतिरपि वामदेवेन साम्नोपदिशति कया नश्चित्र आभुवदूती स
दावृधः सखा कया शचिष्ठया वृतेति भाष्ये वामदेवः सदावृधः सदा
वर्धमानः समष्टिरूपः परमात्मा चित्रश्चायनीयः पूजनीयः पद्माविचि
आकृतिमयः सखा मित्रभूतः परमात्मा कया ऊती उत्मासंतर्पणेन त
ध्या कया शचिष्ठया प्रज्ञावत्तमतया प्रज्ञासहितमनुष्ठीयमानेन कया
वृता केन वर्तमानेन कर्मणा वा नोऽस्माकं आभवत् आभिमुख्येन भवे
त् अत्र भवार्गेचरो भवेदित्यादिवाक्यैरेतादृग्रूपदर्शने वेदोऽपि वामदे
वस्य मनोरथं प्रकटीकरोति किं पुनरहमित्यर्थः तदुक्तं हरिवंशे भा
औरस्त्वमासीने विष्टरे तं जनार्दनं वामदेवभरद्वाजौ दृष्ट्वा प्रोचतुर्जग
मर्थे तावाचायातौ समालोक्य विज्ञाप्य ततोऽमितं उभयोर्दर्शयामा
स विश्वरूपं स्वं वर्ष्माणि ततस्तावूचतुः कृत्स्नं सर्वदेवात्मकं विभुं
तमादिः सर्वभूतानां मध्यमं तत्तथा भवान् यामेव वस्तुजाताति
लोकदृष्टानि माधव नवगात्रेषु पश्यामस्तितिनीः सर्वदेवताः जि
तषड्गुरिति... शान्ता दान्ता योगेश्वरेश्वराः तामीदृशं ते
इत्येव विश्वदेहइति अथवा मदेवस्य सामतः ३ हृदिरापस्तं भक्ष्यावाया विश्वभिर्दैवैः एतनीजयामिजाग +
पश्यंतिनान्य

वनमाली टीका· ८

हे परमेश्वर यथा येन प्रकारेण त्वं तटस्थोऽतिशयो निरतिशयानैः तैश्च
येणात्मानं त्वमात्थ कथयसि एवमेतत्तथ्यं नान्यथा तथापि तद्वचसि कृतविश्व
विश्वासशंकानात्वयि तथापि शङ्कातद्रूपं ज्ञानेन तथापि च तद्दर्शनमिच्छामि तेन तद्रूपमैश्वरं ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः संप
नमद्गुते हे पुरुषोत्तम मम सर्वान्तर्यामिन् तद्वचसि विश्वा
सोनास्ति मम दिदृक्षा वास्ति महतीति सर्वज्ञतातज्ज्ञानासीति सू
चयति ३

ऊर्ध्वमेवेजयपनी टीका ५

किंच एवमेतदिति हे परमेश्वर चेतनाचेतननियन्तः यथा त्वं सम
मतिस्त्वात्मानं समात्थ विष्टभ्याहमिदं कृत्स्नमित्यादिना ब्रवीषि
तदेतदेवमित्थमेव मम मात्रनास्त्यविश्वासस्तथापि हे पुरुषोत्तम
प्रपन्नजनवात्सल्यादयैतेन परमेश्वरस्य तवैश्वरं जगतः स्रष्टादिकर

+ तेन छन्दसा समदर्शनस्तोमेन वामदेवेन साम्ना वा वद्धोरेणावज्रेनेति अत्र सामगायनेस्तोमस्तोभादिल
क्षणमस्माभिः सामवेदभाष्ये प्रोक्तं तत्रैव भरद्वाजोऽपि कर्मणां फलदाना च फलदः कर्मकर्तृणां निघ
हाइ एस त्वं नान्यहं देवो परतमामिति श्रुतिरपि रक्षोघ्नमितिहैकेन एतदपश्ये निरूपयिष्यते ३ ॥ +

त्वेपि सर्वनियंतृत्वेपि सर्वभर्तृत्वेपि सर्वप्रशास्तृत्वेपि स्वाभाविकानंत
कल्याणगुणगणैवत्वेनानंतशक्तित्वेन च सकलचेतनाचेतनविसजाती
यत्वेन तदस्याधारणरूपं विश्वरूपं द्रष्टुं साक्षात्कर्तुमिच्छामि तव निरतिश
यानंतज्ञानैश्वर्याद्याश्रयत्वेन निखिलविदंतरात्मकत्वेन च निरवधि
कातिशयानंताचिन्त्यगुणशक्तिके योगिध्येयं स्वरूपं नयनगोचरं यत्
द्रूपं तद्दर्शनाय लालसस्य ममेच्छाप्रवृत्तास्ता चेन्निराशा स्यात् नहि तव
भक्तकामपरिपूरकत्वाम नसेत्यमत त्वं तो मदीतां श्रयतां प्रार्थ
यामीति संबोधनयोरभिप्रायः ३

मधुसूदनी टीका· १० निरुपाधिकेन

हे परमेश्वर यथा येन प्रकारेण सोपाधिकेन च निरतिशयैश्वर्येण
त्मानं त्वमात्थ कथयसि एवमेतन्नान्यथा त्वद्वचसि ममापि ममावि
श्वासशंका नास्त्येवेत्यर्थः यद्यप्येवं तथापि कृतार्थो बुभूषया द्रष्टुमि
च्छामि ते तव रूपमैश्वरं ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः संपन्नम
१न द्भुतं हे पुरुषोत्तम संबोधनेन त्वद्वचसि विश्वासो मम नास्ति दिदृक्षा
च महती वर्तत इति सर्वज्ञत्वात्त्वं जानासि सर्वांतर्यामित्वादिति सूच
यति[२] ॥

सदानंदी टीका· ११

यथा येन प्रकारेण परमेश्वर मापते सोपाधिकात्मना तत्तन्निरुपाधि
करूपतः १ परमैश्वर्यसंपन्नं स्वात्मानं कथयसि त्वं एवमेवैतन्नत्वसी
हनास्ति शंका मनागपि २ यद्यप्येवं तथाप्यत्रादेकृतार्थो बुभूषया
द्रष्टुमिच्छामि ते रूपं ज्ञानैश्वर्यादिसंयुतम् ३ सर्वशास्त्राश्रयं श्रीम
त्परमेश्वरमद्भुतं त्वद्वाक्येनात्यविश्वासो दिदृक्षा महती च मे ४ अं
तर्यामितया वेत्सि पुरुषोत्तम चांतरे ५ ३

नीलकंठी टीका· १२

एवमिति यत्त्वं विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति
आत्मानं जगदाधारमात्थ तदपि तथैवेति मम मात्रासंभावनास्ति

श्री॰
गी॰टी॰
प

9

हेपरमेश्वरतेतवरूपंऐश्वरंईश्वरस्येदंविश्वात्मकंमायामयमित्य
र्थः हेपुरुषोत्तमक्षराक्षरातीत विश्वरूपंमायामयंवास्तवंतद्रू प
मयातीतमित्यैश्वरमितिपुरुषोत्तमेतिचपदाभ्यांलभ्यते तथाच
वसति मायाह्येषामयासृष्टायन्मांपश्यसिनारद सर्वभूतगुणै
र्युक्तंनैवंमांज्ञातुमर्हसीति उक्तंच शुद्धंरूपमभिप्रेतमव्यक्तो
यमचिंत्योयमिति ३

आनंदीटीका

अतीन्द्रियस्त्वात्माश्रुतएवकिंततवैश्वरंरूपंसर्वभूतनिवासात्मि
कांदिव्यांमूर्तिंद्रष्टुमिच्छामि ३

श्रुतिमात्रेणैतन्मयाप्रतिपन्नंनतुसा

रामकंठीटीका

क्षाद्दृष्टमितितदर्थमाह ॥

यथायेनप्रकारेणपूर्वोक्तेनत्वयास्वरूपमात्मानंपरमेश्वरंब्रह्मादी
नामपीश्वराणामीशितारंत्वमेवंप्रभुमात्थकथयसि एतत्तथैवहस्तवमने
नप्रकारेणस्थितेनात्रमेभ्रांतिरित्यर्थः ततएवतेरूपंदिव्यमैश्वर
मीश्वरस्यतवमेवत्थिद्रष्टुंसाक्षान्निरूपयितुमिच्छाम्यभिकांक्षामि
अनेनत्वयुनादृश्यमानेनपुरुषाकृतिनारूपेणानन्तरंरूपंवामात्रेण
ममकथितंकेवलं यत्रेदमेकस्मिन्सर्वमेवस्थितं तदिदानींभगवद्
वनप्रमयात्वयातन्नस्यथाविद्यमानतयाप्रतिपन्नमतःपुरुषोत्तमप
रमपुरुषत्वत्प्रसादात्मतत्त्वतःप्रेक्षितुमभिकांक्षामि ३ ॥

अथतत्मात्कारार्थीमत्रमि लासिकी

तिपूर्वमाह॥

...टीका

हेपुरुषोत्तम यथायेनप्रकारेणात्मानमैश्वरंरूपमाहकथयसि प
वंवाढमनेनप्रकारेणैतत् नात्रमेविश्वासाभावः तथापितवैश्वरंरू
पंमालाकतंस्पष्टयामि ३

पंचोलीटीका

पूर्वोक्तमभिनंद्यस्वाभिप्रायंआविष्करोति एवमितिहेकमलहेपरमेश्व
रयथात्वमात्मानंनित्यशुद्धबुद्धमुक्तस्वभावपरमेश्वरमात्मानमा
त्थकथयसिएततएवमेवनान्यथाहेपुरुषोत्तमतेतवऐश्वरंशक्ति
वीर्यबलतेजोभिः संपन्नंरूपंद्रष्टुमिच्छामि ३ ॥

एवमेतदिति परमेश्वर त्वं स्वात्मानमात्मीयं स्वरूपं यथात्थ कथयसि तदेतदेवमनेनैव त्वदुक्तप्रकारेण निर्णीतं भवतीति शेषः संप्रति त्वत्कथितमतैश्वररूपं द्रष्टुमिच्छामीति ३॥

मधुभाष्य

३॥

भाषा अनुवाद

और जो आप ने सप्तम अध्याय मे कहा कि भूत सृष्टि तथा प्रलय आदि कार्य्यो का कारण मे हू और दशम अध्याय के अन्त मे कहा कि विष्टभ्याहमिदंकृत्स्न मेकांशेन स्थितो जगदिति और सब भी जो रूप आप आपना कहते हो यह सब ऐसा ही है इसमे हमै कुछ सन्देह नही है तो भी हे पुरुषोत्तम ज्ञान ऐश्वर्य बल वीर्य औ तेज से समस्त करके युक्त तकार रूप को अति आश्चर्य से मै देखने की इच्छा करता हू ३

दोहा

ऐसें जो तुम यह कह्यो आत्म कहुं भगवान देषा चहों पुरुषोत्तम तो ईश्वर रूप महान ३॥

मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो योगे-
श्वर ततो मे त्वं दर्शयात्मानमव्ययं ४

शाङ्करभाष्य १

मन्यस इति मन्यसे चिन्तयसि यदि मयार्ज्जुनेन तत् शक्यं द्र-
ष्टुमिति प्रभो स्वामिन् योगेश्वर योगिनो योगास्तेषामीश्वरो योगे-
श्वरः हे योगेश्वर यस्मादहमतीवार्थी द्रष्टुं ततः तस्मात्त्वं मम
मदर्थं दर्शय त्वमात्मानमव्ययं ४

आनन्दगिरिकृतटीका २

द्रष्टुमयोग्ये कुतो दिदृक्षेत्याशंक्याह मन्यस इति प्रभवति
सृष्टिस्थितिसंहारप्रवेशप्रशासनेभ्यः इति प्रभुः लक्षणया यो-
गशब्दार्थमाह योगिन इति तत इत्यादि व्याचष्टे यस्मादिति ४

स्वामिकृतटीका ३

न चाहं द्रष्टुमिच्छामि इत्येतावतैव त्वया तद्रूपं दर्शयितव्यं किं तर्हि
मन्यस इति योगिन एव योगास्तेषामीश्वर मयार्जुनेन तद्रूपं द्रष्टुं
शक्यं यदि मन्यसे ततः तर्हि तद्रूपं त्वमात्मानमव्ययं नित्यं मम द-
र्शय ४

पैशाचभाष्यटीका ४

मन्यस इति योगशब्दात्समाधिवचनादर्शआदित्वादच्प्रत्ययः यो-
गो विद्यते येषां ते योगाः योगिनामीश्वरो योगीश्वरस्तस्य संबोधने ४

रामानुजभाष्यटीका ५

मन्यस इति तत् सर्वस्य स्रष्टृ प्रशास्तृ सर्वस्याधारभूतं त्वद्रूपं मयाद्र-
ष्टुं शक्यमिति यदि मन्यसे ततो योगो ज्ञानादिकल्याणगुणयोगः य-
स्य मे योगमेश्वरमिति हि वस्तेन व्यतिरिक्तस्य कस्याप्यसंभावितानां
ज्ञानबलैश्वर्यवीर्यशक्तितेजसां निधे त्वमात्मानं त्वा मव्ययं मे दर्शय अव्य-
यमिति क्रियाविशेषणं त्वं सकलं मे दर्शयेत्यर्थः [illegible]

अभिनवगुप्तकृतटी० ६

स्पष्टार्थं ४

परमार्थप्रपाटी० काटी० ७

श्री॰
गी॰टी॰
५

ग्रथेन तद्रूपदर्शने केवलमनुग्रहैकलभ्यमित्याह मन्यसइति योगेश्व
र योगिनय वयोगास्तेषामीश्वर ततस्त्वं हि अव्ययमात्मानं दर्शय ४ यो॰

वनमाली टीका॰ ४

द्रष्टुमयोग्येन त्वत्तो दिदृक्षेत्याशंक्याह मन्यसइति प्रभवति सृष्टिस्थि
तिसंहारप्रवेशप्रशासनेष्विति प्रभुः हे प्रभो सर्वस्वामिन् तत्तवैश्वरं
रूपं मया द्रष्टुं शक्यमिति मन्यसे ज्ञानासीच्छसि वा हे योगेश्वर सर्वेषा
मणिमादिसिद्धिशालिनां योगानां योगिनामीश्वर ततस्त्वदिच्छाव
शादेव मे मह्यमत्यर्थमर्थिने त्वं परमकारुणिको दर्शय वा त्वद्भ-
क्तान विषयीकारय आत्मानमैश्वररूपविशिष्टमव्ययमत्यंतसदै
काकारम् ४

श्रीमद्वैजयन्ती टीका॰ ४

ननु बलादिभिर्देवैरपि द्रष्टुमशक्यं साधनसम्पन्नैर्योगिभिश्चापि
यदुष्प्राप्यं तत्त्वं साधनेन विना कथं द्रष्टुमिच्छसीति चेत्तत्राह मन्यसे य
दीति प्रभवति सृष्टिस्थितिसंहारप्रवेशप्रशासनसमर्थो भवतीति प्रभुः
तत्संबुद्धौ हे प्रभो सर्वस्वामिन्ननेन भगवतः कर्तृत्वे कारयितृत्वे
यिवराणां सृष्टत्वं सूचितं यदि मयाऽल्पेन साधनहीनेन तत्सर्वैश्व
र्यं सर्वनियन्तृ सर्वाश्रयमव्ययं रूपं द्रष्टुमवलोकितुं शक्यमदर्शन
योग्यं भवेदिति त्वं मन्यसे जानासीच्छसि वा ततस्तर्हि हे योगेश्वर योग
शब्दोऽत्र ज्ञानैश्वर्यादिकल्याणगुणयोगः पश्य मे योगमैश्वर
मिति वक्ष्यमाणत्वात् हे ज्ञानैश्वर्यशक्तितेजोवीर्यबलतेजादिशक्त्यादिज
लयेरपनेन तद्व्यतिरिक्तानां विधीशेन्द्रादीनां केषामप्येतद्योगासम्भ
वात्वैश्वरत्वं किं तत्त्वमेव सर्वेश्वरोऽसीति सूचिते अव्ययं नित्यं स्वकर
संक्रियाविशेषणं वा सकलेतरविसजातीयं यथा स्यात्तथा आत्मा

तेस्वं त्वां मे मह्यमसमर्थमर्थिने परमकारुणिकस्त्वं दर्शय चाक्षुष-
ज्ञानविषयंकारय त्वदनुग्रहं विना त्वद्रूपदर्शने ब्रह्मादयोपि देवा
न समर्थास्त्वत्कृपया स्त्री शूद्र पशुपक्ष्यादयोपि समर्था भवेयुस्त्वन्नि-
दस्य मम यदि योग्यतास्ति तर्हि दर्शयेत्यभिप्रायः ४

द्रष्टुमयोग्यकृतत्वादिदृक्षते

मधुसूदनी टीका ९

त्वाशंकयाह समर्थो भवति प्रभवति स्वष्टिस्थितिसंहारप्रवेशप्रशासनेष्वि-
ति प्रभुः हे प्रभो सर्वस्वामिन् तत्तैश्वरं रूपं मयार्जुनेन द्रष्टुं शक्य-
मिति यदि मन्यसे जानासि इच्छसि वा हे योगेश्वर सर्वेषामणिमा-
दियोगिनां शालिनां योगानामीश्वर ततस्त्वदिच्छाव[शा]देव मे मह्य-
मसमर्थमर्थिने त्वं परमकारुणिको दर्शय चाक्षुषज्ञानविषयीका-
रय आत्मानमैश्वररूपविशिष्टमव्ययमत्ययं [illegible]
[illegible] ४

सदानंदी टीका ११

सृष्टिस्थितिलयादिभ्यः प्रभुः प्रभवतीत्ययः हे प्रभो सकलस्वामि-
न् रूपं परं तत्तैश्वरं १ मयार्जुनेन शक्यं च द्रष्टुं चिंतयसीश्वर हे
योगेश्वर सर्वेषां योगिनां सिद्धिशालिनां २ योगानां चैव सर्वेषा-
मीश्वरोसि रमापते त्वदीयेच्छावशादेव मह्यमसमर्थिने विभो ३
आत्मानमैश्वरं रूपमत्ययं करुणानिधे चक्षुर्ज्ञानविषयीकार-
य त्वमिहाधुना ४॥ ४

नीलकंठी टीका ९

मन्यस इति हे योगेश्वर योगानां योगिनामीश्वर तद्रूपं यदि मया
द्रष्टुं शक्यमिति मन्यसे यदि मच्चित्तं दर्शनाधिकारं पश्यसि ततस्त्वं
हि मे मह्यमव्ययं मायामयमात्मानं दर्शय मायामयत्वादेवास्या-
व्ययत्वं मायायां हि सर्वं सर्वात्मकं सर्वदास्तीति प्रसिद्धं यथोक्तं व-
सिष्ठेन वर्तमानमतीतं च भविष्यत्स्थूलमण्वपि तथाहुरसद्व-
चनिमेषः कल्पशतमपि चिदात्मनि स्थितान्येव यथा मायाविंतर्भि-
नमिति नहि मरुमरीचिसरसीकमपाः शुष्यति अतो मायामयत्वा-
देवास्यैश्वरस्य रूपस्याव्ययत्वं ४

आनंदीटीका

योगीश्वर महाविदेहाख्यया योगसिद्ध्या सपत्सर्वं जगत्कर्तुं समर्थ अव्ययमात्मानमनादिनिधनं स्वरूपम् ४

रामकंठीटीका

किं त— हे प्रभो परमेश्वर तत्तथाविधं तावकं रूपं परमयोगिभिरपि आर्ष्यमानदर्शनं मया मनुष्यमात्रेण द्रष्टुं साक्षात्कर्त्तुं शक्यं सत्यमिति यदि मन्यसे जानासि यदि ममैषतो योग्यतां संभावयसि ततस्त्वं योगीश्वर महज्ञसिद्धनिरतिशययोगत्वात् प्रयत्नसाध्ययोगानां सर्वेषां योगांतराणां प्रभो मम मह्यमव्ययमनादिनिधनमात्मने स्वरूपं दर्शय प्रत्यक्षीकुर्विति भ्यर्थितः प्रसादाभिमुखो भगवानुवाच ४

लासिकी टीका

किं त— हे प्रभो हे स्वामिन् भो योगेश्वर बुद्धियोगमारभ्य ज्ञानयोगपर्यंतं यथोपपत्तियोगदानसमर्थ अमम् अर्थप्रतिहिर्याचैवख्येति साक्षात्मामेत्रगाम् तदेश्वरं रूपं मया मनुष्येणाल्पज्ञात्ममात्रबोधेन द्रष्टुं साक्षात्कर्तुं शक्यं सत्यमिति चेत्त्वं मन्यसे जानासि यदि ममैषतो योग्यतां संभावयसि ततो मह्यमव्ययं यथोक्तमात्मानं दर्शय प्रत्यक्षीकुर्वित्येवमभ्यर्थितः प्रसादाभिमुखः ४

पंचोलीटीका

न केवलं मम इच्छया इदं त्वया दर्शयितव्यं मदीयमधिकारित्वं वापेक्षणीयमित्याह मन्यसे इति हे प्रभो यदि तदैश्वरं रूपं मया द्रष्टुं शक्यमिति मन्यसे हे योगेश्वर योगाः योगिनस्तेषामीश्वरस्ततस्त्वं मम स्वआत्मानं दर्शय ४

रणवीरसमिद्धोधिनी॥

इदानीं भगवंतं स्वामित्वी कृत्य विश्वरूपं दर्शयितुमभ्युपगमयति मन्यस इति प्रभो संबोधनं सर्वशक्तिमत्त्वद्योतनार्थं त्वया यदि मन्यसे महिमवं योग्यत्वं वेजानासि तत्स्वरूपं द्रष्टुं साक्षात्कर्तुं याथार्थ्येन मया जनेन मा

कामिति ततस्तर्हि योगेश्वर भगवन्नात्मानं स्वरूपमव्ययं सनातनं मेमह्यं दर्शयेतीत्थं प्रार्थनापूर्वं प्रश्नस्ततो भगवानुवाच पश्यमेइ ति ४ ॥

मधुभाष्य

यथाश्रुते ध्यानं प्राक्कृतं तथा स्वरूपस्थितिरनेनाध्यायेनोच्यते प्रभुः समर्थः नास्ति तस्मात्परं भूतं पुरुषाद्वै सनातनादिति मोक्षधर्मे प्रभुरीशः ॥

भाषा अनुवाद

और मेरी इच्छा है देखने की इस हेतु आपको अपना रूप देखावना उचित है यह कछु बातनहीं है परन्तु हे योगेश्वर जो वह आपका ईश्वर स्वरूप हमारे देखे नयोग्य होय और हम देख सकैं तो हे प्रभो वही अव्यय स्वरूप अपना हमे कृपा करि दिखावो यह अर्जुन ने कहा ४

दोहा

जो प्रभु मानत योग्य यह देषनको मोहि याहि तो मोहु योगेश्वर
तुम आतम अव्यय देषाहि ४

श्रीभगवानुवाच पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः नानाविधानि दिव्यानि नानावर्णाकृतीनि च ५

शाङ्करभाष्यं १

एवमुक्तो दितोऽर्जुनेन भगवानुवाच पश्य मे इति पश्य मे मम पार्थ रूपाणि शतशोऽथ सहस्रशः अनेकश इत्यर्थः तानि च नानाविधानि अनेकप्रकाराणि दिवि भवानि दिव्यानि अप्राकृतानि च नानावर्णाकृतीनि च नाना नीलपीतादिप्रकारा वर्णा विलक्षणास्तथा आकृतयोऽवयवसंस्थानविशेषा येषां रूपाणां तानि नानावर्णाकृतीनि च ५

आनन्दगिरिकृतटीका २

अर्जुनेनमतिभक्तं सखायं प्रार्थितप्रतिश्रवणेनाश्वासयितुमाह पश्येति ५

स्वामिकृतटीका ३

एवंप्रार्थितः सन् अत्यद्भुतंरूपंदर्शयिष्यन् सावधानोभवेत्यर्जुनमभिमुखीकरोति श्रीभगवानुवाच पश्येतिचतुर्भिः रूपस्यैकत्वेपिनानाविधत्वाद्रूपाणीतिबहुवचनेनअपरिमितानमनेकप्रकाराणिअलौकिकानि ममरूपाणिपश्यवर्णाः शुक्लकृष्णादयः आकृतयोवयवसंनिवेशविशेषाः नानाअनेकावर्णाआकृतयश्चयेषांतानिनानावर्णाकृतीनि ५

पैशाचभाष्यटीका ४

एवमर्जुनेनस्वरूपदर्शनंप्रार्थितंतद्दर्शयितुकामोभगवानुवाच पश्यमइति शतशःशतानिसहस्रशःसहस्राणिनानावर्णाकृतीनिनानाविधवर्णसंस्थानि ५

रामानुजभाष्यटीका ५

एवंकौतूहलान्वितेनहर्षगद्गदकंठेनपार्थेनप्रार्थितः ॥

श्रीभगवानुवाच पश्यमेसर्वाश्रयभूतानिरूपाणिअथशतशःसहस्रशश्चनानाविधानिनानाप्रकाराणिदिव्यान्यप्राकृतानिनानावर्णाकृतीनिशुक्लकृष्णादिनानावर्णाकृतीनिपश्य ५

अभिनवगुप्तकृतटी ६

स्पष्टार्थं ५ ॥ ॥

१ श्री· गी·टी·

अथभगवानप्यलौकिकरूपंदिदृक्षंतमर्जुनंसन्नद्धीकरोति पश्ये
त्यादि चतुर्भिः भोपार्थमेशतशः सहस्रशश्चरूपाणिपश्य शतशोमु
ख्ये विभूतिरूपाणिसहस्रशोवांतराणि शतसहस्रशाह्रोःनंतसं
ना॰ ख्यावाचीवा नानाविधानिनानाप्रकाराणि तदेवाह नानावर्णाःशुक्ला
दयः नानाकृतयआकारायेषांतानि ५

वनमालीटीका ८

स्वभक्तेनैवंप्रार्थितःसन्नाहपश्येति अत्रक्रमेणश्लोकचतुष्टयेपि
पश्येत्याहसाद्भुतरूपाणिदर्शयिष्यामितंसावधानोभवेत्यर्जुनमभि
मुखीकरोतिभगवान् शतशोथसहस्रशःअमितानिचनानाविधा
न्यनेकप्रकाराणि दिव्यान्यद्भुतानि नानाविलक्षणवर्णानीलपी
तादिप्रकारास्तथाकृतयश्चावयवसंस्थानवयोविशेषायेषांतानि
नानावर्णाकृतीनिचममरूपाणिपश्यपार्थइहलोकेदृष्टमहीभवेत्यर्थः
ना॰ यथाषोडशसहस्रस्त्रीणांविवाहसमयेदेवर्षिणैकस्मिन्नेवका
लेतावद्रूपत्वमन्येषांतावद्रूपाणांनैत्रचटचटनापरीयस्माद्विमश
ना॰ तयोपपन्नंतथात्राप्येकस्यैववस्तुनोनेकरूपत्वमुपपद्यतइतिभावः ५

ऊस्मवैजयन्तीटीका· ९

इत्येवंभगवतोविश्वरूपदर्शनेच्छुनाभगवत्सपत्रेनपरममित्रेण
गुनेनसम्प्रार्थितःस्वाभाविकानवधिकातिशयाविस्मानेनगुणशा
लिकोभक्तवात्सल्यतयातिप्रसन्नोमुकुलवारिजवदननयनोभक्तके
रवपूर्णेंदुराजोभक्तिविवशोभक्तकामपरिपूरकोभगवानर्जुनं
प्रत्युवाचचतुर्भिः पश्यमेपार्थेति श्लोकचतुष्टयेपुनःपुनःपश्येति
सततादर्शनीयानांरूपाणामद्भुतत्वंविविधानेकविधत्वमप्राकृतत्व
चसूचितं हेपार्थमेनेनपतत्त्वमसिरक्ष्यत्वेयोममातीवप्रियोमत्स
पत्रोसि अतस्त्वामरनरादिभिरपिदर्शनायोग्यमलौकिकमिदंरू
पंदर्शयामित्वदतिरेकःकोपीदृशंद्रष्टुंनशक्नोतीतिसूचितम् मेस
र्वैश्वर्यस्यसर्वंनियंतृविभूतिमतोममशतशःशतानि अथचसह
स्रशःसहस्राणिनानाविधान्यनंतप्रकारकाणिचपुनर्नानावर्णाकृ
तीनिनानानेकवर्णाःश्वेतकृष्णरक्तपीतादयः आकृतयोऽवयवसं
निवेशभूताआकारायेषांतेषुवातानि नत्वेतादृशाविधाकृतान्यपि
सुरितिचेन्नाह दिव्यानिप्रकृतिकार्यंतत्संबंधगंधरहितानि निरस

स्वाभाविकानीत्यर्थः इत्यनेनैतेषां शुद्धमायाकार्यत्वमपि सूचि-
तो निराकृतम् रूपाणि मम विश्वविग्रहाकाराणि मदेकदेहस्यै
कदेशस्थितानीत्यर्थः मम देहे गुडाकेशेत्यत्रैकस्थं जगत्कृत्स्न
मिति वक्ष्यमाणात् रूपाणां भगवद्विग्रहाद्व्यक्स्थिति प्रद
र्शिकत्वात् मे रूपाणि इत्युक्तं वे मङ्क्षा मत्यस्य पश्य प्रमत्तविष-
याकृष्टधीः पार्थ इत्यादि मत्कृपया तव मेतानि दृष्टियोग्यानि भ
वेत्यर्थः पार्थ सारथे विश्वविग्रहस्य भगवतो विग्रहस्यैकत्वे
पि रूपाणि निवडवचनमद्भुतरसकृत्यादीनां वैविध्ये वैचित्र्यकथ
नाभिप्रायेणोक्तं ५

मधुसूदनीटीका ९

एवमत्यंतभक्तानार्जुनेन प्रार्थितः सन् अत्र क्रमेण श्लोकचतुष्टयेपि पश्येत्यावृत्त्या अद्भुतरूपाणि
दर्शयिष्यामि त्वं सावधानो भवेत्यर्जुनमभिमुखीकरोति भगवा
न् शतशोथ सहस्रशः इत्यपरिमितानि तानि च नानाविधानि
अनेकप्रकाराणि दिव्यान्यद्भुतानि रूपाणि नानाविलक्षणाव
र्णा नीलपीतादिप्रकाराः तथाकृतयश्चावयवसंस्थान
येषां विशेषा तानि नानावर्णाकृतीनि च मम रूपाणि पश्य अहैलोद्द
स्वमहो भव पार्थ

सदानंदटीका टी॰ ११

एवमत्यंतभक्तेन प्रार्थितो हरिरब्रवीत् अद्भुतानि रूपाणि
दर्शयिष्यामि सर्वशः १ सावधानो भवेत्येवमाभिमुख्याय त
त्यस्य च पश्येत्यस्य निहोत्तिरत्र श्लोकचतुष्टये २ अनंतानि स्वरू
पाणि दिव्यान्यद्भुतानि मे तथानेकप्रकाराणि द्रष्टुमर्हो
भवार्जुन ३ वर्णा नानाविधा येषां नीलपीतारुणादयः त
थावयवसंस्थानभेदो येषामनेकधा ४ तानि मे पश्य रूपाणि
सावधानेन चेतसा ५ ५

नीलकंठीटीका॰ १२

एवं प्रार्थितः सन् भगवानुवाच पश्येति शतशः इत्यादिना
अनंतानीत्युक्तं नानावर्णानि नानाकृतीनि च ॥५॥

हे पार्थ मे ममैकस्यैव परमार्थसतः परमात्मनः स्वैश्वर्यातिशयात्स्वशक्तित्वेन संबद्धानि रूपसं
ख्यातानि रूपाण्याकृतिविशेषात्मकानि पश्यावलोकय कीदृशानि नानाविधानि विचि
त्राणि अतएव नानावर्णाकृतीनि विविधावभाससंस्थानानि तथादिव्यान्यमात्रवीयाणीति ५

श्री. गी. टी. ५

15

आनंदीटीका

स्पष्टम् एतत्सामान्यतउद्दिश्यविशेषेणाह ५

रामकंवरीटीका स्पष्टार्थम् ५

लाखिकी [illegible]टीका

हे पार्थ शतशः सहस्रशः इति असंख्यातानि नानाविधान्यनेकप्र
काराणि दिव्यानि शंदंतयावभासमानत्वेपि दृशाहि तानि मेरूपा
लोकोत्तराणि नानाविलक्षणवर्णाः शुक्लादयः आकृतयोवयवसं
स्थानविशेषा येषां तानि रूपाणि पश्य द्रष्टुमर्हो भव अहं लोक [illegible]
[illegible] ५ ॥

पंचोलीटीका

एवं प्रार्थितो भगवान् अत्यद्भुतं स्वकीयं रूपं दर्शयिष्यन् साव
धानत्वसंपादनेनार्जुनमभिमुखीकरोति पश्य मे इति हे पार्थ
मे मम शतशः अथ सहस्रशः नानाविधान्यनेकप्रकाराणि
दिवि भवानि दिव्यानि अप्राकृतानि वर्तन्तः नानावर्णाकृतीनि
नानाविधानि लक्षणानि नीलपीतप्रकारा वर्णास्तथा आकृतय
अवयवसंस्थानविशेषा येषां रूपाणां तानि नानावर्णाकृतीनि
पश्य ५

स्पष्टार्थोयं श्लोकः ५ ॥ रत्नावीरसमिंद्दोयिनी ॥

५ ॥ मधुभाष्य

भाष्य अनुवाद

तब ऐसी प्रार्थना अर्जुनने किया तब भगवान श्रीकृष्ण अपने रूप देखावने का मनोरथ करके अर्जुन को सावधान होउ यह कहिक रि चारि श्लोक से कहते हैं कि हे पार्थ अर्जुन अपरिमित नाना प्रका र के अलौकिक मेरे रूप देखो और वर्ण कहे शुक्ल कृष्ण आदि आ कृति कहे कर चरण अङ्ग सब यथा योग मेरा दिव्य रूप नाना वर्ण नाना आकृति तुम देखो जो देखा चाहते हो ५

दोहा

मोरे पार्थ रूप कहं शत सहस्र ं देष बहु विधनके दिव्य बहुव र्ण प्रकार विशेष ५

16

पश्यादित्यान् वसून्रुद्रानश्विनौ मरुतस्तथा
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ६

शाङ्करभाष्यटीका· १

पश्यादित्यानिति पश्य आदित्यान् द्वादश वसूनष्टौ रुद्रानेकादशाश्विनौ द्वौ मरुतः सप्त सप्तगणा ये तान् तथा च बहून्यन्यान्यपि अदृष्टपूर्वाणि मनुष्यलोके त्वया त्वत्तोऽन्येन वा केनचित् पश्याश्चर्याणि रूपाण्यद्भुतानि भारत ६

आनन्दगिरिकृतटीका· २

दिव्यानि रूपाणि पश्येत्युक्ते तान्येव लेशतोऽनुक्रामति पश्यादित्यानिति तान् मरुतस्तथा पश्येति सम्बन्धः नानाविधानीत्युक्तं तदेव स्फुटयति बहूनीति अदृष्टपूर्वाणि पूर्वमदृष्टानि नानावर्णाकृतीनीत्युक्तं व्यनक्ति आश्चर्याणीति ६

स्वामिकृतटीका· ३

तान्येवाह पश्येति आदित्यादीन्मम देहे पश्य मरुत एकोनपंचाशद्देवविशेषाः अदृष्टपूर्वाणि त्वयान्येन वा पूर्वमदृष्टानि रूपाण्याश्चर्याण्यद्भुतानि ६

पैशाचभाष्यटीका· ४

स्पष्टार्थः ॥

रामानुजभाष्यटीका· ५

पश्येति ममैकैकस्मिन्रूपे पश्यादित्यान्द्वादश वसूनष्टौ रुद्रानेकादशाश्विनौ द्वौ मरुतश्चैकोनपंचाशतं प्रदर्शनार्थमिदमिह जगति प्रत्यक्षदृष्टानि शास्त्रदृष्टानि च यानि वस्तूनि च तानि सर्वाणि अन्यान्यपि सर्वेषु कालेषु सर्वैश्चादृष्टपूर्वाणि बहून्याश्चर्याणि पश्य ६

अभिनवगुप्तकृतटीका· ६

स्पष्टार्थं ॥ ६ ॥

परमार्थप्रपाटीका· ७

प्रपञ्चमेवाह पश्येति द्वादशादित्यान् अष्टवसून् द्वावश्विनौ प

श्री· गी· टी· ५

कोनपंचाशन्मरुतः तथा अपराणि अदृष्टपूर्वाणि पूर्वमदृष्टान्यत
एवाश्चर्यजनकानि स्वरूपाणीति पूर्वं प्रकृतं हि मनः हृष्यत्विति
हृतोति [illegible]

वनमाली टीका ८

दित्यानिरूपाणि पश्येत्युक्तानामेवानुक्रामति पश्येति पश्यादित्या
न्द्वादश वसूनष्टौ रुद्रानेकादश अश्विनौ द्वौ मरुत एकोनपंचाशत्
तथा अन्यानपि देवानित्यर्थः बहून्यन्यान्यदृष्टपूर्वाणि पूर्वमदृष्टानि
मनुष्यलोके मया त्वया मेन वा कदाचित् न दृष्टानीत्यर्थः पश्याश्च
र्याण्यद्भुतानि आश्चर्यमयानि मदङ्गानि तत्रस्थितानि निहारिलोकस्थपा
लोकोऽस्य पश्येति भावः ६

[illegible]मवैजयन्तीटीका· ४

स्वदेहस्थानि नानैव रूपाण्याह द्वाभ्याम् पश्यादित्यानिति आदित्या
नदितेः पुत्रान् द्वादश सूर्यानिति स्पष्टमुख्यत्वाद्दिक्पालांश्च वसू
नष्टौ रुद्रानेकादश अश्विनौ द्वौ नासत्यौ मरुतः एकोनपंचाशद्भूत
न ममैकस्मिन्नेव देहे समवेतेन समन्वयः तेषां समावधानतयाव
लोकय तथा तथा हे भारत अदृष्टपूर्वाणि [illegible]
वेमितः प्राक्कालेन दृष्टानि नतु त्रिविक्रमावतारे सभादिभिर्वैजेत्कल्मा
ग्रायशोदया सभायां उद्योगपर्वणि दिमि अदृष्टानि कथमदृष्टपूर्वाणि
किल वर्तते इति चेत्सत्यं तेषां भयोमाहनाय मोहनाय च किं विश्वका
रकं परिच्छिन्नं तत्र रूपमधुना तेन दर्शितमिदानीं तथासमस्तप्रकारका
णि परिच्छिन्नानि तथा दृष्टान्यानि सकलानि तेन दितेरस्येषु लादिभिः
स्मृतैः केचित्पि दृष्टपूर्वाणि न भवंत्यतो मदुक्तिः संगच्छते एवमना
संभवेनि वा चाय अदृष्टपूर्वं तमेव दृष्यति बहून्यनन्तान्याश्चर्या
ण्यद्भुतानि तेरस्मैवी आश्चर्याणि कानि विदृष्टान्यपि बहून्याश्चर्याणि
तेन दृष्टानि एवं भूतानि रूपाणि मन्मयानेन मदनुग्रहभाजनत्वमेव
पश्य महत्पदर्शनार्हो भवेत्यर्थः ६

दित्यानिरूपाणि पश्येत्युक्तानामेवानुक्रामति द्वाभ्यां

मधुसूदनी टीका· १०

पश्यादित्यान्द्वादश वसूनष्टौ रुद्रानेकादश अश्विनौ द्वौ मरुतः स

मरुसप्तकाएकोनपंचाशत् तथान्यानपिदेवानितिशेषः बहून्यमा
नि अदृष्टपूर्वाणिपूर्वमदृष्टानिमनुष्यलोकेत्वयात्वत्तोन्येनवाके
नचित् पश्याश्चर्याण्यद्भुतानि हेभारत अथशतशोथसहस्रशः
नानाविधानीत्यस्यविवरणंबहूनीति आदित्यानित्यादिच अदृष्ट
पूर्वाणीतिदिव्यानीत्यस्य आश्चर्याणीतिनानावर्णाकृतीनीत्यस्य
तिदृष्टव्यं [illegible]
[illegible] ॥

मदानेदीटीका· ११

पश्येत्यत्र्क्रोशतोह्यभ्यंतामनुक्रामतीश्वरः पश्यत्वंद्वादशादित्या
न्वसूनष्टावश्विनावुभौ रुद्रानेकादशैकोनपंचाशन्मरुतस्तथा
तथान्यानपिदेवांस्त्वमदृष्टपूर्वान्हेभवार्जुन २ बहूनिप्रागदृष्टानित्व
यावान्येनकेनचित् अद्भुतैकरूपाणिपश्यभारतभूषण ६

नीलकंठीकाटी· १२

दिव्यानितावदाह पश्यादित्यानिति अदृष्टपूर्वाणिआश्चर्याणि
अद्भुतानिचवक्ष्येविपंचमस्त्रविषयत्वादीनि ६

आनंदीटीका

पाठक्रमभायांदृष्टपूर्वानादित्यादीन्पश्यएवमदृष्टपूर्वाणिपश्याश्चर्या
णिपश्य [illegible] ६॥

रामकंठीटीका स्पष्टार्थम् ६

लासिकी वल्लभीटीका एवंसामान्यतउक्त्वाविशेषतोनिर्दिशति॥

आदित्यादिग्रहणमुपलक्षणार्थम् येपूर्वंविभूतियोगेआदित्यादयो
व्याप्यत्वेनोक्ताः तानिदानींपश्यमहात्म्यात्माहात्म्यात् तथायान्यपि
बहून्यपरिमितान्यदृष्टपूर्वाणित्वयान्येनवाकेनचित्पूर्वमदृष्टान्या
श्चर्याण्यद्भुतानिचपश्य [illegible] ६॥

१ सामान्येनोपक्रम्यविशिष्टाण्युद्दिशमाह आदित्यान्द्वादशसंख्यान्देवविशेषांस्तथावसूनष्टसंख्यान्
रुद्रानेकादशसंख्यानश्विनौमरुतश्चैकोनपंचाशतंदेवविशेषान्पश्येतिप्राधान्याद्देवताग्रहणमुद्देशमात्रे
णसंक्षेपतआह एतानितावत्त्वयान्यैर्वालोकवासिनासतादृष्टानियान्यपिबहून्यपरिमेयान्यदृष्टपूर्वाणि
नकदाचिदालोकितानि आश्चर्याणितान्यपिसर्वाणिपश्य ६ ॥

पंचोलीटीका

किंच पश्येति हे भारत तथा आदित्यान्वसून्रुद्रान् अश्विनौ मरुत
पश्य बहून्यदृष्टपूर्वाणि आश्चर्याणि आश्चर्यकराणि पश्य ६

ररणबीरसमिद्बोधिनी ॥

अथ नानाविधानि दिव्यानि रूपाणि दर्शयति पश्येति भारत
पश्यादित्यानादित्यगणान्सूर्यलोकव्यापिनस्तथा रुद्रान्रुद्र
गणानंतरिक्षचरान्सोमलोकव्यापिनस्तथा च वसून्वसुगणा
न्भूलोकव्यापिनो मृत्युपादकान्पश्येत्येन नानुषंगः अश्विनौ सू
र्यचंद्रप्रतिरूपकावश्विनीसुतौ तथा मरुतो मरुद्गणान्वातरू
पानान्देवसंतकांश्च पश्य किंच बहूनीति बहून्यदृष्टपूर्वा
णि पूर्वं केनचिद्दृष्टानि यान्यपूर्वाद्भुतदर्शनान्यलौकिकचमत्का
रकानि मद्रूपाणि तान्यपि साक्षात्कुर्वित्यर्थः ६॥

मधुभाष्य

६॥

भाषा अनुवाद

अब सोई आप कहते हैं कि हे भारत सब आदित्य औ वसुगण रु
द्रगण तथा अश्विनीकुमार औ मरुतगण ये सकल देवता को
मेरी देह मे देखो और हे अर्जुन जो मेरा रूप न तुम ने न और
किसीने कभी देखा है ऐसा अद्भुत मेरा रूप देखो ६

दोहा

देखरवि वसु रुद्र कहं अश्विनि मरु मारुत सर्व अदृष्ट बहु देख
हुं आश्चर्य मय भारत ६॥

इहैकस्थंजगतकृत्स्नंपश्याद्यसचराचरं।
मम देहे गुडाकेशयच्चान्यद्द्रष्टुमिच्छसि ७

शाङ्करभाष्यटीका· १

नकेवलमेतावदेव इहैकस्थमिति इहे कस्थं एकस्मिन् स्थितं जगत कृत्स्नं समस्तं पश्याद्येदानींसचराचरं सह चरेणाचरेण वर्त्तते मम देहे गुडाकेश यच्चान्यज्जयपराजयादि यच्छंकसे यद्वा जयेम यदि वा नोजयेयुरिति यदवोचः तदपि द्रष्टुं यदीच्छसि ७

आनन्दगिरिकृतटीका· २

न केवलमादित्यवस्वाद्येव मद्रूपं त्वया द्रष्टुं शक्यं किन्तु समस्तं जगदपि मद्देहस्थं द्रष्टुमर्हसीत्याह नेत्यादिना सप्तमीद्वयं मिथः सम्बध्यते समासान्तर्गतापि सप्तमी तत्रैवानीता यदीच्छसि तर्हि इहैव पश्येति सम्बन्धः ७

स्वामिकृतटीका· ३

किंचेहेति तत्रतत्रपरिभ्रमतावर्षकोटिभिरपिद्रष्टुमशक्यं कृत्स्नमपि चराचरसहितंजगदिहास्मिन्ममदेहएवचयवद्रूपेणैकत्रैवस्थितंपश्याद्य नैवपश्यपश्यचान्यत् जगदाश्रयभूतंकारणस्वरूपंजगतस्त्वावस्थाविशेषादिकंजयपराजयादिकंच यदन्यत्द्रष्टुमिच्छसितत्सर्वंपश्य ७

पैशाचभाष्यटीका ४

इहममदेहेगुडाकानिद्रातस्याईश्वरःस्वामीगुडाकेशःजितनिद्रस्त्वं इः ७॥

रामानुजभाष्यटीका· ५

इहेति इहममैकस्मिन् देहेतत्राप्येकदेशस्थंसचराचरं कृत्स्नंजगत्पश्य यच्चान्यद्द्रष्टुमिच्छसि तदप्येकदेशएवपश्य ७

अभिनवगुप्तकृतटीका· ६

स्पष्टार्थो ७

परमार्थप्रपादीटीका· ७ यासौनाल्पीत्याह इहैकस्थइति॥

तान्यन्ते एवंदेश्यतःकालतोवाप्यपरिच्छिन्नत्वसमस्तविश्वस्वरूपपरतिरानमि इहपुरोवर्त्तिनिविराजेमामसर्वभूतानांतथावमस्तविश्वरूपनिदानमि

जं^ तिउक्तवात्मकलवीभूतेमत्रूप्याकृतिकेममदेहेकृत्स्नं सर्वंजगदेकस्थमेकत्रस्थितमग्राप्ययंनैवपश्यरूपेतदुक्तं पार्थोरणस्त्वहिभुजस्वरूपेद

श्री० गी० टी० प०

दर्शिदेहेविलंविश्वरूपं नविश्वरूपेदृष्टेशेरणस्यंयद्विश्वरूपस्यनिरा
नमेनदितियतः पूर्वंस्वशरीरांतर्मार्कंडेयमुनयेश्चानंतरंशरीरैक
देशेजननेमेविश्वरूपंदर्शितवान् ततःकुमारएकेपर्वणिकाम्यकव
नोपविष्टश्रीकृष्णसहितेयुधिष्ठिरंप्रतिमार्कंडेयेन ततःकदाचिन्मयाभ्र
मितस्मिन्संछिन्नेसर्वे न्यग्रोधंसुमहांतंवैनष्टावाधानराधिप उप
विष्टंतपर्यंकेपूर्णेंदुसदृशाननं फुल्लपद्मविशालाक्षंवालंश्रीवत्सला
छनं ततोवालेनतेनस्वसहसाविवृतेमुखे तस्मादहमवशोवक्त्रेदैवयो
गात्प्रवेशितः तत्रप्रविष्टस्तत्रावपश्यंनिखिलंजगत् यःसदेवो
मयादृष्टःपुरापद्मनिभेक्षणः सएषपुरुषव्याघ्रसंबंधीतेजनार्दनः
यस्यैववरदानेनस्मृतिर्नप्रजहातिमां दीर्घमायुश्चकौंतेयस्वच्छंद
मरणंचवै सएषकृष्णोवार्ष्णेयःपुराणपुरुषोत्तमः आस्तेहरिरचिंत्या
त्माक्रीडन्निवमहाभुजः तथाश्वमेधिकेपर्वणिपांडवराज्याभिषेका
नंतरंद्वारिकामभिगंतुंउत्तंकमुनेरुपदेशायभगवताविश्वरूपंदर्शितं
तद्विलंबभयात्किंचिल्लिखितं उत्तंकः अभिजानामिजगतःकर्तारं
त्वांजनार्दनयदित्वनुग्रहंकिंचित्त्वत्तोर्होहंजनार्दन द्रष्टुमिच्छामितेरूपं
मैश्वरंतन्निदर्शय वैशंपायनः ततःसतस्मैप्रीतात्मादर्शयामासतद्व
पुःशाश्वतंविश्वरूपंहिददृशेयद्धनंजयेनइति भागवतेपि सातत्रद
दृशेविश्वंजगत्स्थास्नुचखंदिशः साद्रिद्वीपाब्धिभूगोलंसवाय्वग्नीं
दुतारकमिति एवंसति किंपुनःसकलदेहस्यार्थः अथकिंपुनर्भूत
जातमिहस्मा यंति यत्रामतकाराशीभूतंब्रह्मादिदेवता विशेषा।
दिकेवाहदृष्टुमिच्छसितदपिपश्येत्यर्थः अथशतशोथसहस्रशश्च
श्रुतिरपि सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् भूमिंविश्वतो
वृत्वात्यतिष्ठद्दशांगुलमिति भाष्यं सहस्रशीर्षेतिषोडशर्चस्य
नारायणोनामऋषिः अंत्यात्रिष्टुप् शेषाअनुष्टुभः पुरुषोदेवता
इति सर्वानुक्रमः तत्रप्रथमासहस्रशीर्षे
तिसर्वप्राणिनांसमष्टिरूपोब्रह्मांडदेहोविराडाख्योयः पुरुषःसोयंस
हस्रशीर्षा सहस्रशब्दस्योपलक्षणत्वादनंतैःशीर्षैरितिभिः युक्त इत्यर्थः यानि
याम्येवतिसहस्रशीर्षत्वं एवंसहस्राक्षत्वंसहस्रपात्त्वंच सपुरुषः।

भूमिब्रह्माण्डगोलरूपां विश्वतः सर्वतो हृतामपि विश्वादशां
गुलपरिमितेदेशेऽयमतिष्ठत् अतिक्रम्यव्यवस्थितः दशांगुलमि
त्युपलक्षणं तेन ब्रह्मांडाद्बहिरपि सर्वतो व्याप्यावस्थित इत्यर्थः
यद्वा सप्तम्यावृत्तिके प्राणापानेदशप्राणावायवदशांगुलानीति
केचित् १

वनमालीटीका ८

न केवलमेतावदेव समस्तं जगदपि मद्देहे संद्रष्टुमर्हसीत्याह
इहेति इहास्मिन्मद्देहे एकस्थमेकस्मिन्नेव यत्र कुत्रचिदवय
वे स्थितं कृत्स्नं समस्तं जगच्चराचरं जंगमस्थावरसंहितं तत्रत
त्र परिभ्रमता वर्षकोटिसहस्रैरपि द्रष्टुमशक्यं अद्याधुनैव
पश्य हे गुडाकेश आलस्यशून्य यच्चान्यज्जयपराजयादिकं द्रष्टु
मिच्छसि तदपि संदेहोच्छेदाय पश्य १

कृसमवैजयन्तीटीका ९

किंच हे गुडाकेश जितनिद्र मम सर्वेश्वरस्येह त्वं द्रष्टुमेकस्मिन्ने
व देहे शरीरे एकस्थं तत्रापि एकदेशे स्थितं सचराचरं जंगमस्थावरं स
हितं कृत्स्नं समस्तं जगद्विश्वं तन्नामकं अद्याधुनैव त्वं पश्य यत्र त
त्र कर्मपारवश्येन परिभ्रमता तांस्तान्देशान् गच्छता नवतापि त्वया पु
नःपुनर्वर्षैरपि द्रष्टुमशक्यं तदेवैकत्रैव मद्देहे यदन्यदपि वाव
लोकयेत्यर्थः च पुनः प्रकालस्वभावप्रकृतिमहदहंकारादिकं
जगत्कारणरूपं ब्रह्मेशमरीच्यादिप्रजापतिरूपं च तद्देशलो
कात्मककर्माणं च श्रमदशाकृते यद्वस्तु तदपि यद्द्रष्टुमिच्छसि त
न्नस्तं वै त्वं पश्य हृदमिस्यमितीयतावच्छेदेन धारयितुमशक्यम
पि मत्कायेऽवमवलोकयेत्यर्थः १

मधुसूदनीटीका १० जगदपि मद्देहे संद्रष्टुमर्हसी

न केवलमेतावदेव समस्तं
त्याह – इहास्मिन्मद्देहे एकस्थमेकस्मिन्नेवावयवरूपेण स्थितं जगत्
कृत्स्नं समस्तं सचराचरं जंगमस्थावरसहितं तत्र तत्र परिभ्रम
ता वर्षकोटिसहस्रेणापि द्रष्टुमशक्यं अद्याधुनैव पश्य हे गुड
केश यच्चान्यज्जयपराजयादि यत्शंकसे यद्वा जयेम यदि
वा नो जयेयुरिति यदवोचस्तदपि द्रष्टुं यदीच्छसि तदपि संदेहे

ऋेदायपश्य [illegible] ॥ ७ ॥

सदानंदी टीका ॥ ११ ॥

हेममास्मिञ्छरीरे यथैकस्मिन्सकलं जगत् एकावयवरूपेण स्थितं सम्याक्तं गमं वर्षकोटिसहस्रेण भ्रमता तत्र तत्र च म शक्यं दृष्टुमधुनेतत्पश्य जितनिद्रक २ जयाजयादिकं यद्य न्यदिगर्यं दृष्टुमिच्छसि पश्य संदेहनाशाय तत्सर्वं मच्छरीरे ३ । ७

नीलकंठीटीका ॥ १२ ॥

हेगुडाकेशजितनिद्र इहममदेहे एकस्थं एकस्मिन्नेवावय वेन लोमात्रेऽस्थितं कृत्स्नं वर्तमानं जगत्पश्य यच्चान्यत् अतीतमनागतं विप्रकृष्टं व्यवहितं स्थूलं सूक्ष्मं वा तत्सर्वमि हपश्य ७

अहदृष्टपूर्वाणिपवाह्न— एवंसामान्यतः श्लोकेपिपद्मान्यदिति तदुर्योधनादीन्मयापूर्वमेव हतानित्यर्थः [illegible] ॥

रामकंठीटीका

[illegible] हमाइ आदि [illegible]

किंबहुनेहममसंबंधिनिदेहे एकस्मिन्नेवरूपे एकत्र

स्थितं कृत्स्नमखिलं चराचररूपत्वात्मंत्रयेणादिप्रकारं यद्यदन्य
किंचिद्यथाभिलषितं द्रष्टुमभिवांछसि तदप्येकस्थमेव पश्यैतस्मिन्नेक
स्मिन्नेव परमार्थसतः परमकारणस्य स्वमायाध्यारोपावभासितानेक
नानात्वाभिन्नभावात्मकत्वमिदमत्यद्भुतं पश्येत्यत्रतात्पर्यं [illegible]
[illegible] ७॥

लासिकी [illegible]टीका

किंच — हे गुडाकेश अद्यानुभावयिष्यामीत्याह इहेति मम स्वरूपस्य देहे स्वरूपे चराचरं स्थावर
जंगमादि चेतनमेदमिनेकत्वेन वर्षकोटिभिरपि द्रष्टुमशक्यं जगदिदं ता
वदीभूतं जडज्ञानम् अयमत्र प्रसादेनैकस्थमेकत्वेन मय्यभेदेन स्थितं
विश्वान्तं पश्य एकेत्यत्र भावो विवक्षितः एकेया[illegible]द्विवचनैकवचनेरति
वत् यच्चान्यज्जगतो वस्थाविशेषादिकं जयपराजयादिकं च द्रष्टुमिच्छसि
तदपि सर्वं संदेहोच्छेदाय पश्य [illegible] ७

पचोलीटीका

न केवलमेतावदेव च किंच इहेति हे गुडाकेश इह मम देहे अ-
द्यापि नैव कृत्स्नं समग्रं चराचरं चरेणाचरेण सह वर्तमानः इति
सचराचरं स्थावरजंगमं एकस्थं जगत्पश्य यच्चान्यदपि जयपरा
जयादिकं द्रष्टुं ज्ञातुमिच्छसि तदपि पश्य ७

रणवीरसमिद्धोधिनी

न केवलमेतावदेव मत्स्वरूपमपि विन्त्यादृ इहैकस्थमिति अत्र
गुडाकेशेति संबोधनं लोकजितविवेकित्वद्योतनार्थं अहाऽस्मिन्मम
देहे भौतिके रूपावतारे यदेतस्मिन्नेव काले सचराचरं कृत्स्नं सर्वं
जगद्रूपप्रपंचजातं यन्न दृष्टं कस्यमेकत्र स्थितं पश्य मद्देहान्तःस्थितं प-
श्येत्यर्थः किंच यद्यदि अन्यच्च रूपान्तरं द्रष्टुमिच्छसि तदपि प-
श्येति वाक्यशेषः ७॥

भाषा अनुवाद

और इस ब्रह्माण्ड के बीच हर एक स्थानोमे भ्रमण करते हुये जो सूर्य चन्द्र ग्रह नक्षत्रादि समस्त चराचर जिन को कोटि वर्ष मे भी कोई नहीं देखि सके है सो सब स्थावर जङ्गम समेत सम्पूर्ण जगत इस मेरी शरीर मे अवयव करके अङ्ग रूप देखो और हे गुडा केश अर्जुन जगत का आश्रय औ संसार की अवस्था तथा जय पराजय आदिजो कछु और देखा चाहो सो सब मेरे रूप मे देखो ७

दोहा

इहां एकठा सभ जगत देष चराचर याह पार्थ अब मम देह म
हिं जो औरहि देषन चाह ७॥

न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा । दि-
व्यं ददामि ते चक्षुः पश्य मे योगमैश्वरं ८ ॥

शाङ्करभाष्यटीका १

किन्तु न तु मामिति । न तु मां शक्यसे न स्वकीयेन चक्षुषा मां विश्वरूपधरं शक्यसे द्रष्टुमनेन प्राकृतेन स्वचक्षुषा स्वकीयेन चक्षुषा येन तु शक्यसे द्रष्टुं दिव्येन तद्दिव्यं ददामि ते तुभ्यं चक्षुस्तेन पश्य मे मम योगमैश्वरं ईश्वरस्य ममैश्वरं योगं योगशक्त्यतिशयमित्यर्थः ८

आनन्दगिरिकृतटीका २

मन्यसे यदीत्युक्तमनुवदति किन्त्विति सप्रपञ्चमनवच्छिन्नं मां स्वचक्षुषा न शक्नोषि द्रष्टुमित्याह न त्विति कथं तर्हि त्वां द्रष्टुं शक्नुयामित्याशंक्याह येनेति दिव्यस्य चक्षुषो वक्ष्यमाणयोगशक्त्यतिशयदर्शने विनियोगं दर्शयति तेनेति ८

स्वामिकृतटीका ३

यदुक्तमर्जुनेन मन्यसे यदि तच्छक्यमिति तत्राह न त्विति अनेनैव तु स्वीयेन चर्मचक्षुषा मां द्रष्टुं न शक्यसे शक्तो न भविष्यसि अतोऽहं दिव्यमलौकिकं ज्ञानात्मकं चक्षुस्तुभ्यं ददामि मे ममैश्वरमसाधारणं योगं युक्तिमघटितघटनासामर्थ्यं पश्य ८

पैशाचभाष्यटीका ४

स्पष्टार्थं

रामानुजभाष्यटीका ५

न तु मामिति अहं मम देहैकदेशे सर्वं जगद्दर्शयिष्यामीति त्वं त्वनेन नियमेन परिमितग्राहिणा प्राकृतेन स्वचक्षुषा मां तथाभूतं सकलेतरविसजातीयमपरिमेयं द्रष्टुं न शक्यसे तव दिव्यमप्राकृतं मम दर्शनसाधनं चक्षुर्ददामि पश्य मे योगमैश्वरं ममासाधारणं योगं पश्य मम ज्ञानादियोगमनन्तविभूतियोगं च पश्येत्यर्थः ८

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ८ ॥ ॥ ॥ १

श्रेष्ठेतादृग्भूतरूपदर्शनेचर्मचक्षुषां कथं स्यादित्याह नत्विति मां ते
नवर्तमानेनस्वचक्षुषामेवेश्वरमलौकिकंरूपंद्रष्टुंनशक्यसेतर्हि
त्वम्मदर्मतथामीदिव्यंसत्त्वाकारान्तःकरणवृत्तिसदृक्तत्त्वानात्म
केचक्षुर्ददामिततःपश्य[illegible]यांजनसंस्कारेणातीन्द्रियमपिनिधानं
दृश्यतेतथैवेमर्थः दैवीसहकृतांजनदिव्यदृष्टिरितिपूर्वमेवोक्ते दि
व्याणिकाश्चपि देवकीतनयसेवकोहतेयेमवागपिमनोविनोद
नः श्रेजनंभवतियंजलोचनस्तदृशोगीतिनिधानसाधनइति त
डके यावत्त्वंविश्वरूपंनिजवपुषिपरेदृष्टवान्समसाचीतावत्त
स्यात्मभावस्थितइहभगवान् दिव्यदृष्टिस्ततोऽभूत् नायमप्रहिस्व - - - - - - - -
रूपेरथगतःवमपरंचार्जुनस्तद्दि - - - - - - - - - - - - स्यामितिए
- - - - उत्तमयियः - - - - - - - - - - - - - -
वमेवामेरपिदिव्यदृष्टिदानपूर्वकंकृष्णदेहावयवेषुविश्वरूपंद
ष्टुमिमस्योगपर्वणिपाण्डवदौत्येनकौरवसभांप्रतिभगवद्यानेष्वा
र्तराष्ट्रमप्यभा
के विदुरेणैवमुक्तेनकेशवःपरवीरहादुर्योधनंधार्तराष्ट्रं परिभूय
घ्नतवीर्यावानेकोऽहमितियन्मोहात्मममसेमोह्यायन परिभूय
वद्धुंहेदहीतेमांचिकीर्षसि इहैवपांडवाःसर्वेतथैवांधकवृष्णय
यः इहादित्याश्चरुद्राश्चतथैवचमहर्षयः एवमुक्त्वाजहासोच्चैःकेश
वःपरवीरहा तस्यासात्स्मयतःशौरेर्विद्युद्रूपामहात्मनः अंगुष्ठमा
त्रास्त्रिदशामुमुचुःपावकार्चिषः तस्यब्रह्माललाटस्थोरुद्रोवक्षसि
चाभवत् प्रादुरासंस्तथादोर्भ्यांसंकर्षणधनंजयौ भीमोयुधिष्ठिरश्चैव
माद्रीपुत्रौचपृष्ठतः अंधकावृष्णयश्चैवप्रद्युम्नप्रमुखास्तथा अग्रवि
र्वभूवुःकृष्णस्यायुधान्युद्यतमहायुधा[illegible]ः शंखचक्रगदाशक्तिःशा
र्ङ्गलांगूलनंदकौ अदृश्यन्तायुधान्येवसर्वप्रहरणानिच नानावा
हुषुकृष्णस्यदीप्यमानानिसर्वशः नेत्राभ्यांनस्ततस्तस्यश्रोत्राभ्यांच
सर्वतः प्रादुरासन्महारौद्राःसधूमाःपावकार्चिषः रोमकूपेषुचत
थासूर्यस्येवमरीचयः तंदृष्ट्वामहदाश्चर्यंकेशवस्यमहात्मनः न्यमी
लयतनेत्राणिराजानस्त्रस्तचेतसः ऋतेभीष्मंचद्रोणंचविदुरंसंजयं
चधनंधना प्रादात्तेषांसभगवान् दिव्यंचक्षुर्जनार्दनः नदृष्ट्वामहदा

स्वर्गमाधवस्य सभातले देवदुंदुभयो नेदुः पुष्पवर्षं पपात चेति

- -

- - - - - - - - - - - - - अथ प्रकृतमनुसरामः ८

वनमाली टीका ८

इंद्रियप्रवर्तकस्य मनसो ध्यगम्यस्य ममापरोक्षं मत्कृपां विना
न भवति मत्कृपया चाज्ञातायासेन भवतीत्याह न त्विति अनेनै
व प्राकृतेन मनुष्यसादृश्येन चर्मचक्षुषा मां दिव्यालौकिकानंतैश्व
र्यविशिष्टं द्रष्टुं न शक्यसे न शक्तोसि अतो दिव्यमप्राकृतं मम
दिव्यरूपदर्शनक्षमं ददामि ते तुभ्यं चक्षुस्तेन चक्षुषा पश्य मे यो
गमघटघटनासामर्थ्यातिशयमैश्वर्यमीश्वरस्य ममासाधारणं
यद्यपि यावद्धर्मविशिष्टं भगवद्रूपं स्वस्योपास्यं यज्ज्ञानानुमोत
स्तावद्धर्मविशिष्टरूपमर्जुनः सर्वदा साक्षात्करोति तथाप्यमि
तगुणालयस्य महेशस्य तात्विकमैश्वर्यमर्जुनेन भगवन्प्रार्थित
कृतं तद्देवायरातितोज्ञातपूर्वं तस्यानेन चक्षुषा द्रष्टुमशक्य
तादृशैश्वर्यदर्शनयोग्यभगवत्प्रसादस्याभावात् यथा यथा
हि भगवत्प्रसादाधिक्यं तथा तथा तादृगाधिकैश्वर्यस्य ज्ञानं नायमा
त्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन यमेवैष वृणुते तेन
लभ्य इति श्रुतेरिति भावः ८

सूक्ष्मवैजयन्तीटीका ९

मन्यसे यदि तच्छक्यमित्यर्जुनप्रार्थितं संपादितुं स्वस्याप्राकृत
रूपदर्शनयोग्यं दिव्यं चक्षुः स्वस्मै स्वयमेव ददावित्याह न तु मा
मिति अनेनैव प्राकृतरूपग्राहिणा प्राकृतेन स्वचक्षुषा स्व
कीयेन चर्मचक्षुषा माममपरिमेयगुणगणपदद्वयगतानंतब्रह्मां
ण्डं सुधाम्भः सकलेतरविसजातीयमत्यद्भुतरूपं द्रष्टुं न शक्य
से न शक्नोषि समर्थो न भविष्यसीत्यर्थः अतस्ते तुभ्यं दिव्यमप्रा
कृतं मद्दर्शनसाधनभूतं चक्षुर्ददामि यथाहं निरतिशयप्रभा
क्रांतमात्मानं त्वमनभिन्नतथैव त्वत्तत्त्वरूपितं दर्शनक्षमं ददामी
त्यर्थः मेममसर्वेश्वरस्येश्वरं योगमसाधारणमनंतज्ञानादि

योगमनेनविभूतियोगंचपश्ययद्वायुज्यतेऽनेनेतियुज्यतेयोगोह
पेपरमंरूपमैश्वरमितिवक्ष्यमाणात् मद्दत्तेनैवदिव्येनचक्षुषाम
मैश्वरंरूपंपश्येत्यर्थः नतुयथार्जुनस्यभगवतादिव्यंचक्षुर्दत्तंदैवेनत
थामतोपिदिव्यमदादितिचेन्नतस्यतद्रूपेणयुक्तस्यदर्शनादस्यथा
तदेवमेदृशंदेवरूपं किरीटिनंगदिनंचक्रहस्तमिच्छामित्वांद्र
ष्टुमहंतेनैवरूपेणचतुर्भुजेनसहस्रबाहोभवमादिवक्ष्यमाण
स्यैवपर्यायापत्तेः नचपार्थसारथिरूपात्सहस्रशिरसोविश्वरूप
स्याधिकंभवेद्दृष्टिप्रदानरूपलिङ्गादितिवाच्यंतस्यैवद
वाकारस्यद्विभुजत्वचतुर्भुजादिनराकाराधीनत्वात्निरतिशय
तेजःप्रभावेवासंक्रान्तेसहस्रशीर्षरूपेनिरतिशयतेजःप्रभा
वेनासंक्रान्तेवद्दृष्टिग्राहिणीयुक्तानत्वतिसौन्दर्यलावण्यमाधु
र्यादिगुणगणार्णवनराकृतिकस्वरूपानुभावविनीदृष्टिस्तत्रग्राहि
णीभवेदतस्तस्मात्तस्याभिन्नत्वेनाधिकत्वंनास्त्येवयथासहस्रशी
र्षोविचित्रविश्वरूपस्यसर्वपरत्वंतथैववसुदेवसूनोःपार्थसार
थेरपिश्रूयतेतथाहिसच्चिदानन्दरूपायकृष्णायाक्लिष्टकारिणे
नमोवेदान्तवेद्यायगुरवेबुद्धिसाक्षिणे कृष्णोवैपरमंदैवतमेको
वशीसर्वगःकृष्णईड्यएकोऽपिसन् बहुधायोविभाति ईश्वरःप
रमःकृष्णःसच्चिदानन्दविग्रहः अनादिरादिर्गोविन्दःसर्वकारणं
अत्रापिस्वयमेवोक्तंमत्तःपरतरंनान्यत्किंचिदस्तिधनंजय अहंस
र्वस्यप्रभवोमत्तःसर्वंप्रवर्ततेमयिसर्वमिदंप्रोतं अहमादिर्हिदेवा
नाम् अर्जुनेनाप्युक्तंपरंब्रह्मपरंधामपवित्रंपरमंभवानित्यादिश्रु
तिस्मृतिसंधानप्रमाणानिसंतितस्मादुभयोरूपयोरधिकन्यून
तामन्वानाएवयुक्त्याभासेनवदंतिनततत्वतारस्पतेकृतंनिरासः
द

यत्त्वंमन्यसेयदितच्छक्यंमया द्रष्टुमितितत्रविशेषमाह॥

अनेनैवप्राकृतेनस्वचक्षुषास्वभावसिद्धेनचक्षुषामांदिव्यरूपद्र
ष्टुंनतुशक्यसेनशक्नोषिप्रवाक्येशक्यसेइतिपाठेशक्तोनभवि
ष्यसीत्यर्थः सौवादिकस्यापिशकोतेः दैवादिकःशनच्छादसमर
तिवा दिवादौपाठोवेमेवमाप्रशस्यधिकं तर्हिकेनाहंद्रष्टुंशक्य
यामतआह दिव्यमप्राकृतंममदिव्यरूपदर्शनक्षमंददामिते·

तुभ्यं चक्षुः तेन दिव्येन चक्षुषा पश्य मे योगं घटनाघटनासामर्थ्या
तिशयं मे ऐश्वरम् ईश्वरस्य ममासाधारणम्

महानेदीटीका · ११

अनेन प्राकृतेन तु अनेन शक्नोषि स्वचक्षुषा दिव्यं विश्वात्मकं द्रष्टुं स
र्वार्थदर्शिसमर्थं हि मो । ददामि प्राकृते चक्षुः त्वमेयदिव्यदर्शने दिव्ये
न चक्षुषा तेन महामायाश्रयं परं ममासाधारणं रूपं पश्य त्वं बाहु
तोपमं १८

नीलकंठीकाटीका · १२

यत्त्वं कं मन्यसे यदि तच्छक्यं मया द्रष्टुमिति तत्राह नत्विति शक्यसे
शक्नोषि पदविकरणव्यत्ययश्चार्षः अनेन प्राकृतेन दिव्यं समा
कृते ऐश्वरं ईश्वरसंबंधिनं योगं विश्वाश्रयत्वलक्षणं सामर्थ्यं ८

मन्यसे यदि तच्छक्यमिति यदुक्तं त

आनंदीटीका

आह— अनेनैव मर्त्यजन्मनातत्रपरिमितदर्शिना चक्षुषा ऐश्वरं योगमी
श्वरस्य फक्तिमविंत वरन् तां पश्य तथा च स्तुते निरुपादानसंभा
रमभित्तावेव तन्वते जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने इति
अथ च दर्पणमाने स्मिन्नेक तनसंचेममैश्वर्यं योगमेवं पश्य

८ ॥

रामकंठीटीका

अतएवात्मकृतत्वादस्यार्थस्य ॥

अनेनैव मर्त्यभावात्परिमितदर्शिनैव चक्षुषा गोलकापिधानयातक
ल्पनाप्युन मां प्रदर्शयिष्यमाणा गाथा च यं रूपं द्रष्टुमालोकयितुं न शक्
नोषि न त्वमोभविष्यसि तो दिव्यं सर्वदर्शि शक्तियोगात्परमात्मरूपपर
माकाशभवं प्रकृष्टज्ञानात्मकं चक्षुस्ते ददामि ते पारमैश्वर्यात्स्वशक्त्या
निश्रयत्नस्यैवाविर्भावयेयम् तेन ममैश्वरमीश्वरस्य संबन्धि प्रदर्शा
यिष्यमाणं रूपं पश्यन्नानाविद्रूपयेति

८॥

लासिकी टीका

किंच तुःप्रतोनरे यथामांवसुदेवात्मजमनेनस्वचक्षुषापश्यामि तथा
मामीश्वरमनन्तलक्षणंद्रष्टुंसाक्षात्कर्तुमनेनैवचर्ममयेनस्वकीयेनच
क्षुषानशक्नोसि अतोहेतोर्दिव्यंलोकोत्तरंचक्षुरिवचक्षुर्मदीयेश्वररूपसा
क्षात्कारक्रियाकारणंज्ञानंचक्षुस्तेतुभ्यंददामितेनैवममैश्वरंयोगं म
हात्म्यातिसहितंममाधानेपश्यसाक्षात्कुरु ... ८

पंचोलीटीका

विद्यमानचक्षुषाअनधिकारित्वंदर्शयन्चक्षुरंतरंदातुंप्रतिजा
नीते नत्विति तुपुनः मांविश्वरूपमनेनप्राकृतेनचक्षुषाद्रष्टुंना
शक्यसेनशक्नोषितेतुभ्यंदिव्यंचक्षुषीददामियेनदिव्येनचक्षुषा
द्रष्टुंशक्नोषिमेममपेश्वरसंबंधिनंयोगंशक्त्यतिशयंपश्य ८

श्रीवीरसमिद्धोधिनी ॥

ननु किंपुनर्मद्रूपंचर्महतेनचक्षुषैवद्रष्टव्यंभवेदित्यतआह
नत्विति तुशब्दो विशेषद्योतकः यथामांमत्स्वरूपंद्रष्टुमनेनैव
चक्षुषानशक्यसे तस्मात दिव्यंचक्षुःप्रज्ञानात्मिकां दृष्टिं किं
ददामि येनसाधनभूतेनमेममैश्वरंयोगंपश्यसाक्षात्कुरुइ
त्यर्थः ८॥

मधुभाष्य

८॥

भाषा अनुवाद

और जो अर्जुन ने कहा कि वह रूप मेरे देखने योग्य होय तो दे
खावो इस पर कहते हैं कि हे अर्जुन इन अपने चर्म बल करके
चमड़े की आंखों से हमारे उस रूप को न देख सकोगे इस से ह
मतुम को अलौकिक दिव्य ज्ञानबल देते हैं सो मेरा ईश्वर रूप
अघटन घटना समर्थ्य दर्शन करो ८

दोहा

मोहि याकें नहि देषतें इन चक्षुन निज सेंह दिव्य नयन तोहि
देत हों मम ऐश्वरयोग लषेह ८

सञ्जय उवाच एवमुक्त्वा ततो राजन् महायोगेश्वरो हरिः दर्शयामास पार्थाय परमं रूपमैश्वरं ९

शाङ्करभाष्यटीका १

एवं ते यथोक्तप्रकारेणोक्त्वा ततोनन्तरं राजन् धृतराष्ट्र महात्मासो योगेश्वरेश्वरो हरिर्नारायणः दर्शयामास दर्शितवान् पार्थाय पृथासुताय परमं रूपं विश्वरूपमैश्वरं ९

आनन्दगिरिकृतटीका २

इमं वृत्तान्तं धृतराष्ट्राय सञ्जयो निवेदितवानित्याह सञ्जय इति मदीये विश्वरूपाख्ये रूपे न प्राकृतेन चक्षुषा निरीक्षितुं क्षमः किन्तु दिव्येन इत्यादि यथोक्तप्रकारः अनन्तरं दिव्यचक्षुषः प्रदानादिविशेषः हरत्यविद्यां सकार्यामिति हरिः यदीश्वरस्य मायोपहितस्य परममुत्कृष्टं रूपं तद्दर्शयाम्बभूवेत्याह परममिति ९

स्वामिकृतटीका ३

एवमुक्त्वा भगवानर्जुनाय रूपं दर्शितवान् तद्रूपं दृष्ट्वार्जुनः श्रीकृष्णं विज्ञापितवानित्येतमर्थमेवमुक्त्वेत्यादिभिः षड्भिः श्लोकैः धृतराष्ट्रं प्रति सञ्जय उवाच एवमिति राजन् हे धृतराष्ट्र महात्मासो योगेश्वरश्च हरिः परमं ऐश्वरं रूपं दर्शितवान्

पैशाचभाष्यटीका ४

सञ्जय उवाच एवमुक्त्वेति राजन्निति धृतराष्ट्रस्य सम्बोधनं येनेयोगोविद्यन्तेयेषान्तेयोगाः महायोगानामीश्वरो हरिः ९

रामानुजभाष्यटीका ५

सञ्जय उवाच एवमिति एवमुक्त्वा सारथ्येवस्थितः पार्थमातुलजो महायोगेश्वरो हरिः महाश्चर्ययोगानामीश्वरः परब्रह्मभूतो नारायणः परमैश्वरं स्वासाधारणं रूपं पार्थाय पितृष्वसुः पृथायाः पुत्राय दर्शयामास ९

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ९

परमार्थप्रपाटीका ७

एवमुक्त्वा भगवानर्जुनाय रूपं दर्शितवान् तच्च रूपं दृष्ट्वार्जुनः श्रीकृ
ष्णं विज्ञापितवानितीमं वृत्तान्तं धृतराष्ट्रं प्रति संजय उवाच एवमुक्त्वेति
षड्भिः श्लोकैः भो राजन् धृतराष्ट्र महायोगेश्वरो हरिः महांतश्च ते योगेश्व
राश्च महायोगेश्वराः योगोद्भिर्जीवब्रह्मैक्यं तन्न ईश्वराः समर्थाः मुक्त्वा मदे
वयोज्ञबल्यानां तत्पलेशामपीश्वरः कृष्णः पार्थाय परमं पारमार्थिकं रूप
मैश्वरमघटनघटनापटीयो दर्शयामास ५

वनमालीटीका ८

भगवानर्जुनाय दिव्यं रूपं दर्शितवान् स च तद्दृष्ट्वा विस्मयाविष्टो भगवंतं
विज्ञापितवानितीमं वृत्तान्तमेवमुक्त्वेत्यादिभिः षड्भिः श्लोकैर्धृतराष्ट्रं प्र
त्याह संजयः एवं न तु मां शक्यसे द्रष्टुमित्याद्युक्त्वा दिव्यं चक्षुः प्रदानानं
तरं हे राजन्महान् जगदुदयादिकर्तृत्वेन सर्वान्तर्यामित्वेन सर्वोत्कृष्टश्चा
सौ योगेश्वरश्चेति महायोगेश्वरः योगानामघटघटनापटीयो नेतृशक्तीना
मीश्वरो भक्तानां सर्वक्लेशापहारी दर्शनायोग्यमपि रूपं यद्दर्शयामा
स पार्थायैकान्तभक्ताय परमं दिव्यं रूपमैश्वरम् ५

ऊस्नमवैजयन्तीटीका ५

पार्थसारथिर्भगवान् पार्थमेवमेवोक्त्वानंतरं स्वकं रूपं दर्शितवान् तद्
रूपदर्शनेनार्जुनोत्पन्नविस्मयमनाभवत्तमेव विज्ञापितवानित्येवम
र्थं संजयो धृतराष्ट्रमब्रवीत् षड्भिः एवमुक्त्वेति ततो दिव्यचक्षुःप्रदाना
नंतरं हे राजन् धृतराष्ट्र महायोगिनां योगेश्वरो [illegible] महा
त्मासौ योगेश्वरश्च महतामप्यां [illegible] रूपाणां योगानां मदध्याधारण
रूपाणामनंतज्ञानादियोगरूपाणामनंतविभूतियोगरूपाणां चेश्वरो
नियतेतिवासः हरिः [illegible] कृष्णः परब्रह्मभूतः पार्थमातुलेयः श्रीकृष्णः पा
र्थरथ एवावस्थितस्तं एवमुक्तप्रकारेणाकाशमवत्तपविहासमिष
णात्मकदानवदाभिः किं तस्यमेव प्रोशयतो लोकेश्वरः पार्थाय पितृष
वेयाय परममिजाय परमं सर्वोत्कृष्टमैश्वरं स्वस्वाभाविकासाधारणरू
पं विविधविचित्रानन्ताविन्त्याखिलचेतनाचेतनात्मकविश्वाश्रयभूतं
विग्रहं दर्शयामास दर्शितवान् ५

मधुसूदनीटीका ९

एवं न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा दिव्यं ददामि ते चक्षुरिमि
त्युक्त्वा ततो दिव्यचक्षुःप्रदानादनंतरं हे राजन् धृतराष्ट्र स्थिरो भव श्रवण

भगवानर्जुनाय दिव्यं रूपं दर्शितवान् स च दृष्ट्वा विस्मयाविष्टो भगवंतं विज्ञापितवानितीमं वृत्तान्त
मेवमुक्त्वेत्यादिभिः षड्भिः श्लोकैः धृतराष्ट्रं प्रति संजय उवाच ॥

यमहात्मसर्वात्मकृष्णस्यासौ योगेश्वरश्चेति महायोगेश्वरो हरिः भक्तानां
सर्वक्लेशापहारी भगवान् दर्शनायोग्यमपि दर्शयामास पार्थाय
एकांतभक्ताय परमं दिव्यं रूपमैश्वरं [illegible]

सदानंदी टीका ११

समस्तास्वर्यनिलये समस्तैश्वर्यसंयुते भगवान्प्रार्थितो रूपं दर्शयामा
सार्जुनाय वै १ तद्दृष्ट्वा विस्मयाविष्टः स विज्ञापितवान्हरिं इतीमं सर्ववृ
त्तांतं धृतराष्ट्रं नृपं प्रति २ उवाच संजयः षड्भिः श्लोकैरैश्वर्यतत्परैः दि
व्यं ददामि ते चक्षुरेवमुक्त्वार्जुनं प्रति ३ सर्वात्मकोखिलयोगस्या
सौ परमेश्वरः दिव्यचक्षुः प्रदायादौ दर्शयामास तद्वपुः ४ भक्तक्ले
शहरः स्वामी दर्शनानर्हमप्यसौ दर्शयामास पार्थाय दिव्यं तत्पारमे
श्वरं ५ ९

नीलकंठीटीका १२

एवमुक्त्वा भगवानर्जुनाय दिव्यं रूपं दर्शितवान् स च दृष्ट्वा विस्म
याविष्टो भगवंतं विज्ञापितवानितीमं वृत्तांतमेवमुक्त्वेत्यादिष
ड्भिः श्लोकैर्धृतराष्ट्रं प्रति संजय उवाच एवमुक्त्वेत्यादि ततः दिव्यच
क्षुः प्रदानानंतरं राजन् हे धृतराष्ट्र महात्मा सौ योगेश्वरश्चेति वि
ग्रहः महतो योगस्य वा ईश्वरः परमं दिव्यं रूपं ऐश्वरं मायाविश
वेष्टितं तमायातीतं दर्शयामास ९

आनंदगिरीटीका स्पष्टार्थम् ९

रामकंठीटीका स्पष्टार्थम् ९ ९

अथ भगवता परमसमाधिनानि
रतिशयनिजरूपयोग्यतादानायार्जुनाय यथा उप
स्थिते तथैव सर्वं भगवद्व्यासमुनिप्रसादात्पादित
दिव्यचक्षुर्धृतराष्ट्राय प्रति
पादयितुं संजय उवाच ॥

+ अथ व्यासमुनिप्रसादाल्लब्धदिव्यदृष्टिर्हृ लासिकी [illegible]टीका

स्तिनः श्र
स्थितं धृत
राष्ट्रं प्रति
स्रजेनहत्तं
बोधयिष्य +

हे राजन् धृतराष्ट्र महान्सर्वज्ञात्मतयाखिलतनुर्यो योगस्तस्य सर्वस्य
तुमीश्वरः समर्थो हरिः श्रीकृष्णः एवं दिव्यं ददामि ते चक्षुरित्युक्त्वा ततः
प्रतिज्ञानंतरं पार्थायार्जुनेनमनुगृहीतं परमसमस्तात्मकं ऐश्वरं रूपं दर्शया
मास परमं तं प्रपुंजे पार्थस्य दृष्टतयात्मत्वेनैश्वरं रूपं ज्ञानविषयी चका
रेत्यर्थः तदैश्वरं रूपं त्रिधा एकमहंताच्छादितास्फुटेदंतामयमहमिदमि
ति यच्चुसदाशिवतत्त्वमितिनाम्नागमज्ञैरवादिभिर्व्यवहृतम् द्वितीयं स्फु
टेदंताहंतासामानाधिकरण्यात्मकमिदमहमिति यत्नेश्वरतत्त्वमित्युक्तं
तृतीयं समस्तं तत्त्वापुरस्थायेनाहमिदं धियोः सामानाधिकरण्यंत

गीं टीं प

त्यवलंसुहविधायप्यमिति ॥ ९ ॥

पंचोलीटीका

एवमुक्त्वा भगवानर्जुनाय यत्स्वरूपं दर्शितवान तत्स्वरूपं याद्दशं हृष्टमर्जुनेन तादृशं धृतराष्ट्रं प्रति संजयः एवमुक्त्वेत्यादिभि षड्भिः श्लोकैः प्रतिपादयति एवमितिहेराजन् महायोगेश्वरः महांश्वासौयोगेश्वरश्च महायोगेश्वरोहरिः एवं पूर्वोक्तेनप्रकारेण उक्त्वाततः अनंतरं पार्थायार्जुनाय परमं पेश्वरं रूपं दर्शयामास ९

रणवीरसमिद्धोधिनी ॥

एवं भगवतार्जुनं प्रति परदनुग्रहलक्षणं वचनं यथोपदिष्टंतत्तथैव धृतराष्ट्रं प्रति संजयउवाच एवमुक्त्वेति निगदव्याख्यातमेतत्श्लोकत्रयं ९॥

मधुभाष्य

समर्थस्येत्यादिवाभिधानं हरिः सर्वयज्ञादिभागहारित्वात् यज्ञोपहृतं गोदेवुहरेभागंक्रतवश्च वर्णेभेदहरितः श्रेष्ठस्तस्माद्धरिरितिस्मृतः अनिमोक्षधर्मे सर्वाश्चर्यमयं सर्वाश्चर्यात्मकं सहस्र

भाषा अनुवाद

इस प्रकार से कहिकर भगवान ने अर्ज्जुन को अपना विराट रूप देखाया तो वह रूप देखि अर्ज्जुन श्रीकृष्ण को जैसा जाना औ देखा सोई छः श्लोक से राजा धृतराष्ट्र के प्रति सञ्जय कहते हैं कि हे राजन् धृतराष्ट्र महात्मा श्रीकृष्ण योगेश्वरने अर्ज्जुन से ये स बातें करके अपना ऐश्वर्य विशिष्ट परम रूप अर्ज्जुन को दर्शन कराया ९

दोहा

ऐसें कहि फिर नृप महायोगेश्वर हरि सोय परम रूप ऐश्वर तवै
दर्शाह्यो पार्थकोय ९

अनेकवक्त्रनयनमनेकाद्भुतदर्शनं अनेकदिव्याभरणं दिव्यानेकोद्यतायुधं ॥१०॥

शाङ्करभाष्यटीका॥ १

अनेकेति अनेकवक्त्रनयनं अनेकानि वक्त्राणि नयनानि च यस्मिन् रूपे तदनेकवक्त्रनयनं अनेकाद्भुतदर्शनं अनेकान्यद्भुतानि विस्मापकानि दर्शनानि यस्मिन् रूपे तदनेकाद्भुतदर्शनं रूपं तथानेकदिव्याभरणं अनेकानि दिव्याभरणानि यस्मिंस्तदनेकदिव्याभरणं तथा दिव्यानेकोद्यतायुधं दिव्यानि अनेकानि उद्यतानि आयुधानि यस्मिंस्तद्दिव्यानेकोद्यतायुधं दर्शयामासेति पूर्वेण सम्बन्धः ॥१०॥

आनन्दगिरिकृतटीका॥ २

तदेव रूपं विशिनष्टि अनेकेति दिव्यान्याभरणादीनि भूषणान्युद्यतानि उद्धृतानि ॥१०॥

स्वामिकृतटीका॥ ३

कथंभूतं तदित्याह — अनेकेति अनेकानि वक्त्राणि नयनानि च यस्मिंस्तत् अनेकानां अद्भुतानां दर्शनं यस्मिन् तत् अनेकानि दिव्याभरणानि यस्मिंस्तत् दिव्यान्यनेकानि उद्यतानि आयुधानि यस्मिंस्तत् ॥१०॥

पैशाचभाष्यटीका॥ ४

अनेकवक्त्रनयनं [illegible] अनेकानि वक्त्राणि नयनानि अनेकाद्भुतानां दर्शनमुपलब्धिर्यत्र रूपे तद्रूपमनेकाद्भुतदर्शनं दिव्यान्यनेकान्युद्यतानि आयुधानि यत्र रूपे तद्दिव्यानेकधाप्रविभक्तमेकस्थमपश्यदिति व्यवहितेन संबंधः ॥१०॥

रामानुजभाष्यटीका॥ ५

स्पष्टार्थः — अनेकेति [illegible]
[illegible]
[illegible] दिशयुगि
तमानतावाधानन्द्यः ४

अभिनवगुप्तकृतटीका॥ ६

स्पष्टार्थः ॥१०॥

परमार्थप्रपाटीका॥ ७

तत अनेकवक्त्रनयनमित्यादितः श्लोकद्वयं रूपवर्णनार्थं स्पष्टार्थं ॥१०॥

श्री·
गी टी·
८

तदेवं रूपं विशिनष्टि

[damaged] वनमाली टीका· ८

अनेकवक्त्राणि नयनानि च यस्मिन् रूपे अनेकेषामद्भुतानां विस्मयहेतूनां दर्शनं यस्मिन् अनेकानि दिव्यान्याभरणानि भूषणानि यस्मिन् दिव्यान्यनेकान्युद्यतान्यायुधान्यस्त्राणि यस्मिन् तथारूपम् ॥

ऊसमवैजयन्ती टीका· ९

तत्किमाकारकं रूपमित्यपेक्षायामाह अनेकवक्त्रनयनमिति अनेकवक्त्रनयने अत्रानेकसहस्रशब्दाः असंख्येयार्थवाचिनः विश्वतश्चक्षुरुत विश्वतोमुख इति श्रुतेः अनेकानि अपरिमितानि संख्यावच्छेदशून्यानि वक्त्राणि मुखानि नयनानि च तेऽपि च यस्य यस्मिन्वा तद्रूप अनेकाद्भुतदर्शनं अनेकानामसंख्येयानामद्भुतानामाश्चर्याणां दर्शनं यस्मिंस्तत्तथा अनेकदिव्याभरणं अनेकान्यसंख्येयानि दिव्यानि शोभमानानि आभरणानि मुकुटकुंडलकेयूरकटककौस्तुभकटिसूत्रहारनूपुरादीनि यस्मिंस्तत् दिव्यानेकायुधायुधम् दिव्यान्यस्मदुज्ज्वलान्यमोघान्यनेकान्यनंतान्यद्भुतानि सन्नद्धीकृतानि उद्यतानि आयुधानि वज्रचक्रधनुःपरशुगदाहलमुसलादीनि यस्मिंस्तत्तथा अत्रायुधशब्देनोपलक्षिताः शंखवेणुपाद्ययोर्वाद्यान्यप्यूहनीयानि तेषामपि सांग्रामिकत्वात् ॥

मधुसूदनी टीका· १०

अनेकानि वक्त्राणि नयनानि च यस्मिन् रूपे अनेकानामद्भुतानां विस्मयहेतूनां दर्शनं यस्मिन् अनेकानि दिव्यानि आभरणानि भूषणानि यस्मिन् दिव्यानि अनेकान्युद्यतानि आयुधान्यस्त्राणि यस्मिन् तत्तथारूपं ॥

सदानंदी टीका· ११

तदेवरूपं श्रीविश्वो विशिनष्टि समे नयाः यस्मिन्वक्त्राण्यनेकानि नेत्राणि तत्तथा वपुः १ अद्भुतानामनेकेषां यस्मिन् रूपे स्थिरदर्शनं यस्मिन्दिव्यान्यनेकानि भूषणानि च तत्तथा २ यस्मिन्दिव्यान्यनेकानि निर्मोद्यतान्यायुधानि तत् ॥

नीलकंठी टीका· १२

तदेवरूपं विशिनष्टि द्वाभ्यां अनेकेत्यादिना अनेकानि अनेकानि वक्त्राणि नयनानि च यस्मिन् तदनेकवक्त्रनयनं अनेकान्यद्भुता·

निदर्शनानियस्मिंस्तदनेकाद्भुतदर्शने अनेकानिदिव्याभाभ
रणानियस्मिन् दिव्यानिअनेकानिउद्यतानिआयुधानिवज्रा
दीनियस्मिन् १०

आनंदीटीका स्पष्टार्थम् १०

रामकंठीटीका स्पष्टार्थम् १०

तत्रकीदृशंतत्देश्वरंरूपमि लासिकी ~~वर्णनी~~टीका तिविशेषणद्वारेणसदाशिवतत्वास्फुटविषयातदैश्वरं

रूपंविशि नष्टि ॥ अनेकानिवक्त्राणिनयनानिचयस्मिंस्तत् अनेकवक्त्रनयनम्
अनेकानामद्भुतानांविस्मयहेतूनांदर्शनंयस्मिंस्तत् अनेकानिदि
व्यानिलोकोत्तराणिआभरणानिभूषणानियस्मिंस्तत् दिव्यान्यनेका
न्युद्यतानिआयुधानियस्मिंस्तत् [illegible] १०

पंचोलीटीका

कथंभूतंतदित्याह अनेकेति अनेकानिवक्त्राणिनयनानिचयस्मिन्
रूपेतदनेकवक्त्रनयनंअनेकानिअद्भुतानिविस्मयकानिदर्श-
नानियस्मिन्रूपेतदनेकाद्भुतदर्शनमनेकानिदिव्यान्याभरणा
नियस्मिन्रूपेतदनेकदिव्याभरणंदिव्यान्यनेकानिवज्रादीनि-
उद्यतानिआयुधानियस्मिन्रूपेतद्दिव्यानेकोद्यतायुधं १० ॥

रणवीरसमिद्धायिनी

स्पष्टः १० ॥

मधुभाष्य

१० ॥

32

भाषा अनुवाद

अब किस प्रकार का वह रूप है सो कहते हैं कि अनेक हैं वक्त्र कहे मुख औ नेत्र तथा अनेक अनेक हैं अद्भुत वस्तुवों का दर्शन जिसमे और अनेक दिव्य आभरण औ दिव्य अनेक आयुध धारण हैं जिसमे ऐसा रूप भगवान ने अर्जुन को देखाया ९

दोहा

मुख अनेक अरु नयन हूं अद्भुत दर्श अनेक भूषण दिव्य अनेक
सो आयुध दिव्य लसैं नेक १०

दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनं स
र्वाश्चर्यमयं देवमनन्तं विश्वतोमुखं ॥११॥

शाङ्करभाष्यटीका १

किञ्च दिव्येति दिव्यमाल्याम्बरधरं दिव्यानि माल्यानि पुष्पाणि अम्बराणि वस्त्राणि च ध्रियन्ते येनेश्वरेण तं दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनं दिव्यगन्धानुलेपनं सर्वाश्चर्यमयं सर्वाश्चर्यप्रायं देवमनन्तं नास्यान्तोस्तीति अनन्तस्तं विश्वतोमुखं सर्वभूतात्मत्वात् तं दर्शयामासार्जुनो ददर्शेति वा अध्याह्रियते ॥

आनन्दगिरिकृतटीका २

तदेव रूपं विशिनष्टि अनेकेति दिव्यान्याभरणानीति हारकेयूरादीनि भूषणान्युद्यतानि उद्धृतानि उक्तरूपवन्तं भगवन्तं प्रकारान्तरेण विशिनष्टि किञ्चेति अध्याहारोपि पदसंघटनासम्भवात् ॥

स्वामिकृतटीका ३

किंचदिव्येति दिव्यानिमाल्यांवराणिधारयतीति तथादिव्योगंधो यस्यतादृशमनुलेपनंयस्यतत् सर्वाश्चर्यमयमनेकाश्चर्यप्रायंदेवंद्योतनात्मकमनंतमपरिच्छिन्नंविश्वतःसर्वतोमुखानियस्मिन्तत् ॥

पैशाचभाष्यटीका ४

स्पष्टार्थं ॥

रामानुजभाष्यटीका ५

दिव्येति द्योतमानंदेवमनंतंकालत्रयवर्तिनिखिलजगदाश्रयतयादेशकालपरिच्छेदानर्हंविश्वतोमुखंविश्वदिग्वर्तिमुखंवेशान्वितद्दिव्यांबरगंधमाल्याभरणायुधान्वितं ॥ ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ॥ ॥ ॥ ॥

परमार्थप्रपाटीका ७

स्पष्टार्थं ॥ ॥ ॥

वनमालीटीका ८

दिव्यानिमाल्यानिपुष्पमयानिरत्नमयानिचतथादिव्यान्यंवराणिवस्त्रा

श्री
गी टी

णि च ध्रियंते येन तत् दिव्यमाल्यांबरधरं दिव्यगंधो यस्येति दिव्यगंधस्तद
नुलेपनं यस्य तत् सर्वाश्चर्यमयमनेकाद्भुतप्रचुरं देवं द्योतनात्मकं
अनंतं देशकालाद्यपरिच्छिन्नं विश्वतः सर्वतोमुखं नियमितं तत्
रूपं दर्शयामासेति पूर्वेण संबंधः ददर्शेत्यध्याहारो वा ॥

हनुमद्वैजयंतीटीका ४

किंच दिव्यमाल्यांबरधरमिति दिव्यान्यत्युज्ज्वलनूतनादिमाल्यानि वै
जयन्त्यादीन्यंबराणि श्वेतपीतरक्तनीलवर्णकानि च यथावृत्तीनि तत्था
तत्र दिव्यः कालावस्थाभावरहितस्सकलस्वरत्नादिमनोहरो गंधो
यस्य तादृशमनुलेपनं मृगमदचंदनकुंकुमादिपंकं यस्य तत् तथा स
र्वाश्चर्यमयमनेकाद्भुतप्रचुरं देवं द्योतनात्मकं अनंतं देशकालादिप
रिच्छिन्नस्वरूपं विश्वतोमुखं विश्वतस्सर्वतोमुखं नियमितं तथा तद्रूपं
दर्शयामासेति संबंधः पार्थो ददर्शेत्यध्याहारो वा पूर्वश्लोके अनेकव
क्त्रनयनमित्युपलक्षितानां सर्वेषां श्रोत्रादीन्द्रियाणां संख्यापरिच्छेद
शून्यं दर्शितं अत्र तु सर्वतोमुखमित्युपलक्षितानां सर्वेन्द्रियाणां सर्वेन्द्रियार्थ
ग्रहणसामर्थ्यं दर्शितमतो वक्त्रमुखयोः कथनेन पुनरुक्तिदोषगं
धावकाश इति भावः ॥

मधुसूदनी टीका ५

दिव्यानि माल्यानि पुष्पमयानि रत्नमयानि च तथा दिव्यान्यंबराणि व
स्त्राणि च ध्रियंते येन तत् दिव्यमाल्यांबरधरं दिव्यो गंधो यस्येति दिव्यगंधस्त
दनुलेपनं यस्य तत् सर्वाश्चर्यमयमनेकाद्भुतवदनकल्पनादि [illegible]प्र
चुरं देवं द्योतनात्मकमनंतमपरिच्छिन्नं विश्वतः सर्वतोमुखं नियमि
न तद्रूपं दर्शयामासेति पूर्वेण संबंधः अर्जुनो ददर्शेत्यध्याहारो वा ॥
[illegible] ॥

सदानंदी टीका ॥

ध्रियंते येन दिव्यानि माल्यानि वसनानि तत् दिव्यो गंधो यस्य तेनानुले
पनं यस्य तत् तथा अनेकाश्चर्यप्रचुरमनंतं द्योतनात्मकं तद्रूपमपरि
च्छिन्नं सर्वतोमुखमेवंभूतं २ दर्शयामास पार्थायेत्यनेनान्वय इष्यते ॥११॥

नीलकंठी टीका ६

विश्वतोमुखमिति पूर्वोक्तस्यैकत्वेन दृष्टत्वेन वक्तव्या विश्वतोमुखं

मिस्मयार्थपरामर्शः अनंतं सर्वतः परिच्छेदरहितं ॥

आनंदीटीका स्पष्टार्थम् ॥

रामकंठीटीका

ग्र४ गतार्थमेतच्छ्लोकत्रयं किंत्वेकमेवैश्वरं भगवत्स्वरूपं विशुद्धसंवित्
मात्रं परमार्थतो यद्रूपं तदेव सकलजीवलोकविविधाकृतिभेदेन
तन्मायाशक्त्यैवावभासते ततो विश्वमेव भगवद्रूपमित्येतावन्मा
त्रतात्पर्याणि रूपविशेषणान्येवं गंतव्यानि येन रूपसामानाधिकर
ण्येनानंतं विश्वतोमुखं देवमिति ग्रंथः संबध्यते [illegible]
[illegible]
[illegible] ॥ ॥

लासिकी[illegible]टीका

किंच दिव्यानि माल्यान्यम्बराणि च धारयतीति दिव्यो गंधो यस्य ताहगनु
लेपनं यस्य तत् सर्वाश्चर्यमयमनेकाश्चर्यप्रचुरं देवं द्योतनात्मक
मनंतमपरिच्छिन्नं विश्वतः सर्वतएव मुखं ज्ञानशक्तिर्यस्य तत् दर्शया
मासेति पूर्वेणान्वयः [illegible] ॥

पंचोलीटीका

दिव्यानि माल्यानि पुष्पाण्यम्बराणि वस्त्राणि च बिभर्तीति दिव्य
मालाम्बरधरस्तं दिव्या गंधाः अनुलेपनानि च यस्य तं दिव्यगंधानु
लेपनं सर्वैराश्चर्यकारिभिः वस्तुभिः बहुलं सर्वाश्चर्यमयं देवं
अनंतं देशतः कालतो वस्तुतश्चान्तो यस्य नेत्यनंतस्तमनंतं वि
श्वतो मुखं सर्वतो मुखं सर्वद्रष्टारं ॥

रणवीरसमिद्धोधिनी

स्पष्टोऽर्थः ॥

मधुभाष्य

सर्वाश्चर्यमयं सर्वाश्चर्यात्मकं सहस्रमाह्वोऽनंतवाची तदपि

भाषा अनुवाद

और दिव्य माला कहे पुष्प औ दिव्य अम्बर कहे वस्त्र तथा दिव्य गन्ध लेपन हैं जिस रूपमे और नाना आश्चर्य युक्त तथा अनन्त अपरिछिन औ सर्वत्र हैं मुख जिस मे सोरूप देखाया ११

दोहा

दिव्यमाल अंबरधरे दिव्यगंधअतिसेव सब आश्चर्यमय अनं
तहि सर्वत्रमुखदेव ११

दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता । यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः ॥ १२ ॥

शाङ्करभाष्यं १

या पुनर्भगवतो विश्वरूपस्य भासस्तस्या उपमोच्यते दिवीति दिवि अन्तरिक्षे तृतीयस्यां वा दिवि सूर्याणां सहस्रं सूर्यसहस्रं तस्य युगपदुत्थितस्य युगपदुत्थिता भाः सा यदि सदृशी स्यात् तस्य महात्मनो विश्वरूपस्य भासो यदि वा स्यात् ततोऽपि विश्वरूपस्यैव भाः अतिरिच्यत इत्यभिप्रायः १२

आनन्दगिरिकृतटीका २

ननु प्रकृतस्य भगवतो रूपस्य दीप्तिरस्ति न वा नचेत् काष्ठादिसाम्यं यद्यस्ति कीदृशी सेत्याशङ्क्याह या पुनरिति सा यदि स्यात्तद्भासः सदृशी सेति योजना असम्भावितात्युपगमार्थो यदिशब्दः स्यादित्यर्थः सा कथं सदृशी सम्भवति न तु सम्भवत्येवेति विवक्षित्वाह यदि वेति १२

स्वामिकृतटीका ३

विश्वरूपदीप्तेर्निरुपमत्वमाह दिवीति दिवि आकाशे सूर्यसहस्रस्य युगपदुत्थितस्य यदि युगपदुत्थिता भाः प्रभा भवेत् तर्हि सा तदा महात्मनो विश्वरूपस्य भासः प्रभायाः कथञ्चित्सदृशी स्यात् नान्योपमास्तीत्यर्थः तथाभूतं रूपं दर्शयामासेति पूर्वेणैवान्वयः १२

पैशाचभाष्यटीका ४

स्पष्टार्थं १२

रामानुजभाष्यटीका ५

स्पष्टार्थं १२ नामेवदेवपुरावृन्निर्दिष्टघाततनतोदिशिनष्टिदिवीति तेजसोपरिमितत्वप्रदर्शनार्थमिदमद्ययतेजस्तस्य रूपमित्यर्थः १२

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं १२

परमार्थप्रपादीटीका ७

अथ वैश्वरूपतेजसोऽत्यन्तं प्रभावं दर्शयति दिवीति ॥ तस्य महात्मनो विश्वरूपस्य भासो दीप्तेः सदृशी समाना भा दीप्तिः सूर्यैर्वा स्यात् तर्हि कथं यदि दिव्याकाशे सूर्यसहस्रस्य युगपदेकवारं उत्थितउदयः स्यात् इत्यभूतोपमालंकारः १२ ॥

श्री
गी॰टी॰
५

१

वनमाली टीका॰ ६

देवमित्युक्तं विवृणोति दिवि अंतरिक्षे सूर्याणां सहस्रापरिमितसूर्यसमूहस्य
युगपदुदितस्य युगपदुत्थिता भाः यदि भवेत् तदा सा तस्य महात्मनो वि
श्वरूपस्य भासो दीप्तेः सदृशी तुल्या यदि स्यात् यदि वा न स्यात् ततोपि न्यूनेव वि
श्वरूपस्यैव भा अतिरिच्यते इत्यहं मन्ये अनौपम्यमानास्यैवमर्थः १२

अथ समवेजयन्ती टीका॰ ९

देवमित्युक्तं तस्य दीप्तेनैरूप्यं वदन् विवरणमाह दिवीति दिवि व्योमाकाशे
सूर्यसहस्रस्य युगपत्प्रकाशमानस्य दिनागमे प्रचारेण युगपदुत्थि
त्थिता भा प्रभा यदि भवेत् सा प्रभा तस्य महात्मनो विश्वरूपस्य भ
गवतो भासो दीप्तेः सदृशी तत्तुल्या स्यान्नेवेति संभावनायां लिङ् अद्भुतो
पमेय सातिशयोक्तिः कृतेयं तामनयति सर्वथा निरूपमत्वमेवं व्यनक्ति
उभौ यदि व्योम्नि पृथक् प्रवाहौ विभादिवत्ताद्रूपं दर्शयामासेति पूर्वे
णान्वयः १२

मधुसूदनी टीका॰ १०

देवमित्युक्तं विवृणोति दिवि व्योमन्यंतरिक्षे सूर्याणां सहस्रापरिमितसूर्यसमूहस्य युगपदुत्थितस्य यु
गपदुत्थिता भाः प्रभा यदि भवेत् तदा सा तस्य महात्मनो विश्वरूपस्य
भासो दीप्तेः सदृशी तुल्या यदि स्यात् यदि वा न स्यात् ततोपि न्यूने विश्वरूपस्यै
व भा अतिरिच्यते इत्यहं मन्ये अनौपम्यमानास्यैवमर्थः अत्राविद्यमाना
त्वं वस्तु यातनाभावेनोपमाभावपरा अद्भुतोपरूपेय सातिशयोक्तिः किं
तं सर्वं वर्णनं तां सर्वथा निरूपमत्वमेवं व्यनक्ति उभौ यदि व्योम्नि पृथ
क् प्रवाहावाकाशगंगाप्रथमापनेता विभादिवत् [illegible]
[illegible] १२

सदानंदी टीका॰ ११

अंतरिक्षे सहस्रस्य सूर्यसमूहस्य विवस्वतो युगपच्चोत्थितस्य प्रभा युग
पदुत्थिता । तदा सा विश्वरूपस्य दीप्तिमतस्या भवेन्नवा ततोपि विश्व
रूपस्य प्रभा सैवातिरिच्यते इत्यहं स्वधिया मन्ये नान्यामालीहोपमेवति
१२

नीलकंठी टीका॰ १२

दिवि अंतरिक्षे भाः दीप्तिः भासः दीप्तेः अद्भुतोपमेयं निरूपमत्वमेव
तस्य दीप्तेर्दर्शयति उभौ यदि व्योम्नि पृथक् प्रवाहाविभादिवत् १२

ग॰

मा॰

रामकंठीटीका

अनपेक्षस्य परमार्थोद्देनचित्प्रकाशात्मनो वै स्वरूपेणावभासमानस्वरूपं प्रतिपादयितुमाह

यच्चान्तरिक्षे समुदितस्य भास्करसहस्रस्य समकालमेव समुत्थिता प्रसृता भादीप्तिः कदाचिद्भवेत् सा तस्यैकस्य परप्रकाशस्वभावस्य महात्मनः पुरुषस्य सदृशी स्यात्तुल्या भवेदिति काकाव्याख्येयं येन सदृशी स्यादित्येवं पर्यवस्येत् नत्वनन्यप्रकाश्यसकलवस्तुप्रकाशकनिरतिशयप्रकाशात्मनस्तस्य कोटिशोप्युदितानां युगपद्दिनकराणां दीप्तिस्तत्प्रकाशमहिम्नः लेशमप्यासादयितुमर्हति एवमनुत्तरप्रकाशात्मनि १२

लासिकी [illegible]टीका

अथ तस्य स्वरूपस्योपमानभावं दर्शयति॥

दिव्याकाशे समुदितस्य सूर्यसहस्रस्य समकालं प्रसृता दीप्तिः यदि कदाचिद्भवेत्सा तस्य महात्मनो महाव्यापकात्मनो विश्वरूपस्य भासः प्रभायास्तुल्या स्यादन्नीति संभाव्यते नान्योपमास्तीत्यर्थः अथवा स्यादिति काकाव्याख्येयं न भवेदित्यर्थः विश्वात्मन उपमाभावपराः भूलोपमारूपेयमतिशयोक्तिरन्येन लोकानां जयंती सर्वथा निरुपमत्वमेव मनक्ति [illegible] १२

पंचोलीटीका

याश्रुनः भगवतो विश्वरूपस्य भासस्तस्या उपमां कुर्वन्नुत्तस्याति रूपत्वं निरतिशयत्वं चाह दिवीति दिव्यन्तरिक्षे द्युलोके वा युगपदुत्थितस्य सूर्यसहस्रस्य युगपदुत्थिता भाः कान्तिस्तस्य महात्मनो विश्वरूपस्य भासः भासा कान्त्या यदि सदृशी स्यात् भगवतो भासस्ततोप्यधिका इत्यर्थः १२

रसवीरसमिद्धोधिनी

इदानीं तद्रूपलक्षणं प्रतिपादयति दिवीति यदि प्राक्सोदयकालवाचको यदि शब्दस्मिन्कालान्तरे सूर्यसहस्रस्य भा युगपदेककालसमुत्थिता प्रसरन्ती भवति तदैव सा भा तस्य तत्कृद्गम्यस्य महात्मनो ब्रह्मणो भासः स्वप्रकाशस्य सदृशी समाना स्याद्वा काकान स्यादिति भावः १२

पाकशासनत्रिविक्रमइत्यादिवत्सान्यायनार्थमेव तथास्य
वेदाखिलेषु अनंतशक्तिःपरमोनंतवीर्यःसोनंततेजाश्रुत
तेतत्तोपीति महात्मान्यथोक्तशाबल्यम् नचपरिमाणतोक्ता
किंचित्ययोजनं अनेकपात्को॰नंतवाची अनंतबाहुरि
तिचवक्ष्यति विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबा
हुरुत विश्वतस्पात् संबाहुभ्यांधमति संपतत्रैर्यावाभूमीज
नयन्देवएक इति ऋग्वेदे विश्वतश्चक्षुरुत विश्वतोमुखो
विश्वतोबाहुरुत विश्वतस्पात् संबाहुभ्यांनमति संपतत्रै
र्यावापृथिवीजनयन्देवएक यजुर्वेदे विश्वपाद्दस्यानंत
वाची सर्वमस्तं विश्वंचसनंतरूपमेव चेत्यभिधानात्
अनंतबाहुमनंतरूपं पुरुवक्रमेकमितिच बाभ्रव्यशा
त्वाया महत्त्वाप्रसिद्धतदात्मकत्वेनापिभवति अन्यथा
नादिमत्त्वब्रह्मेत्याद्युक्तंस्यात् एकत्वेनंतान्यस्य रूपा
णीत्यनंतरूपः अन्यत्रत्वपरिमाणइति उक्तसमय
मपि

भाष्य अनुवाद

और उस रूपकी निरूपम प्रभा प्रकाश करते हैं कि आकाश
मे जो एक काल सहस्र सूर्य के उदय की प्रभा हो उठे तो कदा
चित उन महात्मा कान्ति के कोई अंश की उपमा होय तो होय न
ही तो इस रूप की उपमा नहीं है १२

दोहा

नभसहस्ररवि उदितहि एकबार जो होय आभासमतेहिं रूपके
तेज बराबर सोय १२

तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ॥१३॥

शाङ्करभाष्यटीका १

किञ्च तत्रैकस्थमिति तत्रास्मिन् विश्वरूपे एकस्मिन् स्थितमेकस्थं जगत् कृत्स्नं प्रविभक्तमनेकधा देवपितृमनुष्यादिभेदैरपश्यत् दृष्टवान् देवदेवस्य हरेः शरीरे पाण्डवोऽर्जुनस्तदा ॥१३॥

आनन्दगिरिकृतटीका २

न केवलं शुक्लमेवार्जुनो दृष्टवान् किन्तु तत्रैव विश्वरूपे सर्वं जगदेकस्मिन्नवस्थितमनुभूतवानित्याह किञ्चेति तदावि स्वरूपस्य भगवद्रूपस्य दर्शने दशायामित्यर्थः ॥१३॥

स्वामिकृतटीका ३

ततः किं वृत्तमित्यपेक्षायामाह संजयः तत्रैति अनेकधा प्रविभक्तं नानाविभागेनावस्थितं जगत् देवदेवस्य शरीरे तदवयवत्वेनैकत्रैव पृथक्पृथगवस्थितं तदा पाण्डवोऽर्जुनोऽपश्यत् ॥१३॥

पैशाचभाष्यटीका ४

स्पष्टार्थं ॥१३॥

रामानुजभाष्यटीका ५

तत्रेति तत्रानन्तापरिमितविस्तारे अनन्तबाहूदरवक्त्रनेत्रेऽपरिमितदिव्यायुधोपेते स्वोचितापरिमितदिव्यभूषणभूषिते दिव्यमाल्याम्बरधरे दिव्यगन्धानुलेपने अनन्ताश्चर्यमये देवदेवस्य दिव्यशरीरेऽनेकधा प्रविभक्तं ब्रह्मादिविविधविचित्रदेवतिर्यङ्मनुष्यस्थावरादिभोक्तृवर्गं पृथिव्यन्तरिक्षस्वर्गपातालवितलसुतलादिभोगस्थानभोगोपकरणभेदभिन्नं प्रकृतिपुरुषात्मकं कृत्स्नं जगत् अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः अहमात्मा गुडाकेश सर्वभूताशयस्थितः आदित्यानामहं विष्णुरित्यादिना न तदस्ति विना यत्स्यान्मया भूतं चराचरं विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदित्यन्तेनोदितं एकस्थमेकदेशस्थं पाण्डवो भगवत्प्रसादलब्धतद्दर्शनानुगुणदिव्यचक्षुरपश्यत् ॥१३॥

श्री॰ गी॰ टी॰ ५

अभिनवगुप्तकृतटीका ९

स्पष्टार्थं १३ ॥ ॥

परमार्थप्रपा टीका ७

तत्रेति तत्र देवदेवस्य शरीरे अनेकधा प्रविभक्तं भिन्नभिन्ननाम-
रूपाकर्मात्मकं कृत्स्नं समग्रं जगदेकस्थमेकाश्रयं तदा त-
स्मिन्नवसरे पाण्डवोऽर्जुनः अपश्यत् १३ ॥

वनमाली टीका ८

एकस्थमेकत्राश्रिते जगत्कृत्स्नं प्रविभक्तं सावकाशमनेकधा देव-
मनुष्यादिप्रकारैः अपश्यद् देवदेवस्य भगवतस्तत्र विश्वरूपे शरीरे
पाण्डवस्तदा विश्वरूपाख्यदर्शनदशायां १३

गुप्तवैजयन्तीटीका ५

ततः किमभूदित्यपेक्षायामाह तत्रैकस्थमिति देवदेवस्य देवानब्र-
ह्मरुद्रेन्द्रादीन् देवयते क्रीडयते स्वविग्रहे निरतिशयसौन्दर्यवात्स-
ल्यादिगुणैरिति देवदेवः यद्वा देवेषु दीव्यति तत्र तत्र [illegible] रूपेण
तत्र देवनादौ क्रीडतीति तथा सः यद्वा देवानिष्याधिष्ठातॄन् देवय-
ते तद्विषयेषु क्रीडयते तथा सः यद्वा देवान् केशवरुद्रादीन् दीव्यति त-
मावात्मलशोतिकान्मादिगुणैर्विजिगीषते इति देवदेवः यद्वा देवेषु
दीव्यति तत्तद्वलेशानां कैरणतत्तत्प्रकारेण व्यवहरतीति तथा सः
यद्वा देवेभ्यो दिव्यति स्वस्वरूपगुणशक्त्यादिभिर्द्योतते इति देवदेवः
यद्वा देवान् स्वस्वरूपगुणशक्त्यादिभिर्दीव्यते तेनयतीति तथा सः तेषां सका-
शात्कश्यपः यद्वा देवैर्दीव्यते स्वस्वकामावाप्त्यर्थं स्तूयते यः इति तथा
सः यद्वा देवान् दीव्यति तत्रत्यलायतान् गच्छतीति सः यद्वा देवैः
मरदीव्यति आनन्दसमुद्रमोदते इति देवदेवः तादृशस्य देवदेवस्य
तत्रानेकवक्त्रनयने अनेकाद्भुतदर्शने अनेकदिव्याभरणे दिव्या-
नेकोद्यतायुधे दिव्यमाल्याम्बरधरे दिव्यगन्धानुलेपने अपरिमिता
अथ मध्ये अनुपमापरिमिततेजस्के दिव्यानन्तानि विस्तरे शरीरे स-
र्वस्यापि रस्य विश्वविग्रहे एकस्य एकदेशे स्थितं अनेकधा विविध-
विविधानन्ताकारैः केशवब्रह्मेशादिसुरासुरनरपितृपशुपतत्रि-
नगपिपीलिकान्तैः अपरिमितानन्ताकारैर्महत्तादिरूपैर्लसत्तैः षवि

स्थानैः ग्रामनगरनदीसिंधुपर्वतारण्यादिभिः असंख्येया
तलवितल[illegible]सुतलमहातलरसातलतलातलतल[illegible]पाताल
भूर्भुवःस्वर्महर्जनतपःसत्यात्मकचतुर्दशलोकगर्भकपंचभूता
हंकारमहत्प्रकृतिकालाद्यात्मकचेतनाचेतनरूपानेकापरिमिता
संख्येयब्रह्मांडैःप्रविभक्तं पृथक्पृथक्स्थितम् कृत्स्नं सर्वं जग
त् तदा यदा दिव्यदृष्टिलब्धस्तस्मिन्नेव काले पांडवो गोविंदात्
गुरुलब्धदिव्यदृष्टिःपार्थोपश्यत ददर्श १३

इहैकस्थं जगत्कृत्स्नं पश्याद्य सच **मधुसूदनी टीका· १०** राचरमिति भगवद्वाक्यमप्यनुभूतवानर्जुन इत्याह॥

एकस्थमेकत्रस्थितं जगत्कृत्स्नं प्रविभक्तमनेकधा देवपितृम
नुष्यादिनानाप्रकारैः अपश्यद्देवदेवस्य भगवतो विश्वरूपस्य त
स्य शरीरे पांडवोऽर्जुनः तदा विश्वरूपप्रदर्शनदशायां [illegible]
[illegible]
[illegible] १३
[illegible]

सदानंदी टीका· ११

तत्रैकत्रस्थितं सर्वं प्रविभक्तं जगत्पृथक् देवपितृमनुष्यादिप्र
कारैर्भिन्नमद्भुतं । दृष्टवानर्जुनो देहे देवदेवस्य शार्ङ्गिणः तदा
सर्वं मयानेकदर्शनावसरे किल १३

नीलकंठी काटी· १२

इहैकस्थं जगत्कृत्स्नं पश्येति यद्वाक्यं भगवताउक्तं तद्दृष्टमपश्य
दित्याह तत्रेति अनेकधाप्रविभक्तमिमं तत्त्ववर्षीसूस्थितमिति
निप्पीबीजे सूक्ष्मरूपेण न तु दृश्यते तद्वन्माभूदिति दर्शयितुं साव
काश अनेकधा विभागयुक्तं विविक्तं अपश्यत् एकस्थं एकावस्थ
वस्थं अयमर्थः यदा भगवतस्तत्र भुजे रूपं विस्मितेन तत्र च चेतसि
लब्धपदे सति क्रमशस्तदीयावयवांस्पृष्ट्वा प्रविस्मितेवापदन
वैवाचितेभियते तत्रापि लब्धपदे तस्मिंस्तदपि सत्का विश्वरूप
मारोहति दिव्यं चक्षुरपि एवं सूक्ष्मतामापादितं मनएव मनोस्य
दैववतः सपतेन दैवेन च तद्धामनसैतान् कामान्पश्यन् रम
नरतिश्रुतेः कामान् विषयान् एतान् हार्दीकाशान्[illegible]

लगताविति श्रुतिपदयोरर्थः यथोक्तं श्रीभागवते तत्रलब्धपदं
चित्तमाकृष्यैकत्र धारयेत् नान्यानि चिंतयेद्भूयः सुस्मितं भावयेत्
मुखं तत्रलब्धपदं चित्तमाकृष्य व्योम्नि धारयेत् तच्च त्यक्त्वा मदा
रोहो न किंचिदपि चिंतयेदिति तच्च मूर्तौ एकत्रस्थिते व्योम्निका
रणे महदारोहो निर्विकल्पे ब्रह्मण्यारूढः तदिदमुक्तं देवदेवस्य
शरीरे कृत्स्नं जगदेकस्थं पांडवोपश्यदिति १३

आनंदीटीका

अनेकधा चराचरादिचतुर्दशभुवनसर्गाणां नानाप्रकारैः प्रविभक्तं प्र
विभागप्रकर्षेणायुक्तं नत्तु संकीर्णमित्यर्थः १३ ॥ [illegible]
[illegible] १३

रामकंठीटीका

तदानीं हगान्त्यक्तुं भगवद्रूपवैश्वरूप्यदर्शनकारणभूतदिव्यचा
नात्मकचक्षुर्दीनलक्षणाय रानग्रहरूपे कालेन तत्ताह्शि परम
कारुण्यात्मनि देवदेवस्य सर्वेश्वरस्य शरीररूपे एकस्थमेकत्रैवाश्रये
स्थितमथ चानेकधाप्रविभक्तं विश्वभावरूपैर्भेदैर्विप्रकीर्णं कृत्
स्नमखिलं जगदर्जुनोपश्यत्साक्षात्कृतवानिति संजयो दिव्यनेत्र
धारो मे श्वरमनुग्रहमर्जुनस्पष्टं तदुक्तवान् [illegible]
[illegible] १३

अथार्जुनस्येश्वरस्वरूपसाक्षात्कारमाह ॥— लासिकी

द[illegible]टीका

देवदेवस्य विश्वरूपेश्वरस्य शरीरे स्वरूपेनेकधाप्रविभक्तं नानाविभा
गेन स्थितं कृत्स्नमखिलं जगदेकस्थमेकेनाभेदेन स्थितं सोर्जुनस्त
देश्वररूपसमाधानकाले पश्यत्स तेन साक्षात्कृतवान् प्रविभक्तपदेने
श्वररूपं सदाशिवतत्त्वाद्यावर्तितम् एकपदेन शुद्धं विज्ञातत्त्वरूपं वम
र्जुनस्य तैकलगोचरं विश्वरूपेश्वरसाक्षात्कारमभिधाय अधुनाऽर्जुनस्थि
तिस्वरूपमाह १३ ॥

पंचोलीटीका

ततः किंवृत्तमित्यपेक्षायामाह संजय उवाच तत्रेति पांडवः तदान
स्मिन् देवदेवस्य शरीरे विश्वरूपे एकस्थमेकत्रास्थितं अनेकधा देव
पितृमनुष्यादिभेदैः प्रविभक्तं भिन्नं कृत्स्नं जगत् अपश्यत् १३

अथार्जुनो भगवद्रूपमपश्यदित्याह तत्रैकस्थमिति तदा तस्मिन्भ
गवदनुग्रहावसरे कृत्स्नं जगत्स्थावरजंगमात्मकं विश्वमनेकधाने
काश्रयादिभेदैः स्वभावादेव प्रविभक्तं विभिन्नावभासमानमपि
तत्सर्वं देवदेवस्य शरीरे भौतिके रूपावतारे तत्रैवैकस्थं युगपदेक
स्मिन्नेवावकाशे स्थितमपश्यत्साक्षात्पाण्डवोऽर्जुन इत्यर्थः ॥१३॥

मधुभाष्य

भाषा अनुवाद

तिस के वादि क्या भया सो कहते हैं कि उस समय अर्जुन को नाना प्रकार शरीर के अनेक भागमे स्थित समस्त जगत श्री कृष्ण एक अपनी शरीर मे एक वारगी देखाया १३

दोहा

तहां एकस्था जगतसभ भिन्न अनेक प्रकार देवदेवकी देहमहिं लखैं पांडव तेहि वार १३

ततः स विस्मयाविष्टो हृष्टरोमा धनञ्जयः
प्रणम्य शिरसा देवं कृताञ्जलिरभाषत १४

शाङ्करभाष्यटीका १

तत इति ततस्तं दृष्ट्वा स विस्मयेनाविष्टो विस्मयाविष्टो हृष्टानि रोमाण्यस्य सोऽयं हृष्टरोमा चाभवद्धनञ्जयः प्रणम्य प्रकर्षेण नमनं कृत्वा प्रह्वीभूतः सन् शिरसा देवं विश्वरूपधरं कृताञ्जलिर्नमस्कारार्थं संपुटीकृतहस्तः सन्नभाषतोक्तवान् १४ ॥ ॥ ॥

आनन्दगिरिकृतटीका २

विश्वरूपधरस्य भगवतस्तस्मिन्नेकीभूतजगतस्त्रैलोक्यविशेषणस्य दर्शनानन्तरं किमकरोदित्यपेक्षायामाह तत इति आश्चर्यबुद्धिर्विस्मयः रोम्णां हृष्टत्वं पुलकितत्वं प्रकर्षो भक्तिश्रद्धयोरतिशयः १४

स्वामिकृतटीका ३

एवं दृष्ट्वा किं कृतवानित्यत आह तत इति ततो दर्शनानन्तरं विस्मयेनाविष्टो व्याप्तः सन् हृष्टानि पुलकितानि रोमाणि यस्य स धनंजयो देवं तमेव शिरसा प्रणम्य कृताञ्जलिः संपुटीकृतहस्तो भूत्वा अभाषत उक्तवान् १४

पैशाचभाष्यटीका ४

स्पष्टार्थः १४ ॥ ॥

रामानुजभाष्यटीका ५

तत इति ततोऽथ धनंजयो महाश्चर्यस्य कृत्स्नस्य जगतस्तस्य देहैकदेशे दर्शनात् विस्मयाविष्टः कृत्स्नजगदाश्रयभूतं कृत्स्नस्य प्रवर्तयितारमाश्चर्यतमेन ज्ञानादिकल्याणगुणैर्देवं दृष्ट्वा हृष्टरोमा शिरसा देवं प्रणम्य कृताञ्जलिरभाषत १४

अभिनवगुप्तकृतटीका ६

स्पष्टार्थः १४ ॥ ॥

श्री
गी टी
५

परमार्थप्रपा टीका॰ ७

ततो दर्शनानन्तरं धनञ्जयोऽर्जुनः अद्भुतदर्शनोत्पन्नेन विस्मयेनावि
ष्टो व्याप्तः एवमद्भुतरसस्याविर्भावेन हृष्टरोमा रोमाञ्चितः सन् ।
देवं कृष्णं शिरसा प्रणम्य कृताञ्जलिः सन्नभाषत १४ ॥

वनमाली टीका॰ ८

एवमद्भुतदर्शनेऽप्यर्जुनो न विभयाञ्चकार नापि नेत्रे संववार नापि
सम्भ्रमात्कर्तव्यं विसस्मार नापि तस्माद्देशादपससार किं त्वतिधीर
त्वात्तत्कालोचितमेवार्जुनसहायमहति विवृतोऽभ्यधीत्याह तत इति
तत्तद्दर्शनानन्तरं विस्मयेनाद्भुतदर्शनप्रभवेनालौकिकचित्तचम
त्कारविशेषेणाविष्टो व्याप्तः अत एव हृष्टरोमा पुलकितः सन्स
प्रख्यातमहादेवसंग्रामादिप्रभावो धनञ्जयो देवं तमेवाद्भुतान
न्तैश्वर्यविशिष्टं नारायणं शिरसा भूलग्नेन प्रणम्य भक्तिश्रद्धाति
शयेन नम्रः कृताञ्जलिरभाषत १४ ॥

अस्यवैजयन्तीटीका॰ ९

एवं ब्रह्मदेवसर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते इत्तेन ते कथयिष्यामि दि
व्या ह्यात्मविभूतयः अहमात्मा गुडाकेश सर्वभूताशयस्थितः
आदित्यानामहं विष्णुरित्यादिना न तदस्ति विना यत्स्यान्मया भूतं
चराचरं विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदित्यन्तेनादि
ते विश्वाकारं भगवद्रूपं कृत्स्नं तत्त्वतोऽर्जुनोऽपश्यदिति क्रमित
नीत हृष्टोऽर्जुनः किं कृतवानित्यपेक्षायां तदैवाद्भुते रसमनुभू तं कृतमभ
दिमाह तत इति ॥ ततो विश्वरूपदर्शनानन्तरं धनञ्जयः युधिष्ठिरराज
गवं ते विलोकयतः यो विस्मापितस्मवकतेजोऽपि धनञ्जयः रातिशिरोभूषणा
सुयोगं पथं निवातकवचादिमुद्देवारणगोग्रहेवा रातिधीरोऽपि वि
दिरूपं दर्शनेन यती तितप्यासः तादृशो वीरशिरोमणिरलौकिकविचित्रचा
रूपयाविष्टः विस्मयेनालौकिकाद्भुतदर्शनजन्येनालौकिकविस्मयला
मकारविशेषेण विष्टो व्याप्तः सन् अत एव हृष्टरोमा हृष्टानि उत्पुलका
नि लोमानि यस्य स तथा तादृशः सन् प्रथमं देवं प्रज्वलन्तं
नः पुनः प्रज्वलमानं ज्वलनोपमदीप्तिमन्तं सर्वकारणं सर्वनियन्तारं
सर्वं पिनष्टि सर्वेगुणतमं विश्वरूपधरं श्रीकृष्णं शिरसा प्रणम्य
तेन दण्डवत्साष्टाङ्गप्रणिपातेन प्रणम्य प्रकर्षेण कायवाङ्मनोभिर्नी

ना
हि

मेकभावेन नमनेन कृत्वा पश्चात् कृतांजलिः संपुटीकृतकरयुग
लः सन् अभाषत उक्तवान् अत्रार्जुनेन सम्भ्रमेण समस्वरणादिकं नाभू
त्किं त्वद्भुतरसोऽभूदिति विज्ञायते तथाहि इहतादृशो हरिरालंब
नः सुकृत्संज्ञकलक्षितं गुणदीपनम् प्रणतिपाणिग्रंथिरोमांचा
द्यनुभावः सात्त्विकः तेरतिश्रामनिधृतिहर्षादयः संचारिणः एतै
रालंबनादिभिः पुष्टो विस्मयस्थायिभावोऽद्भुतरस इति भावः तथाच
हि च इहलोके आलंबनोद्दीपनात्मविभावः कारणं हि यत्कार्यांनु
भावो भावस्तु सहायोऽव्यभिचार्यपि अद्भुतो विस्मयस्थायी माया
दिकविभावभूः रोमांचाद्यनुभावोयं स्तंभादिव्यभिचारिकः इति ४

मधुसूदनी टीका ९

+ एवमद्भुतदर्शनेनार्जुनेन विभक्ता चकारेणापि नेत्रे संबबार नापि संभ्रमात् कर्तव्यं विसस्मार नापि तस्माद्देशादपससार किं तु तिष्ठरेव तत्कालोचितमेव व्यवजहार महति चित्तक्षोभेऽपीत्याह ॥+

+ ततस्तद्दर्शनानंतरं विस्मयेनाद्भुतदर्शनप्रभवेनालौकिकचित्त
चमत्कारविशेषेणाविष्टः अत एव हृष्टरोमा पुलकितः स
न् सप्रख्यातमहादेवसंग्रामादिप्रभावः धनंजयः युधिष्ठिररा
जसूये उत्तरगोग्रहे सर्वान् वीरान् जित्वा धनमाहृतवानिति प्रथि
तमहापराक्रमोऽतिवीरः साक्षादग्निरिव महातेजस्वित्वात् देवं त
मेव विश्वरूपधरं नारायणं शिरसा भूमिलग्नेन प्रणम्य प्रकर्षेण
भक्तिश्रद्धातिशयेन नत्वा नमस्कृत्य कृतांजलिः संपुटीकृतहस्त
युगः सन् अभाषत उक्तवान् अत्र विस्मयाख्यस्य स्थायिभावस्यार्जुनग
तस्यालंबनविभावेन भगवता विश्वरूपेण उद्दीपनविभावेनासम
कृद्दर्शनेनानुभावेन सात्त्विकरोमहर्षेण नमस्कारेणांजलिक
रणेन च व्यभिचारिणा चानुभावाक्षिप्तेन धृतिमत्या हर्षवितर्का
दिना परिपोषात् सवासनानां श्रोतॄणां तादृशः चित्तचमत्कारोऽपि
तद्वेदान्त्यवसायात् परिपोषं गतः परमानंदास्वादरूपेणाद्भुत
रसो भवतीति सूचितं
॥१४

सदानंदी टीका ११

एवंदिव्याद्भुतंरूपंदृष्ट्वाभगवतोर्ज्जुनः नविभियांचकारनोसंच
चारनचत्तृषो १ विसस्मारनकर्त्तव्यंस्थानाज्ञापससारह किं
तुधीरंनयाचक्रेव्यवहारंयथोचितं विनतोभेपिमहतिप्राहेदं
वैसंजयः तद्रूपदर्शनाज्जातविस्मयेनाहृतस्ततः ३ हृष्टरो
माचनोभूत्वाविश्वरूपधरंहरिं भूमिलग्नेनशिरसाभक्तिश्रद्धा
समन्वितः ४ प्रकर्षेणनमस्कृत्यस्वाभिमानंविहायच संपुटी
कृतहस्तःसन्नुवाचानतकंधरः ४ १४

नीलकंठी टीका· १२

हृष्टरोमारोमांचितगात्रः १४

अथचभगवतोविश्वरूपंदृष्ट्वार्ज्जुनइत्यमाह॥ ज्ञानेरीटीका

ततोविश्वरूपदर्शनानंतरंविस्मयेनालौकिकेनचित्तचमत्कारेणा
विष्टोतएवहृष्टरोमार्ज्जुनोदेवंपरस्थितंश्रीकृष्णंवैश्वरूप्यदर्शनार्थं
ज्ञानभक्त्यतिशयः मूर्ध्नाप्रणम्यकृतांजलिर्देवंतामाराममाह १४

रामकंठीटीका

अथहृष्टपरमेश्वरंविश्वरूपोर्ज्जुनःकिंचकारे
त्याह॥ ततस्ताहृगत्यद्भुतभगवद्रूपसाक्षात्कारणादनंतरंधनंजयोनुषभा
वाविर्भावेणानुभूतपरनतस्मरणाजनितेनविस्मयेनाविष्टस्त्वा
क्रांतचित्तवृत्तिरतएवहृष्टरोमासंजातपुलकोधनंजयोदेवकी
पुत्रंपुरोवर्तिनंसाक्षात्कृतनिरतिशयप्रभावमात्मानंज्ञातंतोविष
यवद्भ्मानातिशयोमूर्ध्नाप्रणामंकृत्वांजलिःसन्देवस्समाला
मभाषतोवाच

लाक्षिकी टीका १५

ततोविश्वरूपेश्वरदर्शनानन्तरंसर्वेश्वरानुग्रहाद्दीभूतोर्ज्जुनोवि
स्मयेनयोगभूमिकालक्षणाभितेनत्रुटीनोपिपरंतत्वचमत्कारेणा
विष्टश्चित्तवृत्तिःतयाचात्मश्रात्मसाक्षात्कृतः हृष्टरोमापरमाने

दानुभवेनोत्पुलकितरोमाकृतांजलिः संपुटीकृतहस्तः देवंप्रणोवर्तितंदेव
कीपुत्रंश्रीकृष्णंसाक्षात्कृतप्रभाववात्स्तेजाततद्विषयबहुमानोमूर्ध्ना प्र
णम्याभाषतोवाच [covered] १४

पंचोलीटीका

एवं दृष्ट्वार्जुनः किंकृतवानित्याह ततइतिसधनंजयोऽर्जुनः तत
स्तद्दर्शनानंतरं विस्मयाविष्टः उत्पन्नविस्मयः हृष्टरोमाकृतांजलिः
सन्देवं शिरसा प्रणम्य भाषत वक्ष्यमाणमब्रवीत् १४

रणवीरसमिद्धोधिनी

अथसाक्षाद्दृष्टाद्भुतपारमेश्वररूपोऽर्जुनः किंकृतवानितितत्राह
ततइति ततो भगवद्रूपस्य साक्षात्करणानंतरं सधनंजयः धन
जयोऽर्जुनः सविस्मयाविष्टो दृष्टपूर्वाद्भुतो नपवानंदप्रसंग्ताहृष्ट
रोमापुलकांकितः तत्रैवंभूतः ततः किंकृतवानित्याह प्रणम्ये
ति देवंभगवंतं सर्वं प्रणम्य तदनुकृतांजलिः सन्नुत्तरवाक्यमभा
षतेति १४॥

मधुभाष्य

भाषा अनुवाद

तबतो अर्जुनवर आश्चर्य रूप भगवान का रूप देखि अतिशय
कौतुकयुक्त होय आनन्द से पुलकित भये और मस्तक से का
य प्रणाम करि हाथ जोरि यह वचन बोलते भये ॥

दोहा

ताते विस्मययुक्त सो अर्जुन पुलकित देह अंजलिजोड निवा
य शिर कृष्ण हि भाषत यह १४

अर्जुन उवाच पश्यामि देवांस्तव देव देहे स
र्वांस्तथा भूतविशेषसंघान् ब्रह्माणमी
शं कमलासनस्थमृषींश्च सर्वानुरगांश्च दि
व्यान् १५

शाङ्करभाष्यटीका॰ १

कथं यत्त्वया दर्शितं विश्वरूपं तदहं पश्यामीति स्वानुभवमा
विष्कुर्वन् अर्जुन उवाच पश्यामीति पश्याम्युपलभे हे देव॰दे तव॰
हे देवान् सर्वांस्तथा भूतविशेषसंघान् भूतविशेषाणां स्थाव
रजङ्गमानां नानासंस्थानविशेषाणां संघाः भूतविशेषसंघास्ता
न् किंच ब्रह्माणं चतुर्मुखमीशितारं प्रजानां कमलासनस्थं
पृथिवीपद्ममध्ये मेरुकर्णिकासनस्थमित्यर्थः ऋषींश्च वशिष्ठा
दीन् सर्वानुरगांश्च वासुकिप्रभृतीन् दिव्यान् दिवि भवान् १५

आनन्दगिरिकृतटीका २

कथं भगवन्तं प्रत्यर्जुनोभाषितवानिति पृच्छति कथमिति त
न् प्रश्नमपेक्षितं पूरयन्नवतारयति यत्त्वयेति भूतविशेषसं
घातेषु देवतानामन्तर्भावेपि पृथक्करणमुत्कृष्टत्वाद्ब्रह्मणः
सर्वदेवतात्मत्वेपि तेभ्यो भेदकथनं तदुत्पादकत्वादिति मत्वाह
किंचेति ऋषीणामुरगाणांच किंचिद्वैषम्यात् पृथक्त्वं दि
व्यानीत्युभयेषां विशेषणं १५

स्वामिकृतटीका ३

भाषणमेवाह पश्यामीति सप्तदशभिः अर्जुन उवाच हे देव तव दे
हे देवानादित्यादीन् पश्यामि तथा सर्वान् भूतविशेषाणां जरायुजा
ण्डजादीनां संघांश्च तथा दिव्यान् ऋषीन् वसिष्ठादीन् उरगांश्च तक्ष
कादीन् तथा तेषां देवादीनामीशं स्वामिनं ब्रह्माणं च कथंभूतं क
मलासनस्थं पृथ्वीकर्णिकायां मेरौ स्थितं यद्वा नाभिपद्मासन
स्थम् १५

श्री॰
गी॰ टी॰
५

स्पष्टार्थं अर्जुन उवाच १५ पैशाचभाष्यटीका ४

रामानुजभाष्यम् ५

अर्जुन उवाच पश्यामीति हे देव [तव] तव देहे सर्वान् देवान् पश्यामि तथा सर्वान् प्राणिविशेषाणां संघान् तथा ब्रह्माणं च चतुर्मुखमण्डाधिपतिमीशं कमलासनस्थं कमलासने ब्रह्मणि स्थितमीशं तन्मतेऽवस्थितं तथा देवर्षिप्रभृतीन् सर्वान् ऋषीन् उरगांश्च वासुकितक्षकादीन् सर्पान् १५

स्पष्टार्थं १५ अभिनवगुप्तकृतटीका ६

॥ परमार्थप्रपा टीका ७ ॥

... किमभाषतेत्याह पश्यामीति समदर्शिभिः भो देव दीप्यमान तव देहे स्वर्गस्थान् देवान् पश्यामि तथा भूमिस्थान् सर्वान् भूतविशेषाणां जरायुजाण्डजादीनां संघान् समूहान् तथा दिव्यान् दिव्ये निलये वर्तमानान् ऋषीन् पुलस्त्यक्रत्वादीन् (पुलह) तथा पाताले स्थितान् उरगांश्च पश्यामि किं च सत्यलोकनिवासिनं ब्रह्माणं तथा कैलासवासिनमीशमीश्वरं पश्यामि किं च कमलया लक्ष्म्या सह श्रासने गरुडासने स्थितो विष्णुमपि वैकुण्ठवासिनं पश्यामीति दिव्यदृष्टिदानस्य फलमुक्तं [illegible] १५

वनमाली टीका ८

षड्गवतादर्शितमनेनैश्वर्येण तद्भगवद्दत्तेनैव दिव्येन चक्षुषा सर्वजनादृश्यमपि पश्याम्यहो मम भाग्यप्रकर्ष इति स्वानुभवमाविःकुर्वन्नर्जुन आह पश्यामीति पश्यामि चक्षुषा विषयीकरोमि हे देव तव देहे देवानिन्द्रादीन् सर्वान् तथा भूतविशेषसंघान् स्थावरजङ्गमानां जरायुजस्वेदजोद्भिज्जाण्डजानां संघान् समूहान् तथा ब्रह्माणं चतुर्मुखमीशं कं रुद्रं कीदृशं कमलासनस्थं कमलमासनं यस्य स कमलासनस्तं तत्र स्थितं ब्रह्मपुत्रान् उरगांश्च दिव्यान् वासुकिप्रभृतीन् पश्यामीति सर्वत्रान्वयः ॥१५॥

हनुमदैत्यपल्लीटीका· ४

किमभाषतेत्यपेक्षायांतस्यभाषणमेवाहसप्तदशभिःपश्यामिदे॰
वानिति हेदेवद्योतमानतवदेहेविश्वात्मकेविग्रहेसर्वान् देवानि
न्द्रवरुणादीन् तथा सर्वान्भूतविशेषसंघान् भूतविशेषाणांज
रायुजादीनांसंघान्समूहान्पश्यामि तथा ब्रह्माणंचतुर्मुखं तथा
ईशंसर्वनियंतारंगर्भोदशायिनेकीटशोकमलासनस्थंकमला
सनेचतुर्मुखंतदंतर्यामिरूपेणस्थितं यद्वा ब्रह्माणमेवविशेष
णेनःईशंसर्वेश्वरंविसंहरते प्रजेषांसर्वेषामीशमीशितारमि
त्यर्थः कमलासनस्थमलयाम्बुधिशेषशायिनोविष्णोर्नाभिकम
लासनेस्थितंभूकमलमध्यमेरुकर्णिकासनेस्थितंवा तथा सर्वा
न्दिव्यान्दिविभवान् ऋषीन्देवर्षीन् तथा सर्वान् उरगान् वासु
किकर्कोटकतक्षकादीन्सर्पान् पश्यामीमस्य भगवतादर्शिते
विश्वाकारेयत्स्वरूपेणसर्वेलोकादृष्टपूर्वमपिभगवदनुग्रहेणोवदि
व्यचक्षुषाःहे पश्याम्यहो मम भाग्यप्रकर्ष इतिस्वानुभावमाविष्कुव
न्पश्यामि वा चाक्षुषज्ञानविषयीकरोमीत्यभिप्रायः १५

यद्भगवतादर्शितंविश्वरूपंतद्भग मधुसूदनी टीका· ९ वद्दत्तेनदिव्येनचक्षुषासर्वलोकादृष्टपूर्वमपिपश्याम्यहोममभाग्यप्रकर्ष इति स्वानुभवमाविष्कुर्वन्॥

पश्यामि वा चाक्षुषज्ञानविषयीकरोमि हे देव तव देहे विश्वरूपे देवा
न्वस्वादीन् तथा भूतविशेषाणांस्थावरजंगमानांचनाना
संस्थानानांसंघान् समूहान् तथा ब्रह्माणंचतुर्मुखं ईशमीशि
तारंसर्वेषांकमलासनस्थंपृथिवीपद्ममध्येमेरुकर्णिकासनस्थ
भगवन्नाभिकमलासनस्थमितिवा तथा ऋषींश्चसर्वान्वसिष्ठा
दीन्ब्रह्मपुत्रान्उरगांश्चदिव्यानामाकृतान्वासुकिप्रभृतीन्
पश्यामीतिसर्वत्रान्वयः
१५

सदानंदी टीका· ११

दर्शितेविश्वरूपंयच्छ्रीमद्भगवताद्भुते तद्दत्तेनैवदिव्येनसर्वादृ
ष्टपूर्वमपीहतत् १ अहो पश्यामिनेत्रेणममभाग्यप्रकर्षतः इति
स्वानुभवंप्राहःकुर्वन्श्रीवाचपांडवः २ पश्यामितवदेहेस्मिं॰
न्विश्वरूपेसुरानहं समस्तानेववस्वादीस्तद्दत्तेनैवचक्षुषा ३
तथाभूतविशेषाणांस्थाणुजंगमरूपिणां नानासंस्थानयुक्ता
नांसमूहंतेनचगोचरान् ४ चतुर्मुखंसमस्तानामीशितारंतथि॰

स्थितं भूपद्ममध्ये मेरुकर्णिकासनसंस्थितं ५ तथैव ऋषींश्च
सिद्धादीन्समस्तान्नेत्रदर्शिनः वासुकिप्रभृतीन्सर्पान्दिव्यान्विभवो (यान्दि॰)
स्तथा १ १५

नीलकंठी टीका १२

देवान् आदित्यादीन् भूतविशेषांश्च नवविधाजरायुजादयस्तेषां
संघान् समूहान् ब्रह्माणं चतुर्मुखं ईशं ईशितारं कमलासन
स्थमिमनेन हरदर्शनमुक्तं उरगान् पातालस्थान् नेतादीन्
दिव्यान् कैलासादौ स्थितान् वासुकिप्रभृतीन् एतेन व्यवहित
दर्शनमुक्तं १५

आनंदटीका

भूतविशेषाणां चराचराणां संघान्सार्थान् ब्रह्मणो दर्शनादूर्ध्वं स
त्यलोकांतदर्शनमुक्तम् ऋषिदर्शनाद्भुवमहोलोकांतम् उरगदर्श
नात्सप्तपातालदर्शनम् नानाविधभूताश्रितसमस्तलोकदर्शनेपि ता
मेवैकं सर्वलोकाश्रयं पश्यामीत्याह १५

किमित्याह॥—

रामकंठी टीका

हे देव परमेश्वर तव देहे सकलजगज्जीवैकाश्रयभूतेस्मिन्वपुषि दे
वान् दिवौकसस्तथा स्थानविचराचराणां भूतविशेषाणां प्राणपंतरा
णां सहस्राणि पश्यामीति देवादिशब्दाधात्वेनेव हि ज्ञगीति समस्ता
विश्वदर्शनेन भगवद्रूपविषयं प्रतिपाद्य क्रमेणात द्विशेषदर्शनं प्रति
पादयितुमाह ब्रह्माणं प्रजापतिमीशं प्रभुं कमलासनस्थं पुंड
रीकविष्टरसंनिविष्टं पश्यामीत्यनेन ब्रह्मलोकांतमुक्तं भुवनदर्श
नमुक्तवान् ऋषींश्च सर्वान्पश्यामीत्यनेन प्राधान्योपलक्षिताश्च ऋषि (म^)
जनोपलक्षितमध्यमलोकदर्शनमुक्तवान् उरगांश्च दिव्यान्पश्य
मीत्यनेनानंतवासुकिप्रभृतिभुजंगेशोपलक्षितपातालदर्शनं च
एवं त्वद्रूपविभवनत्रयं लीनं पश्यामीति स्वानुभवं प्रतिपादितवान् १५

लामिकी[illegible]टीका

किमिति अर्जुन उवाच ॥

हे देव क्रीडाशीलेश्वर तव देहे सर्वरूपे देवान्ब्रह्मादीन्पश्यामि मालाकारो
मि ऐश्वररूपसमाधिसंस्कारवैवश्येन पश्यामि इति वर्तमाननिर्देशः
एवं सामान्येनोक्त्वा विशेषतोऽनिरूपयति तथा सर्वाभूतविशेषाणां
चराचराणां प्राणिभेदानां समूहांश्च तथेशं देवानामपि प्रभुं पद्मासना
सीनम् ब्रह्माणम् अधोभवनवासिनं च तथा सर्वान्दिव्यान्ऋषीन्मर्त्यलोक
वासिनो वसिष्ठादींश्च उरगांश्च दिव्यान्प्राकृतान्ये भवनवासिनो वा
स्तकिप्रभृतींश्च तवैश्वरस्य व्यापके देहे तिले तैलमिव व्याप्यतया पश्यन्
पश्याम्युपलभे एतेन भुवनत्रयं तव देहे सुविलीनं पश्यामीति स्वानुभवं
प्रतिपादितवान् [illegible] १५ ॥

पंचोलीटीका

अर्जुनस्य भाषणप्रकारमेव संजय आह पश्यामीति हे देव अहं तव
देहे सर्वान्देवान् इंद्रादीन् तथाभूतविशेषसंघान् भूतविशेषाणां स्था
वरजंगमानां विविधाकारविशिष्टानां संघाः भूतविशेषसंघास्तान्
ब्रह्माणं चतुर्वक्त्रं ईशं प्रजानां ईशितारं कमलासनस्थं पृथ्वीपद्ममध्ये मे
रुकर्णिकासनस्थं ऋषीन् वसिष्ठादीन् सर्पान् वासुकिप्रभृतीन् उरगा
न्दिव्यान् पश्यामि १५

गणावीरसमिह्वोधिनी ॥

पश्यामीति हे देव तव देहे सर्वं प्रपंचभूते सर्वान्देवानिदानीमेव प
श्याम्युपलभे तथा भूतविशेषसंघान्भूतविशेषाणां प्राणिविशे
षाणां च ये संघास्तानपि सर्वान्पश्यामि तथा च कमलासनस्थमी
शं ब्रह्माणमपि पश्यामीत्येवं ब्रह्मलोकान्तमुत्तमलोकदर्शनं
तथ ऋषींश्च वसिष्ठादीन्पश्यामीति मध्यमलोकदर्शनं तथा सर्वा
नुरगांश्च पातालवासिनः पश्यामीत्यधमलोकदर्शनं इति सर्वं
व्याप्यव्यापकत्वमुख्येन भगवाहिपं प्रतिपादितं १५ ॥

भाषा अनुवाद

अब सञ्जय सत्रह श्लोक मे अर्जुन के कहे वचन कहते हैं कि हे कृष्ण आप की शरीर मे आदित्य औ तावत् भूत समूह अर्थात् जरायुज मनुष्य पशु और अण्डज पक्षी सर्प आदि औ स्वेदज जूं मच्छड़ प्रभृति तथा उद्भिज्ज लता वृक्ष आदि ये सब देवता हैं और हे देव देवता सकल औ नाभि कमल मे ब्रह्मा बैठे त था ईश महादेव और दिव्य ऋषि वशिष्ठ आदि औ उरग तक्षक आदिकों को देखता हूं पद्मासनस्थ ब्रह्मा किस प्रकार सो कह ते हैं कि पृथिवी रूप नाभि से उठा जो कमल स्वरूप सुमेरु गिरि तिस पर बैठे देखो हैं १५

चौपई

लखौं देव तव देवहिं देहा त्यों सम भूत विशेषहिं गेहा ब्रह्मा ईश कमलासन स्थित ऋषि सर्व अरु सर्पहिं दीस १५॥

अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोऽनन्तरूपं नान्तं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूप १६

शाङ्करभाष्यटीका १

किञ्च अनेकेति अनेकबाहूदरवक्त्रनेत्रं अनेके बाहव उदराणि वक्त्राणि नेत्राणि च यस्य तव स त्वमनेकबाहूदरवक्त्रनेत्रस्तम् अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वा त्वां सर्वतः सर्वत्र अनन्तरूपमनन्तानि रूपाणि अस्येत्यनन्तरूपस्तं अनन्तरूपं नान्तमन्तोऽवसानं न मध्यं मध्यं नाम द्वयोः कोट्योरन्तरं न पुनस्तवादिं तव देवस्य न अन्तं पश्यामि न मध्यं पश्यामि न पुनरादिं पश्यामि हे विश्वेश्वर हे विश्वरूप १६

आनन्दगिरिकृतटीका २

यत्र भगवद्देहे सर्वमिदं दृष्टं तमेव विशिनष्टि अनेकेति आदिशब्देन मूलमुच्यते नान्ते न मध्यमित्यत्रापि पश्यामीत्यस्य प्रत्येकं सम्बन्धं सूचयति नान्तं पश्यामीति १६

स्वामिकृतटीका ३

किंच अनेकेति अनेकानि बाह्वादीनि यस्य तं त्वां दृष्टोऽहं पश्यामि अनन्तानि रूपाणि यस्य तं त्वां सर्वतः पश्यामि तव तु अन्तं मध्यमादिं च न पश्यामि सर्वगतत्वात् १६

पैशाचभाष्यटीका ४

स्पष्टार्थः १६ ॥ ॥ ॥ ॥ ॥

रामानुजभाष्यटीका ५

अनेकेति अनेकबाहूदरवक्त्रनेत्रं अनन्तरूपं त्वां सर्वतः पश्यामि विश्वेश्वर विश्वनियन्तः विश्वरूप विश्वशरीर यतस्त्वमनन्तः अतस्तवान्तं न मध्यं न पुनस्तवादिं न पश्यामि १६

अभिनवगुप्तकृतटीका ६

श्री·
गी·टी·
प

५१

॰अनेकेति॰

सम्बार्थे १६ ॥ ॥ ॥ ॥

परमार्थप्रपा टीका· ७

अथ विश्वरूपं वर्णयति॰ हे भो विश्वेश्वर ते विश्वरूपं विश्वात्म
कं रूपं यद्वा विश्वं विश्वं वेषद्वारेण स्मादिना विश्वं विश्वस्वरूपं रूपं
शरीरं यस्य तथाविधं ते इति त्वां पश्यामि किं भूतं अनेकबाहूद
रवक्त्रनेत्रं अनेकेषां बाहूदरवक्त्रनेत्राणि एव बाहूदरवक्त्रनेत्राणि
यस्य सर्वतः समंततः अनंतरूपमसंख्यातरूपं पर्वं सर्वं पश्या
मि परं तेतव्रितयं न पश्यामि तत्किं ते अंते पर्यवसानं मध्यं स्थि
तिमवस्थानं आदिमाविर्भावं [illegible]
[illegible]
[illegible]
[illegible]

वनमाली टीका ८

यत्र भगवद्देहे सर्वमिदं दृष्टवांस्तमेव विशिनष्टि अनेकेति बा
हवउदराणि वक्त्राणि नेत्राणि वा नेकानि यस्य तमनेकबाहूदरव
क्त्रनेत्रं पश्यामि त्वां सर्वतः सर्वत्रानंतानि रूपाणि यस्येति तेन तव तु
नैनांतमवसानं न मध्यं नाप्यादिं पश्यामि सर्वगतत्वात् हे विश्वे
श्वर हे विश्वरूप संबोधनद्वयमतिसंभ्रमात् एवमस्य परिच्छिन्नत्वे
न दृश्यमानस्यापि त्वं प्राकृतं व्यापकत्वं स्फुटं शक्तमिति भावः १६

कल्पमवेनयत्नीटीका· ९

पार्थो यत्र भगवद्देहे देवादीन पश्यत्तमेव भगवद्विश्वात्मकं देहं वर्ण
यति अनेकबाहूदरवक्त्रनेत्रमिति हे विश्वेश्वर विश्वनियंतः अ
तिसंभ्रमात्संबोधनं विश्वरूप विश्वशरीर त्वां त्वामेव सर्वतः सर्वत्र
दिक्षु पश्यामि प्रमत्तविषयीकरोमि कीदृशं अनेकबाहूदरवक्त्रनेत्रं अने
कानि संख्यावच्छेदशून्यानि बाहवः उदराणि वक्त्राणि च यस्य ते त
था पुनः अनंतरूपं अनंतमवधिरहितं निर्णयरहितं वा रूपं स्व
रूपं यस्य स तथा तं अतएव विश्वरूपस्य तव अंतं पादादवस्थानं न प
श्यामि मध्यं कटिप्रदेशभागं न पश्यामि पुनस्त्वादिं शिरोभागं न पश्या
मि इदमित्थमिति निर्णयपूर्वकं ज्ञातेन शक्नोमीत्यर्थः १६

मधुसूदनी टीका १०

यत्र भगवद्देहे सर्वमिदं दृष्टवानर्जुन तमेव विशिनष्टि बाहवश्च उदराणि वक्त्राणि नेत्राणि चानेकानि यस्य तमनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतः [illegible]
[illegible] सर्वत्र अनंतानि रूपाणि यस्येति तं नवतु पुनरंतं नमध्यं नादिं पश्यामि सर्वगतत्वात् हे विश्वेश्वर हे विश्वरूप सेवोपनह्यमति संभ्रमात् [illegible] १६

सदानंदी टीका ११

बाहवश्चोदराणि हवक्त्राणि न घनानि च यस्यानेकानि तं त्वा दृष्टपश्यामि विश्वरूपिणं १ सर्वत्रानंतरूपं चापरिच्छिन्नमहत्त्वं नावसानं न मध्यं वनादिं पश्याम्यहं तव २ हे विश्वेश समस्तात्मत्रिस्मेवं संभ्रमाद्वचः ३ १६

नीलकंठी टीका १२

अनेके अनंताः बाहवः उदराणि वक्त्राणि नेत्राणि च यस्मिंस्तदनेकबाहूदरवक्त्रनेत्रं सर्वतश्च नर्दितु उपर्यधश्च अनंतमपरिच्छिन्नरूपमस्यते अंतेतमेवाह नांतमिति दीर्घरज्ज्वाइव तवायंतौ देशिकौ न लक्ष्यार्थः १६

आनंदीटीका

विश्वस्येश्वरोतियंता विश्वानि कार्यकारणात्मकानि रूपाणि यस्य इदमेव च भवतो रूपं सर्वदा परिवितं पुरो वस्थितं भगवदनुग्रहात्वं वलते जोमयं पश्यामीत्याह १६॥

रामकंठीटीका

एवं देवादि विविधरूपाधिष्ठित भुवनत्रयद श्रीनैपित्वामेवैकं सर्वाश्रयं पश्यामीत्याह॥
स्पष्टार्थः श्लोकः किं त्रिभुवनत्रयगतानां भूतानां येनानाविधाजठरवदनलोचनादयोवयवास्तेन येव सर्वतोनवच्छिन्नमाहात्म्यस्यैकस्यावयवतेन पश्यामीत्यत्र तात्पर्यम् [illegible] ॥

लास्तिकीवसगमीटीका

किंच सर्वेषांप्राणिनामवयवाल्मथैवावयवाश्स्यवशिष्टंनामेकंपश्या
मि हेविश्वेश्वरहेविश्वरूपेतिसंबोधनद्वयमदृष्टपूर्वानुभूतत्वाद्भुता
द्भुतिवशात् [illegible] १६॥

पंचोलीटीका

अनेकेतिहेविश्वेश्वरविश्वरूपंत्वांअनेकबाहूदरवक्त्रनेत्रंअनेका
बाहवःउदराणिवक्त्राणिनेत्राणिचयस्यसः सर्वतोनंतरूपंसर्वतः
सर्वत्रानंतानिरूपाणियस्यतंत्वांपश्यामिचपुनःपुनरादिमध्यांत्यं
तेनपश्यामिसर्वगतत्वात् १६

ममावीरसमिद्धोधिनी॥

एवंत्रिभुवनदर्शनेपि भगवंतमेवैकं सर्वाश्रयत्वेन पश्या
मीत्याह अनेकेति गतार्थमेतच्छ्लोकद्वयम् १६॥

मधुभाष्य

परात्परंयन्महतोमहांतं यदेकमव्यक्तमनंतरूपमिति
यजुर्वेदे अव्यक्तस्यानंतत्वादेवमहतोमहत्वेनापरिमेयत्वं
सिद्धमिति महांतंच समाहृत्यप्रधानंसमवस्थितं अनंतस्य
नतस्यांतःसंख्यानंवापिविद्यतइत्यादित्वग्न्यरूपे नानिवै
कानिरूपाण्यनंतानीतिवैकत्वंभवति असंख्यातानांज्ञा
नकालस्यदेहः सर्वेपरीणाममविवर्जिताये त्वर्थेदाश्चित्ते
यावान्वाअयमाकाशस्तावानेषोंतर्हृदयआकाशः उभे

भाषा अनुवाद

और अनेक बाहू अनेक उदर अनेक मुख अनेक नेत्र तुम
को सर्वत्र मै देखता हूं परन्तु हे विश्वरूप तुमारा आदि म
ध्य अन्त नही देखता हूं १६

चौपई

बाहु अनेक उदर मुख नेत्र लखों अनंत तोहि रूप सर्वत्र न
हि तव अंत मध्य अरु आदि लखों सर्व विश्वेश अनादि १६

किरीटिनं गदिनं चक्रिणञ्च तेजोराशिं सर्वतोदीप्तिमन्तं पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद्दीप्तानलार्कद्युतिमप्रमेयं १७

शाङ्करभाष्यटीका·१

किञ्च किरीटिनमिति किरीटिनं किरीटोनामशिरोभूषणविशेषः तद्यस्यास्तीति सकिरीटी तं किरीटिनं तथा गदिनं गदायस्य विद्यतइति गदी तं गदिनं तथा चक्रिणं चक्रमस्यास्तीति चक्री तं चक्रिणं च तेजोराशिं तेजःपुञ्जं सर्वतोदीप्तिमन्तं सर्वतोदीप्तिमांस्तं सर्वतोदीप्तिमन्तं पश्यामि त्वां दुर्निरीक्ष्यं दुःखेन निरीक्ष्योदुर्निरीक्ष्यस्तं समन्ततः सर्वत्र दीप्तानलार्कद्युतिं अनलश्चार्कश्चानलार्कौ दीप्तौ अनलार्कौ दीप्तानलार्कौ तयोर्दीप्तानलार्कयोर्द्युतिरिव द्युतिस्तेजोयस्यतव सत्वं दीप्तानलार्कद्युतिस्तं त्वां दीप्तानलार्कद्युतिं अप्रमेयं न प्रमेयमप्रमेयमशक्यपरिच्छेदमित्यर्थः १७

आनन्दगिरिकृतटीका·२

विश्वरूपवन्तं भगवन्तमेव प्रकारान्तरेण प्रपञ्चयति किञ्चेति परिच्छिन्नत्वं व्यावर्तयति सर्वत इति दुर्निरीक्ष्यं पश्यामीत्यधिकारिभेदादविरुद्धं पुरतोवा पृष्ठतोवा पार्श्वतोवा नास्य दर्शनं किन्तु सर्वत्रेत्याह समन्तत इति दीप्तिमत्त्वं दृष्टान्तेन स्पष्टयति दीप्तेति १७

स्वामिकृतटीका· ३

किंच किरीटिनमिति किरीटिनं मुकुटवन्तं गदिनं गदावन्तं चक्रिणं चक्रवन्तं च सर्वतोदीप्तिमन्तं तेजःपुञ्जरूपं तथा दुर्निरीक्ष्यं द्रष्टुमशक्यं तत्र हेतुः दीप्तयोरनलार्कयोः द्युतिरिव द्युतिस्तेजो यस्य तं अत एवाप्रमेयं एवंभूत इति निश्चेतुमशक्यं त्वां समन्ततः पश्यामि १७

पैशाचभाष्यटीका· ४

+ पूर्वकमलासनस्थमितिपदेनसामान्यतोविष्णोः स्वरूपंयद्दृष्टमित्युक्तं तदेवगदाचक्रा
द्यायुधोपलक्षणपद्या पुराणेप्युक्तंतमद्भुतयाइदंविष्णुर्विचक्रमेत्रेधानिदधेपदमिति
श्रुतिप्रतिपादितेत्रिविक्रमाकारेणदृष्टमित्याह ॥ +

श्री·
गी· टी·
५

54

स्पष्टार्थं १

रामानुजभाष्यटीका· ५

किरीटिनमिति तेजोराशिंसर्वतोदीप्तिमन्तंसर्वतोदुर्निरीक्ष्यंदी
प्तानलार्कद्युतिमप्रमेयंकिरीटिनंगदिनंचक्रिणंचपश्यामि १

अभिनवगुप्तकृतटीका· ६

स्पष्टार्थं १ ॥ ॥ ॥ ॥

परमार्थप्रपाटीटीका· ७

+ किरीटिनमिति किरीटिनंमुकुटवन्तंगदिनंगदायुक्तंचक्रि
णंसुदर्शनवन्तंपश्यामि अनेनोर्ध्वहस्ताभ्यांक्रमेणगदाचक्रेत
थाधरहस्ताभ्यांपद्मशङ्खौबिभ्राणमेवंचतुर्भुजंत्रिविक्रमरूपं
पश्यामीत्युक्तं तथात्वांसर्वतस्तेजोराशिंतेजःसमूहस्वरूपंदी
प्तिमन्तंप्रसरत्प्रकाशंसमन्ताद्दुर्निरीक्ष्यंद्रष्टुमशक्यंदीप्तानला
र्कद्युतिंज्वलदग्निसूर्ययोर्दीप्तिर्यस्यअप्रमेयंमनसाप्यतर्क्यंअ
यमर्थः त्रिविक्रमरूपात्त्वत्स्वरूपेणैववरणविहितप्रमाणव्याप्त
ब्रह्माण्डकटाहंतादृशमपित्वद्देहंपश्यामिकिंपुनरनन्तं यत
देवमनसिनिधायमयाप्युक्तं क्वाहंतमोमहदहंखचरा
ग्निवार्भूःसंवेष्टिताण्डघटसप्तवितस्तिकायइत्यादि १

वनमालीटीका· ८

तमेवाचिन्त्यशक्तिमन्तंभगवन्तंप्रकारान्तरेणविशिनष्टि किरी
टिनमितिकिरीटंगदाचक्रधारिणंचसर्वतोदीप्तिमन्तंतेजोरा
शिंच अतएवदुर्निरीक्ष्यंभगवत्प्रसादसहकृतेनदिव्येनचक्षु
षाविनानिरीक्षितुमशक्यंमयकारपाठेदुःशकोपद्रुवव्यवचनः
अतिनिरीक्ष्यमितियावत् दीप्तयोरनलार्कयोर्द्युतिरिवद्युतिर्यस्य
तमप्रमेयमियत्तयमयमितिपरिच्छेत्तुमशक्यमिथाञ्चस्वरूपत्वात् स
मन्तात्सर्वतःपश्यामिदिव्येनचक्षुषाभगवत्प्रसादसद्भावासद्भा
वाभ्यांसुनिरीक्ष्यत्वदुर्निरीक्ष्यत्वयोरेकस्यैवनविरुद्धमितिभावः १

रुक्मवैजयन्तीटीका· ९

प्रकारान्तरेणतमेवविश्वरूपंविशिनष्टि किरीटिनमिति कि
रीटिनंकिरीटोपलक्षितकुण्डलकटककेयूरहारकटिसूत्रनूपु

गदयेन तत्संस्थितभूषणवत्त्वमित्यर्थः गदिनं चक्रिणं गदाचक्राभ्यामु
पलक्षितानेन तद्विविधविविधसंस्थितदिव्यायुधवत्त्वं चकाराच्छंखचं
षकादि दिव्यायुधवत्त्वं तेजोराशिं तेजःपुञ्जरूपं सर्वतः सर्वत्र दीप्तिमके
शानवन्तं तादृशं लक्ष्म्यादिशुद्धीमव ऐवत पीतनीलरक्तहरिता
दिप्रुतयो विधैतेयस्मात् अत एव दुर्निरीक्ष्यं दिव्यदृष्ट्यादि विना तर
दृष्टा निरीक्षितुमशक्यं मयकारपाठे तु दुःशब्दो निषेधवाची दिव्य
दृष्ट्या निरीक्ष्यमित्यर्थः न तु दुःशब्दस्य निषेधवाचित्वे पश्यामी
ति क्रियाया विरोधः स्यादिति शंकाप्रमेयत्वेन पश्यामीत्याह समंता
त्सर्वतः स्वरूपावयवादेः अप्रमेयं इयन्मयमिति परिच्छेत्तुमशक्यं
दिव्यदृष्ट्याधीयत्नावच्छेदराहित्येनाहं पश्याम्यतो न विरोधः कुत एवं
यतो दीप्तानलार्कद्युतिं दीप्तयोरनलार्कयोर्द्युतिरिव द्युतिर्यस्य तं
अतिप्रबलप्रचंडप्रलयानिलोद्धूतानलतत्कालीनातिप्रचण्डमा
र्तण्डसमदीप्तिं तेनातिसंभ्रमदिव्यदृष्टेः प्रसरणानवकाशात्त्वप्र
मातुमशक्यमस्वरूपं सोऽहमेको भवान्तु यत्स्वरूपमिति वस्तु
मात्रेण तु विश्वाकारं सर्वेनियंतारं सर्वेश्वरमहं पश्यामीत्यर्थः १७

तमेव विश्वरूपं भगवंतं प्रकारांतरेण विशिनष्टि

मधुसूदनी टीका ॥

किरीटगदाचक्रधारिणं च सर्वतो दीप्तिमंतं तेजोराशिं च अत एव दु
र्निरीक्ष्यं दिव्येन चक्षुषा विना निरीक्षितुमशक्यं मयकारपाठे दुःश
ब्दोपह्नववचनः अनिरीक्ष्यमित्यर्थः यावत् दीप्तयोरनलार्कयोर्द्यु
तिरिव द्युतिर्यस्य तं अप्रमेयमियन्मयमिति परिच्छेत्तुमशक्यं त्वां स
मंतात् सर्वतः पश्यामि दिव्येन चक्षुषा अतोऽधिकारिभेदात् दुर्नि
रीक्ष्यं पश्यामीति न विरोधः [illegible]
[illegible] १७

सदानंदी टीका ॥

तेन प्रकारांतरेणाह विशिनष्टि किरीटिनमिति गदाकिरीटचक्रादिधारिणं
तेजसां निधिं १ सर्वतो दीप्तियुक्तं च पश्यामीत्याह मदुक्ते विना दिव्य
नेत्रेणाद्रष्टुमशक्यं निरीक्षितुं २ सर्वतो दीप्तयोर्वह्निसूर्ययोरि
व भायुतं अप्रमेयं परिच्छेत्तुमशक्यं चायमियानिति ३ १७

नीलकंठी टीका ॥

श्री॰
गी टी॰
प

किरीटगदाचक्रधारिणं दीप्तिमन्तादेवइ निरीक्षं दुर्निरीक्ष्यमशक्यं समं
तात्सर्वतोपि दीप्तानलार्कं अप्रमेयं दुनिरीक्ष्यस्ततु समंताद्दीप्तान
लार्कद्युतिमिमेकंपदं अतएवाप्रमेयं दुर्निरीक्ष्यमशक्यं परिच्छेदं १७

५५

आनंदीटीका

स्पष्टोर्थः [illegible] १७

इदमेवचनेडरःस्थितंरूपंत्वदनुग्रहात्परमेश्वरते। रामकंठीटीका
ज्ञोमयंपश्यामीत्याह॥— अथतरागीकथैवव्याख्यातं तात्पर्यमेतत् [illegible]

[illegible] ॥ [illegible] ॥

लासिकी वल्लभीटीका

किंच॥— किरीटिगदाचक्रफलंपरिच्छिन्नं त्वामेवदेवात्मजमेवंविधंप
श्यामि कीदृशमित्याह सर्वतोदीप्तिमंतं तेजोराशिरूपम् तथाडु
र्निरीक्ष्यं कष्टेनाद्दष्टुशक्यम् सपकारपाठेडुःशक्योपक्वववचनः
अतिरीक्ष्यमितियावत् तथासमंताद्दीप्तयोरनलार्कयोर्द्युतिरिवद्यु
तिर्यस्यतम् अप्रमेयंप्रमत्वादिप्रमाणागोचरं एवंविधैश्वर्योगद
र्शनादि[illegible]मन्नुमिनोति १७॥

अन्य

पंचोलीटीका

किरीटिनं इतिहेदेवअहंत्वांएवंविधंपश्यामिकथंभूतंत्वां किरीटि
नंरत्नखचितमुकुटाभरणयुक्तंगादिनंगदायुधविशेषयुक्तंचक्रि
णंचक्रायुधविशेषहस्तंतेजोराशिंतेजसांपुंजयुक्तं सर्वतःसर्वा
सुदिक्षुदीप्तिमंतंस्वदीप्त्यासर्वप्रकाशिसमंतात् दुर्निरीक्ष्यंदुष्प्रेक्ष्यमशा
क्यंदीप्तानलार्कद्युतिंदीप्तयोरनलार्कयोः अग्निसूर्ययोः द्युतिरिव
द्युतिर्यस्यतेजोयस्यतंदीप्तानलार्कद्युतिमप्रमेयंसकलप्रमाणागो
चरं १७

स्वगवीरसमिद्धोधिनी॥

स्पष्टोर्थः १७॥

मधुभाष्य

१७॥

भाषा अनुवाद

और मुकुट गदा चक्र युक्त तथा तेज पुञ्ज सर्वत्र प्रकाश
मान अति दुर्निरीक्ष्य चहूं ओर प्रदीप्त अनल अर्क के समा
न तुम को मै देखता हूं १७

चौपई

मुकट गदा अरु चक्र धरंत तेजराशि सम भसें धुतिवंत
तोहि कदिनदर्श सर्वदिशेषों अनल अर्क धुति अप्रमेय वि
शेषों १७

लास्तिकी [illegible]नीटीका

अवश्यं ज्ञेयं परममक्षरं ब्रह्म त्वमेवेश्वरः तथास्येदं तावद्यथार्थस्य विश्व
स्य परं प्रधानमाश्रयस्त्वयात्मकं निधानं परं श्रेष्ठमाश्रयस्त्वमेव तथा
चोक्तं यथान्यग्रोधबीजस्थः शक्तिरूपो महाद्रुमः तथा हृदयबीजस्थं ज
गदेतत्सचराचरमिति तथा त्वमेव शाश्वतस्य नित्यस्य धर्मस्य चैतन्यापरप
र्यायस्याहंतारूपविमर्शाख्यस्य गोप्ता जीवदशायामपि पालकः तद्रूपे
लकः अतएवाव्ययः जीवदशायामपि स्वरूपप्रच्युतिरूपविकाररहितः
तथा सनातनः अनादिः पुरुषः हृदयस्य आत्मा च त्वमेवेश्वरो मया मतो
नुमानेन ज्ञातोसि [illegible] १८ ॥

पंचोलीटीका

यस्मादेवं तवातर्क्यमैश्वर्यं तस्मादेवं वितर्कयामि त्वमिति हे भगवन्मु
मुक्षुभिः वेदितव्यं ज्ञेयं परममक्षरं अविनाशि ब्रह्म त्वमेवासि वि
श्वस्य जगतः परं निधानं परमाश्रयः त्वमेवासि अव्ययं नित्यं त्वं शाश्वत
स्य धर्मस्य गोप्ता पालकः सनातनः चिरंतन पुरुषः मे मम त्वमेव मतः
अभिप्रेतः १८

रामकवीरसमिद्धोधिनी ॥

भगवंस्त्वं त्वदक्षरं न क्षरति स्वस्वरूपान्न व्यवते इत्यक्षरं मायीयादिक्षो
भरहितमित्यर्थः परमं प्रकृष्टं यदक्षरं तदोंकाररूपं त्वमेव वेदितव्य
मतोस्य विश्वरूपस्य परं निधानं परमं कारणं त्वमेवासि अतएवाव
व्ययो न विकारमेतीत्यव्ययः शाश्वतधर्मगोप्ता शाश्वते नित्ये वह्व
यत्तव धर्मं न क्षीयते इति शाश्वतधर्मगोप्ता त्वमेवासि इतीत्थं लक्ष
णो मे सनातनः पुरुषः पुराणपुरुषस्त्वमेतावद्दितो ज्ञातोसीत्यर्थः
१८ ॥

मधुभाष्य

१८ ॥

भाष्य अनुवाद

जिस हेत तुमारा ऐश्वर्य ऐसा अचिन्त्य है इस से तुम अक्षर जो पर ब्रह्म मुमुक्षु लोगों के जानने योग्य और तुम इस विश्व के निधान कहे परम आश्रय हो इस से तुम नित्य औ नित्य धर्म के पालक औ अनादि पुरुष मेरे मत मे हौ १८

चौपई

परम अक्षर तुं योग्य विज्ञान तुं इस विश्व को परम निधान
तुं अखंड धर्म प्रतिपालन सो मत मे तुं पुरुष सनातन १८

अनादिमध्यान्तमनन्तवीर्यमनन्तबाहुंश
शिसूर्यनेत्रं पश्यामित्वांदीप्तहुताशव
क्त्रंस्वतेजसाविश्वमिदंतपंतं १९

शांकरभाष्यटीका १

किंच अनादीति अनादिमध्यान्तम् आदिश्च मध्यं च अन्तश्च न वि
द्यते यस्य सोयमनादिमध्यान्तस्तं त्वामनादिमध्यान्तमनन्तवी
र्यं न तव वीर्यस्यान्तोस्तीत्यनन्तवीर्यस्तं त्वामनन्तवीर्यं तथा अ
नन्तबाहुमनन्ता बाहवो यस्य तव सत्वमनन्तबाहुस्तं त्वा अनन्त
बाहुं शशिसूर्यनेत्रं शशिसूर्यौ नेत्रे यस्य तव सः त्वं शशिसूर्यने
त्रः तं त्वां शशिसूर्यनेत्रं चन्द्रादित्यनयनं पश्यामि त्वां दीप्तहु
ताशवक्त्रं दीप्तश्चासौ हुताशश्च तद्वत् वक्त्रं यस्य तव स त्वं
दीप्तहुताशवक्त्रः तं त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वं सम
स्तमिदं तपन्तं सन्तापयन्तं १९

आनन्दगिरिकृतटीका २

भगवतो रूपं विश्वरूपाख्यं रूपमेव पुनर्विवृणोति किंचे
ति हुतमश्नातीति हुताशो वह्निः १९

स्वामिकृतटीका ३

किंच अनादीति अनादिमध्यांतमुत्पत्तिस्थितिप्रलयरहितं अनं
तवीर्यंप्रभावोयस्यतं अनंतावीर्यवंतोबाहवोयस्यतंशशिसूर्यौ
नेत्रेयस्यतादृशंत्वांपश्यामि तथादीप्तोहुताशोग्निर्वक्त्रेषुयस्यतंस्व
तेजसाइदंविश्वंतपंतंसंतापयंतंपश्यामि १९

पैशाचभाष्यटीका ४

स्पष्टार्थः १९ ॥ ॥ ॥

रामानुजभाष्यटीका ५

अनादीति अनादिमध्यांतं आदिमध्यान्तरहितं अनंतवीर्यं अन
वधिकातिशयवीर्यंवीर्यशब्दःप्रदर्शनार्थः अनवधिकातिशय
ज्ञानबलैश्वर्यवीर्यशक्तितेजसांनिधानमित्यर्थः अनंतबाहुंअ
संख्येयबाहुंसोपिप्रदर्शनार्थः अनंतबाहूदरवक्त्रादिकं शशि

श्री॰
गी॰टी॰
प

सूर्यनेत्रं शशिवत् सूर्यवच्च प्रसादप्रतापयुक्तं सर्वनेत्रं देवादीनां
अनुकूलान् नमस्कारादि कुर्वाणान् प्रसादेन तद्विपरीतान् सुरगात्रसादी
न्प्रतिप्रतापः रक्षोसिभीतानि दिशोद्रवंति सर्वेनमस्यंति च सि
द्धसंघाः इति हि वक्ष्यते दीप्तहुताशवक्त्रं प्रदीप्तकालानलवत्संह
रणगुणवक्त्रं स्वतेजसा विश्वमिदं तपंतं तेजः पराभिभवसामर्थ्यं
स्वकीयेन तेजसा विश्वमिदं तपंतं त्वां पश्यामि एवंभूतं सर्वस्य सं
हारं सर्वाधारभूतं पूर्वस्य प्रशासितारं सर्वस्य सेव्यं दर्शितं नानापरि
मितगुणगणसागरं आदिमध्यांतरहितमेवंभूतं दिव्यदेहं नाय॰
योपदेशे सात्तानन्करोमीत्यर्थः एकस्मिन् दिव्यदेहे अनेकोदरा
दिकं कथं दृश्यत उपपद्यते एकस्मात्कटिप्रदेशादनंतपरिमाणाउ
ईमुदरातायथोदितो दरः अपरापर्यथोदिता दिव्यपादाः तत्रैकस्मि
न्सर्वे नेत्रद्वयमिति विरोधः

॥ अभिनवगुप्तकृतटीका १ ॥

स्पष्टार्थं १९

॥ परमार्थप्रपाटीका १ ॥ शक्तिं अनंताबाह
न विद्यते आदिमध्यांता यस्य अनंतवीर्यमनंतश वेदसूर्यौनेत्रय
वो यस्य शशिसूर्यनेत्रं सान्त्वितवर्तमानो पूर्णो दीप्तहुताशं ज्वलद्
स्य यद्वा शशिसूर्ययोरपि नेत्रभूतं दीप्तहुताशं संतापयंतं जगत्सं
त्रिवक्त्रं स्वस्य स्वतेजसा इदं विश्वं तपंतं संतापयंतं
हारकं तमिव प्रहृतं पश्यामि १९

किंच स्वजनमात्रहिंसाभयाद्युणात्रिवृतेन कालरूपपर
मेश्वरदर्शनप्रार्थनया
त्रैलोक्यहिंसापि मयैव
कारितेति मन्यमानः प
श्चात्तापमनुवदन्नाह
अनादीति ॥

वनमाली टीका १

आदिकारणमिमध्यं स्थितिरंतो नाशस्तद्रहितं अनादिमध्यांतं अ
नंतं वीर्यं प्रभावो यस्य तं अनंताबाहवो यस्य तं उपलक्षणमेतत्
अनंतवीर्यप्रभावो यस्य तं यद्वा शशिवत् सूर्यवच्च प्रसा
दुकादीनां शशिसूर्यौ नेत्रे यस्य तं यद्वा शशिवत् सूर्यवच्च प्रसा
दप्रतापयुक्तानि नेत्राणि यस्य तं देवादीन्भक्तान्नमस्कारादिकं
कुर्वतः प्रसादेन तद्विपरीतान् रागतसादीन्प्रतिप्रतापेन रक्तोसिभी
तानि दिशो द्रवंति सर्वे नमस्यंति च सिद्धसंघा इति वक्ष्यति दी
प्तहुताशो यस्य वक्त्रं यस्य तं स्वतेजसा
लोकहुताशोपि वक्त्रं यस्य दीप्तहुताशवद्दाववक्त्रं यस्य तं स्वतेजसा १९
विश्वमिदं तपंतं संतापयंतं त्वां पश्यामि

द्यावापृथिव्योरिदमंतरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः
ज्ञानाद्युपयोगादित्यादि नहिप्रयतात्मि
इत्यर्थः

किंच अनादिमध्यांतमिति नास्ति आदिरुत्पत्तिर्मध्यं स्थितिरंतो
विनाशो यस्य स तथा तं अनंतवीर्यं अनंतानि वीर्याणि तदुपल
क्षितानि समग्रगुणशक्त्यैश्वर्याणि यस्य स तथा तं अनंतबाहुं
अनंता अगणिता बाहवस्तदुपलक्षिता शिरोजठरपादादयश्चाव
यवा यस्य स तथा तं शशिसूर्यनेत्रं शशिसूर्योपमानि प्रसादक्रूर
रूपाणि नेत्राणि यस्य स तथा तं सुभक्तदेवादिषु प्रसन्ननेत्रं अभक्ता
सुरादिषु क्रूरनेत्रं रक्तासिभीतानि ततो दिशो द्रवंति सर्वे च
सिद्धसंघा इति वक्ष्यमाणात् दीप्तहुताशवक्रं दीप्तहुता
शोपमानि संहारानुगुणानि वक्त्राणि यस्य स तथा तं स्वतेजसा
विश्वमिदं तपंतं स्वकीयेन तेजसा परानभिभवता सर्वमेनं विश्व
तपंतं संतापयंतमेवंभूतं त्वां पश्यामि अर्जुनस्य वाक्यकवि
स्मृतिलक्षणविस्मयाविष्टतास्थानदोषाय भवति प्रमादे विस्म
ये हर्षे द्विस्त्रिरुक्तं न दूष्यतीति वचनात् १९

मधुसूदनी टीका १९

किंच [illegible] आदिरुत्पत्तिः मध्यं स्थितिः अंतो
विनाशः तद्रहितमनादिमध्यांतं अनंतवीर्यप्रभावो यस्य तं अनं
ता बाहवो यस्य तं उपलक्षणमिदं मुखादीनामपि शशिसूर्यौ नेत्रे
यस्य तं दीप्तहुताशवक्रं यस्य वक्त्रेषु दीप्यमानो वह्निः स्वतेजसा विश्वमि
दं तपंतं संतापयंतं त्वां पश्यामि [illegible]
१९

[illegible] टीका ११

आदिर्मध्यं तथांतश्च यस्य ते नास्ति कर्हिचित् अपरिछिन्नवीर्यमनं
ता यस्य बाहवः १ नेत्रे यस्येंदुसूर्यौ प्रदीप्ताग्निसमानने स्वतेज
साखिलं विश्वं तापयंतमिदं तथा २ तं त्वां पश्यामि विश्वेशमाश्चर्ये
न जगत्त्रये १९

नीलकंठी टीका १९

एतदेवाह अनादीति देशतः कालतश्चादिमध्यांतहीनत्वादनादि
मध्यांतं दीप्तहुताशवक्रं यस्यातिभास्वर[illegible] त्वां स्वतेजसा वि
श्वं तपंतं ज्योतिषा इदं विश्वं विश्वरूपं तपंतं प्रकाशयंतं अनादित्वादि
विविशेषणविशिष्टं विश्वं तेजसि कर्मीभूतं तं त्वां परं ज्योतीरूपं
पश्यामि जानामि चित्रपटस्थानीयं विश्वरूपं सकलकार्यकारणात्मकं
वासनात्मकं येन ज्योतिषा प्रकाशितं तेन देव त्वमसीति जानामीति भावः १९

श्री॰
गी॰ टी॰
८

[illegible] आनंदीटीका

स्फुटोर्थः [illegible] १९॥

[illegible] रामकंठीटीका

अतएव — अनंततादाद्यंतमध्यरहितं अवच्छेदस्य हि वस्तुन आद्यादि विभागव
त्त्वमित्यर्थं जगत्प्रपंचविरचनसामर्थ्यं वीर्यमनंतं न कदाचिन्निहतं यस्य
तं तथा सर्वैते ज्ञानेंतत्तत्क्रियासाधनभूता ये [illegible] बाहवस्ते पार
मार्थिकस्यैव कर्तुः परमेश्वरस्य संबंधिन इत्यनंतबाहुत्वं तथा लेश
त्ताशरीरेवदवयवा नियतविषयप्रकाशने क्रियंत इति शशिसूर्यने
त्रं तथा क्रियावद्भिर्विविधैर्ज्ञानक्रियाविशेषैर्व्याप्तनरो विश्वमूर्तिः
परमेश्वरस्यैव कल्प्यंते इति तमेव दीप्तहुताशोऽग्निर्वक्त्रमित्यर्थं त
थास्वतेजसा संविद्रूपेणा तेजसा ज्योतिषां सर्वमिदं तपंतिद्योतयंतमि
वंविधं विश्वात्मानं त्वां प्रपश्यामीति संबंधः [illegible]
[illegible] १९॥

लाक्षिकी [illegible]टीका

किंच — आदिमध्यावसानरहितं त्वमपरिच्छिन्नवीर्यमपरिच्छिन्नबाहुं शशिसू
र्यौ नेत्रे यस्य तं दीप्तहुताशो वक्त्रं यस्य तं तथेदमिदं नावथार्थं विश्वंभ
जगत्त्रयं तं विद्याम्या प्रकाशयंतं एवंविधं विराजं अहं त्वामेव प्रव
रेण प्रणामपलभे [illegible] १९॥

पंचोलीटीका

अनादीति हे भगवन् अहं त्वामेवंविधं पश्यामि कथंभूतं त्वां अनादि
मध्यांतं न विद्यते आदिर्मध्यमंतो यस्य सः उत्पत्तिस्थितिविनाशर
हितमनंतवीर्यं यस्य सः तं अनंतवीर्यं अनंतबाहुं अनंता बाहवो यस्य
सः तं शशिसूर्यौ चंद्रादित्यौ नेत्रे यस्य सः तं दीप्तहुताशवक्त्रं दीप्तहु
ताशो अग्निर्वक्त्रं मुखं यस्य सः तं स्वतेजसा स्वकीयेन तेजसा इदं स
मस्तं विश्वं तपंतं तापयंतं १९

भाषा अनुवाद

और अनादि मध्यान्त करि उत्पत्ति स्थिति लय रहित औ अन
न्त प्रभाव तथा अनन्त बाहु औ चन्द्र सूर्य है नेत्र जिस के
ऐसे तुम को हम देखते हैं और अग्नि जिस के मुख मे ज्वल
त्समान है ऐसे आप अपने तेज से इस विश्व को सन्तप्त कर
ते हुये तुम को मे देखों हों १९

चोपई

आदिमध्य अंत बिन वीर्यअनंत बाहुअनंत शशीरविनेत्र लखं
त लखों तोहि दीप्त अग्निसममुखको तेज हि सें निजइहज
गतपतको १९

63

द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन
दिशश्च सर्वाः दृष्ट्वाद्भुतं रूपमिदं तवोग्रं
लोकत्रयं प्रव्यथितं महात्मन् २०

शाङ्करभाष्यटीका १

द्यावापृथिव्योरिति द्यावापृथिव्योरिदमन्तरं हि अन्तरिक्षं व्याप्तं त्वयैकेन विश्वरूपधरेण दिशश्च सर्वा व्याप्ताः दृष्ट्वा उपलभ्य अद्भुतं विस्मापकं रूपमिदं तव उग्रं क्रूरं लोकत्रयं लोकानां त्रयं लोकत्रयं प्रव्यथितं भीतं प्रचलितं वा हे महात्मन् अक्षुद्रस्वभाव २०

आनन्दगिरिकृतटीका २

प्रकृतभगवद्रूपस्य व्याप्तिं व्यनक्ति द्यावापृथिव्योरितीति तस्यैव भयङ्करत्वमाचष्टे दृष्ट्वेति २०

स्वामिकृतटीका ३

किंच द्यावापृथिव्योरिति द्यावापृथिव्योरिदमन्तरमन्तरिक्षं त्वयैकेन व्याप्तं दिशश्च सर्वा व्याप्ताः अद्भुतमदृष्टपूर्वं त्वदीयमिदमुग्रं घोरं रूपं दृष्ट्वा लोकत्रयं प्रव्यथितमतिभीतं पश्यामीति पूर्वस्यैवानुषङ्गः २० ॥

पैशाचभाष्यटीका ४

स्पष्टार्थः २० ॥ ॥ ॥

पवंभूतं त्वां दृष्ट्वा देवादयोऽहं च प्रव्यथि ताभवामेत्याह ॥

रामानुजभाष्यटीका ५

द्यावेति द्युशब्दः पृथिवीशब्दश्च उभाउपरितनानामधःस्थानां च लोकानां प्रदर्शनार्थौ द्यावापृथिव्योरन्तरमवकाशः यस्मिन्नवकाशे सर्वे लोकास्तिष्ठन्ति स सर्वोऽप्यवकाशो दिशश्च सर्वास्त्वयैकेन व्याप्ताः दृष्ट्वाद्भुतं रूपमुग्रं तवेदं अनन्तायामविस्तारमद्भुतमत्युग्रं च रूपं दृष्ट्वा लोकत्रयं प्रव्यथितं युद्धदिदृक्षयागतेषु ब्रह्मादिदेवासुरपितृगणसिद्धगन्धर्वयक्षराक्षसेषु प्रतिकूलानुकूलमध्यस्थरूपं लोकत्रयं सर्वं प्रव्यथितं अत्यन्तभीतं महात्मन् अपरिच्छेद्यमनोवृत्ते एतेषामप्यर्जुनस्येव विश्वाश्रयरूपसाक्षात्कारसाधने दिव्यं चक्षुर्भगवता दत्तं किमर्थमिति चेत् अर्जुनाय ऐश्वर्यं सर्वं प्रदर्शयितुमत इदं

श्री॰ गी॰ टी॰ पं॰

मुच्यते दृष्ट्वेति २॰ ॥ अभिनवगुप्तकृतटी॰ १ ॥

स्पष्टार्थः २॰ ॥ ॥ ॥ ॥

परमार्थप्रपाटीका॰ ७

द्यावापृथिव्योरिति द्यावापृथिव्योरंतरमंतरिक्षं त्वयैकेनैव व्याप्तं तथा सर्वा दिशश्च व्याप्ताः भो महात्मन् विश्वरूप एवमेतादृशमद्भुतं च रूपं दृष्ट्वा लोकत्रयं प्रव्यथितं प्रकर्षेण संहारं यातमिव पश्यामि श्रुतिरपि वाजसनेयसंहितायां परीत्य भूतानि परीत्य लोकान् परीत्य सर्वाः प्रदिशो दिशश्च उपस्थाय प्रथमजामृतस्यात्मनात्मानमभिसंविवेश भाष्ये ऋतस्य सत्यस्य परब्रह्मणः प्रथमजा प्रथमं जातं शिवलत्वेनोपस्थितोऽतं तु उपस्थायाधिष्ठाय आत्मना स्वरूपेण कृत्वा आत्मानं च अभितः सं विश्वं प्रविष्टवान् किं कृत्वा भूतानि पृथिव्यादीनि परीत्य अभिव्याप्य लोकान् भूर्भुवः स्वरादीन् दिशः प्रदिशश्चेति निरुक्त २॰

वनमाली टीका॰ ८

रणस्यापि भगवद्विग्रहस्य व्याप्तिमाह द्यावेति द्यावापृथिव्योरिदमंतरिक्षं हि एवं त्वयैकेन व्याप्तं दिशश्च सर्वाः व्याप्ताः दृष्ट्वाद्भुतमत्यंतविस्मयकरमिदमुग्रं दुरधिगमं महातेजस्वित्वात्तव रूपमुपलभ्य लोकत्रयं प्रव्यथितं प्रसन्न भीतं जातं हे महात्मन् साधूनामभयदायकं ग्रणत्वमहत्त्वाद्यनंतपरिमाणानां समावेशैकत्र लोके विरुद्धोपि भगवत्यविमृश्यत्वान विरुद्धः विचित्रशक्तिः पुरुषः पुराण इति स्मार्त्तात्मनि चैवं विचित्राश्च हि इति सूत्रेण च भगवत्यचिंत्यशक्तेः कृतत्वात् नवाक्तत्वं संसारित्वादिकमप्यविमृश्यत्वात् समावेशयितामिति वाच्यं प्रविरोधोपपादकैस्य परोचित्रापि नामेव समावेशाणीकरात् अप्रत्वादीनामैश्वर्यविरोधित्वात् २॰

उत्तमवैजयन्तीटीका॰ ९

अथ विश्वरूपस्य भगवतो विश्वव्याप्तिरूपत्वेनात्यंतमद्भुतं तद्रूपमवलोक्य सर्वे विस्मिताः सन्तः प्रव्यथिता भवन्ति तथाऽहमपीत्याह द्यावेति दशभिः द्यावापृथिव्योरिति द्यावापृथिवीभ्यामुपलक्षितानामुपर्यधःस्थानां समस्तदिगंतानां तल्लोकानामंतरं यत्र सर्वेपि लोकास्तिष्ठन्ति तत्सर्वमंतरिक्षमेकेनैव त्वया व्याप्तं तथा सर्वाः पूर्व दक्षिण

पश्चिमोत्तरादिशश्चकारादस्मादिविदिशोपिव्याप्ताः तवविश्वरूपस्ये
दंनियंतावच्छेदश्शून्यंउग्रंभयावहं अद्भुतमदृष्टपूर्वमनेनतायामवि
ल्लारूपंविश्वकारंदृष्टोपलभ्यहे महात्मन् अपरिच्छेद्यवायोत्रे
हते यद्वा स्वजनानाभयकरइतः परमिदमुपसंहरस्वाशयः लो
कत्रयंलोकानांस्वर्गादीनांत्रयंत्रिपरिमितं यद्वा लोकानामित्रामि
त्रोदासीनानांत्रयंप्रव्यथितमत्यंतपीतंदृष्टोत्मनेनात्रेनसेवस्त
नात्सुरगंधर्वादीनामपिभगवदेतद्दिव्यदृष्टित्वसूचितं २०

प्रकृतस्यभगवद्रूपस्यव्याप्तिमाह ॥

मधुसूदनीटीका· १०

द्यावापृथिव्योरिदमंतरमंतरिक्षंहि एवत्वयैवैकेनव्याप्तंदिश
श्चसर्वाः व्याप्ताः दृष्ट्वाद्भुतमत्यंतविस्मयकरमिदमुग्रंउग्ररूपंतामे
महात्तेजस्विनस्तवरूपमुपलभ्यलोकत्रयंप्रव्यथितमत्यंतभी
तंजातं हेमहात्मन् साधूनामभयदायकइतः परमिदमुपसं
हरइत्यभिप्रायः २०

महानंदी टीका· ११

विश्वरूपस्तनाव्याप्तंद्यावाभूम्योर्यदंतरंदिशः सर्वास्त्वयैकेनव्या
प्तास्तेरूपमीदृशं १ अतिविस्मापकंदृष्ट्वामहातेजस्वतस्तवउग्र
रूपमिदंलोकत्रयंभीतमतीवच २ साधूनामभयंदेहि [illegible]व
महात्मनयाहरे २०

नीलकंठी टीका· १२

एवंस्वयंकृतविश्वरूपदर्शनेनकृतकृत्योभूत्वातदुपसंहारमि
च्छन्स्तौति द्यावापृथिव्योरिति हेमहात्मन्हियस्मात्त्वयाए
केनइदंद्यावापृथिव्योरंतरंमध्यंसर्वाः दिशश्चव्याप्ताः अतस्तवे
दमद्भुतमुग्ररूपंदृष्ट्वालोकत्रयंप्रकर्षेणव्यथितं अतः परमिद
मुपसंहरेत्यभिप्रायः २०

आनंदीटीका

स्पष्ट सर्वसर्वव्यापकंपरमेश्वरस्वरूपंनिरूप्यजगत्संहारकंघोरं
कालरूपंदृष्ट्वाह २०॥

रामकंठीटीका

अथसर्वशक्तेः परमेश्वरस्याशक्तनेसेन्यसंहारप्रस्तनकालात्वेशक्तियुक्तत्वाद्घोरत्वविशि
ष्टंरूपंवर्णयति यस्मान्महतारूपेणगगनभूम्यंतरालेसर्वाश्चककुभस्त्वयैकेनव्याप्ताः
तमाह॥ इतितात्तदिदमीदृशंतवघोरंरूपंदृष्ट्वालोकत्रयंत्रैलोक्यनिवासितद

र्शनयोऽप्देवादिरूपंप्रव्यथितंप्रकर्षेणाभीतमेवंमहात्मन्निति रूपम
हत्तापेत्तमामंत्रणं [illegible] ॥

लासिकी [illegible] टीका

तथा द्यावापृथिव्योरिदमंतरमंतरितम् तथा सर्वा दिशश्च त्वयैकेनैवस्व
राविराट्त्वमापन्नेन व्याप्तम् यदुक्तम् यस्याग्निरास्यं द्यौर्मूर्धा खं ना
भिश्चरणौ क्षितिः सूर्यश्चक्षुर्दिशः श्रोत्रं तस्मै लोकात्मने नमः ए
वमिहैकस्थमिति विपापा प्रतिज्ञाते भगवतोऽपवर्गायं अधुनायच्चा
न्यद्द्रष्टुमिच्छसीति प्रतिज्ञातेनतदेव सर्वप्राक्तेः परमेश्वरस्य उग्रहैस
र्वसंहारप्रवृत्तं कालाख्यं घोरं रूपमद्भुतं वर्णयितुमाह दृ
ष्टेति अद्भुतं विस्मापकमिदं दृष्ट्वैवमपि अथ तावपि भवः स्फुर
दिव तव घोरं रूपं दृष्ट्वा मालात्कृत्य लोकत्रयं प्रव्यथितमतिभीतं प्र
पश्यामीति पूर्वेणैवान्वयः हे महात्मन् विश्वरूप [illegible] २० ॥ ॥

पंचोलीटीका

प्रकृतस्य भगवद्रूपस्य व्याप्तिमाह द्यावेति हे महात्मन् हि यस्मा
त् द्यावापृथिव्योरिदमंतरमंतरिक्षं मध्यभागः त्वयैकेन वि
श्वरूपेण व्याप्तं तथा सर्वा दिशश्च व्याप्तास्तव इदमुग्रं क्रूरं अद्भुतं
विस्मयकरं रूपं दृष्ट्वा लोकत्रयं प्रव्यथितं भीतं चलितं च २०

रसावीरसमिद्धाथिनी॥

अथ भगवतो घोरतरं रूपं वर्णयति द्यावेति द्यावापृथिव्योरिदं
यदंतरमवकाशस्तदेव त्वयैकेन मता सर्वतः केवलेन व्याप्तम
पि तु सर्वाश्च दिशो वकाश मर्यादा अप्येकत्वेनैव व्याप्ता इति सर्व
व्याप्यव्यापकत्वलक्षणविशिष्टमिदमद्भुतमलौकिकचमत्का
रसंपन्नं तवोग्रं घोरतरमचिंतितं दृष्टमतएवातिदृष्टमपि रूपं दृ
ष्ट्वा लोकत्रयं प्रव्यथितं प्रकर्षेण भयचलितं भवतीत्यर्थः २०॥

किंचानादिमध्यांतमनवच्छिन्नमहिमत्वादनंतप्रवानंतवीर्यमनं
तमविनाशिवीर्यं विश्वबीजाख्यं सामर्थ्यं यस्य शक्तिमत्वात्तथानं
तबाहुमनंतामर्यादावद्धिताबाहवो विश्वरचनात्मका यस्य तमनं
तबाहुं शशिसूर्यनेत्रं ताभ्यामेव विनादस्वरूपस्य च लक्षमत्वात्
दीप्तहुताशवक्त्रं दीप्तहुताशः प्रद्युतवैश्वानरस्तद्वत्स्वदीप्तं वक्त्रं य
स्य तं तथेदं देहेंद्रियादिसंघातात्मकं विश्वरूपं यत्तदपि स्वतेजसा
स्वप्रकाशेन तपंतं प्रकाशयंतमेतादृक्स्वरूपेण विश्वात्मानं त्वामि
दानीं पश्यामि साक्षात्करोमी त्यर्थः १९॥

मधुभाष्य

त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं
निधानं त्वमव्ययः शाश्वतधर्मगोप्ता स
नातनस्त्वं पुरुषो मतो मे १८ ॥

शाङ्करभाष्यटीका १

इत एव ते योगशक्तिदर्शनादनुमिनोमि त्वमिति त्वमक्षरं न क्षरती
ति परमं परं ब्रह्म वेदितव्यं ज्ञातव्यं मुमुक्षुभिः त्वमस्य विश्वस्य स
मस्तस्य जगतः परं प्रकृष्टं निधानं निधीयते अस्मिन्निति निधानं प
रमाश्रय इत्यर्थः किञ्च त्वमव्ययो न च तव व्ययो विद्यत इति अव्ययः
शाश्वतधर्मगोप्ता शश्वद्भवः शाश्वतो नित्यो धर्मस्तस्य गोप्ता शा
श्वतधर्मगोप्ता सनातनश्चिरन्तनस्त्वं पुरुषः परमो मतोऽभिप्रेतो मे
मम १८

आनन्दगिरिकृतटीका २

सप्रपञ्चे भगवद्रूपे प्रकृते प्रकरणविरुद्धत्वमक्षरमित्यादिनिरु
पाधिकवचनमित्याशंक्याह इत एवेति योगशक्तिरैश्वर्यातिशयः
न क्षरतीति निःप्रपञ्चत्वमुच्यते परमपुरुषार्थत्वात् परमार्थत्वाच्च
ज्ञातव्यत्वं यस्मिन् द्यौः पृथिवीत्यादौ प्रपञ्चायतनस्यैव ततो निकृ
ष्टस्य ज्ञातव्यत्वश्रवणात् कुतो ब्रह्मणो ज्ञातव्यत्वं तत्राह त्वमस्येति
निःप्रपञ्चस्य ब्रह्मणो ज्ञेयत्वे हेत्वन्तरमाह किञ्चेति अविनाशि
त्वात्तवैव ज्ञातव्यतातिरिक्तस्य नाशित्वेन हेयत्वादित्यर्थः ज्ञानकर्मा
त्मनो धर्मस्य निमित्ते वेदप्रमाणकत्वे धर्मस्थापनयनार्थाय सम्भ
वामीत्युक्तत्वाद्गोप्तारं विना १८

स्वामिकृतटीका ३

यस्मादेवं तवातर्क्यमैश्वर्यं तस्मात्त्वमक्षरमिति त्वमेवाक्षरं परमं ब्रह्म
कथंभूतं वेदितव्यं मुमुक्षुभिर्ज्ञातव्यं त्वमेवास्य विश्वस्य परं निधानं नि
धीयतेऽस्मिन्निति निधानं प्रकृष्ट आश्रयः अत एव त्वमव्ययो नित्यः
नित्यस्य शाश्वतस्य धर्मस्य गोप्ता पालकः सनातनश्चिरन्तनः पुरुषो मम सम्म
तोऽसि १८

पैशाचभाष्यटीका ४

श्री
गी·टी·
ए

59

स्पष्टार्थं ३८

रामानुजभाष्यटीका· ५

त्वमिति उपनिषत्स्वादिदेवेति व्यपदिश्यमानादिषु वेदितव्यतया निर्दिष्टं पर
ममक्षरं त्वमेव विश्वस्य परं निधानं विश्वस्यास्य परमाधारभूतस्त्वमेव त्व
मव्ययैश्वर्यसहितः यत्स्वरूपायत्तगुणो यद्धि भवद्वन्तेनैव रूपेण सर्वदा
वतिष्ठसे शाश्वतधर्मगोप्ता शाश्वतस्य नित्यस्य वैदिकस्य धर्मस्य त्वमादि
भिरवतारैस्त्वमेव गोप्ता सनातनस्त्वं पुरुषो मतो मे वेदाहमेतं पुरुषं म
हान्तं परामरं पुरुषमित्यादिषूदितः सनातनः पुरुषस्त्वमेवेति मम मतः
यदुकुलतिलकस्त्वमेव भूतैर्विदानीसात्ताततत्कृतो मयार्थः ३८

अभिनवगुप्तकृतटीका· ६

यत्समस्तक्रियाज्ञानयोरुभयोरपि भेदाप्रतिभासात्मके परमगुरौ महा
देवे परिणते तथा सत्तात्मके प्रकाशरूपे शीले सततं वेविद्यते येषां ते सा
त्वताः तेषां धर्मी नवरत्नग्रहणसमासपरत्वात् ष्ठि संहारविषयः
सकलमार्गाणां लोकोपायते एतद्देवाग्रत्यायरहस्यं प्रायशो देवी
स्तोत्रविवृतौ मया प्रकाशितं तत्तत्स्फुटदृष्टैः सोपदेशैः स्वयमेवावगम्य
ते इति किं पुनः पुनः स्फुटतरप्रकाशनवाचालतया ३८

परमार्थप्रपाटीका· ७

अथाप्रमेयत्वमेवाह त्वमक्षरमिति न क्षरतीत्यक्षरं परं ब्रह्म त्वमे
व परमं मासेतिके वेदितव्यं मुमुक्षुभिर्ज्ञातव्यं यस्मिन् ज्ञाते सर्वमि
दं विज्ञातं भवतीत्यर्थः त्वमस्य दृश्यमानस्य विश्वस्य परं उत्कृष्टं निधा
नं निधीयते यस्मिन् प्रकृष्ट आश्रयः अव्ययो नित्यः शाश्वताये मो
त्तमाप्रकाधर्मास्तेषां गोप्ता रक्षिता तान्निर्वाहकः सनातनः पुरातनः
इत्यनिहितेन कालरूपपरमेश्वरदर्शनप्रार्थनमार्थनया त्रैलोक्य
हिंसापि मय्येव कारितेति मम मानः पश्चात्तापमन्त्रवदत्राह अनादी
ति ३८

वनमालीटीका· ८

सकलश्रुतिसर्वस्वं त्वमेवेत्याह त्वमिति त्वमेवाक्षरं न क्षरतीति स्वरू
पतो धर्मतो देहवत् स्वनाशादिविकाररहितं परमं वेदितव्यं मुमुक्षु
भिर्वेदान्तश्रवणादिना त्वमेवास्य विश्वस्य परमुत्कृष्टं निधीयतेऽस्मि

श्रितिनिधानमाश्रयः त्वमव्ययः सदैकाकारः शाश्वतस्य नित्यस्य वेदप्रति
पाद्यतयास्य धर्मस्य गोप्ता पालयिता अत एव सनातनश्चिरंतनः पुरु
षोऽत यो मीषूर्णोनेन गुणेन यः परमात्मा स एव त्वं वसुदेवतनय एवंभू
तो मे मम मायमतो विदितोसि १८

ऊहमवैजयन्तीटीका ४

एवमस्मिन्माने तान्तर्कामहिमत्वेन परमेश्वरासाधारणेन गुणेन भग
वंतं निश्चिन्वन्नाह त्वमक्षरमिति अथ परा यया तदक्षरमधिगम्य
ते यत्तदद्रेश्यं हे विद्ये वेदितव्यं इत्यादिवेदान्तवाक्यैर्मुमुक्षुभिर्वेदित
व्यत्वात्तत्त्वं परमेसर्वपरं यद्वा परा सर्वोत्कृष्टा मा लक्ष्मीः शोभा वि
द्यते यस्य ततं अतरं नित्यब्रह्मस्वरूपत्वमेवासि अस्य चेतनाचेतनात्म
कस्य विश्वस्य परं प्रकृष्टं निधानं निधीयतेऽस्मिन्निति निधानमाश्रयः
त्वमेवासि अत एव अव्ययः अपरिहीनस्वरूपगुणशक्तिविभवा
त्वमेव शाश्वतस्य नित्यस्य वेदोक्तधर्मस्य गोप्ता एवमादिभिर्वक्ता
रैः पालयिता त्वमेव यद्वा हे शाश्वत नित्येति संबोधनं सनातनस्थिरं
तनः पुरुषो यः परमात्मा स इदानीं यदुकुलेऽभिजातोऽराजत्वमेव
मे मया अयमतो विदितोसि १८

मधुसूदनीटीका १० श्रीनादत्तमिनोमि ॥

एवं तवातर्कणीयनिरतिशयैश्वर्यदर्शनात् मुमुक्षुभिर्वेदान्तश्रवणादिना त्वमे
त्वमेव अक्षरं परमं ब्रह्म वेदितव्यं मुमुक्षुभिः निधीयतेऽस्मिन्निति निधानमाश्रयः अतए
वास्य विश्वस्य परं प्रकृष्टं निधीयतेऽस्मिन्निति वेदप्रतिपाद्यतयास्य धर्मस्य गो
व त्वमव्ययो नित्यः शाश्वतस्य नित्यस्य तस्मिन्नाशे वा यो विनाशरहि
मापालयिता शाश्वते नित्ये संबोधनं वा परमात्मा स एव त्वमे
तः अत एव सनातनः चिरंतनः पुरुषो यः परमात्मा
मतो विदितोसि १८ ॥

सदानंदी टीका ११

एवं तवामतर्क्यश्रीतेजऐश्वर्यदर्शनात् इत्थंशास्त्रोऽन्यथानुपपत्त्या
सम्यगनुमिनोम्यहं १ त्वमक्षरं परं ब्रह्म वेदितव्यं मुमुक्षुभिः वेदा
न्तादिषु नेः सम्यग्वेदान्तश्रवणादिना २ विश्वस्यास्य समस्तस्य परो
त्कृष्टं त्वमाश्रयः अत एवासि नित्यत्वं शाश्वतधर्मरक्षकः ३ धर्म
स्य नित्यवेदेन प्रतिपाद्यतयास्य च त्वं हि पालयिता नाशशून्यत्वात्
स्मात् चिरंतनः ४ परमात्मासि पुरुषो विदितो मे परात्परः ५ १८

नीलकंठी टीका १२

श्री॰
गी॰ टी॰
टी॰

एवं तव योगैश्वर्यदर्शनात्त्वामेवमेवमीतिवदन्नप्रमेयत्वमेव विवृ
णोति त्वमिति परमं अक्षरं [illegible] अस्थूलादिलक्षणं अक्षरं ब्रह्म प
रममित्यत्र प्रागुक्तं निष्कलं ब्रह्म तदेव त्वमसि एतेन सगुणरूपस्य
निर्गुणज्ञापकत्वमुक्तं शास्त्रारम्भस्यैव वेदज्ञापकत्वे अतएव वेदित
व्यं वेदान्तप्रमाणेन ज्ञातुं योग्यं न तु पामसीयं सगुणं ब्रह्म व्यापितमेव
माह त्वमस्येति निधानं लयस्थानं एतेन कारणत्वमुक्तं अव्ययः
अमृतः देवत्वात् शाश्वतस्य वैदिकस्य धर्मस्य गोप्ता एतेन कार्यब्र
ह्मभूतहिरण्यगर्भरूपत्वमुक्तं सनातनः स्थिरतत्त्वोऽनादिः पुरुषो
जीवात्मासोपि त्वमेवेति मम मतः एवं विश्वरूपदर्शनेन जीवब्रह्म
णोरैक्यं शास्त्रविद्यावेदइवाधिगम्यत इत्युक्तं १८

यस्मात्कृष्णेन तदेवं प्रत्यक्षीकृत्याह ॥

आनंदीटीका

तस्मादिति निर्देशादितिवत्समासोक्तस्यादिति ब्रह्म नाम न द्विद्यते यस्मि
न्निति सत्त्वात्परमेश्वरः स एव तायेषां ते सातताः ब्रह्म विदितव्यो ध
र्मस्य ज्ञानकर्मसमुच्चयानुष्ठानस्य गोप्ता मतो मे इति यत्त्वया नीरि
यं व्याख्यातं तदद्य सर्वं मया प्रत्यक्षीकृतमित्यर्थः १८

अतएव परमेश्वरप्रतिपादकानि विशेषणानि

रामकंठीटीका

निजस्वरूपस्य प्रतिपादयितुमाह ॥

अक्षरं स्वरूपप्रच्युतिलक्षणनाशरहितं यत्परमं निरतिशयं वेद्यं ज्ञेयं यत
स्तत्त्ववान् तथास्यानेतस्य विश्वस्य जगतः प्रकृष्टं निधानं तथैव सर्वं तव
जगन्निविशते न त्वां क्षितिजगतो निधानं प्रधानं यत्र तत्प्रलये निधीयते
सत्यमस्मिन् तत् प्रधानं तदपि परमकारणे भगवति निधीयते तत एव
च प्रभवतीति प्रधानस्यापि निधानत्वात् परमं निधानं जगतः इत्युक्तं
तथा कालावच्छेदाविषयत्वादव्ययोऽव्ययः सात्वतधर्मगोप्तात्वं सदि
ति ब्रह्म नाम यदस्ति ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत इति
तद्विद्यते यस्य सत्त्वात्परमेश्वरः परं ब्रह्म स एव तायेषां ते सातताः ब्रह्मवि
दस्तेषां धर्मो यया प्रतिपादितज्ञानक्रियासमुच्चयानुष्ठानरूपः सदाचा
रस्य गोप्ता कालापचयवशात्तिरोभूवतः पुनः पुनः प्रादुर्भावनात्
दायकविघ्नविघटनाद्रक्षिता त्वमेव [illegible] ॥

अस्मिन्द्यावापृथिवी अंतरेव समाहिते उभावग्निश्च वायु
श्च सूर्याचंद्रमसावुभाविति कलस्य गर्भं जगतोभिमखे
मत्स्यालिप्रदाय पृतिकृग्णाफणातपत्रमिति च भागवते
न चैतद्युक्तं अचिन्त्यशक्तित्वादीश्वरस्य अचिन्त्याः खलु ये
भावा न तांस्तर्केण योजयेत् इति च श्रीविष्णुपुराणे नैषा
तर्केण मतिरापनेयेति च श्रुतिः अतिप्रसंगस्तु महतामप्य
र्थवधारणुकरवलावापनेयः नहि घटवत्कश्चिदपि पदा
र्थो न दृष्ट इत्येतावता प्रमाणदृष्टः स निराक्रियते केवलवि
रोधश्रुतवाक्यव्यवस्था अचिन्त्यशक्तित्वाभावादंगीक्रियते
गुणाः श्रुताः सविकल्पाश्चैव संत्यश्रुता अपि नैवाचषाको
चिन्त्या अचिन्त्याः श्रुतार्थैव दोषाः श्रुताश्चनानैहितयाप्रती
ताः एवं चेत्यत्र श्रुताश्रुतानां गुणागुणानां चक्रमाद्यवस्थि
तिर्जाबालश्रुतिविलेषु उपावारवपरिहारायतमध्यमिति
अन्यथा यताभावेनैव तत्सिद्धेः विश्वरूपः एकरूपः स
विश्वरूपोऽनन्तरूपो यतोयं सोऽनंतो नहि नाशोस्ति तस्येति
शांडिल्यशाखायां अनन्तलोके श्रुतिः मितश्चांकामध्याकते
ति अप्रमेयमिति प्रपि सूर्यनेत्रमित्यप्येकं कविदित्यादि
वत् तदंगजाः सर्वकृत्यादयोपि तस्मात्तदंगोत्थविभिन्नता
स्नेऽस्य वेदाविलेषु चंद्रमा मनसो जातश्चक्षोः सूर्यो अजा
यतेति च बहुरूपत्वात् बहूनामप्येवं चतेषां युक्तं मातापितृ
रंतरंगः स एष एकरूपेणावान्यैः सर्वगतः स एक इति
वारुणश्रुतेः एकेनैव रूपेण द्यावापृथिव्योरंतरव्याप्तो भ
वति पश्य मे पार्थ रूपाणि इति बहूनि रूपाणि प्रतिज्ञातानि
मातापितरो पृथिवी द्यावो मनो माता पृथिवी उमतो यात म
उभौ रक्षनः पितेत्यादिप्रयोगात् न च नियमतो भयप्रदंत

स्वरूपं नारदस्य तदभावात् केषांचित्तथा दर्शयति भगवा
नूषीयंति केचित्तस्य रूपदर्शने विभेति कश्चिद्दृश्यमेतत्सर्वंट
मिरिति वा करणग्रावाचा नवतं सर्वे पश्यंति श्रद्धादि
तांत्रिरूप्यमयेद्दृश्यत्वा प्रतिभाति तथा च गोतमो विलेख
दृष्ट्वेदं मोदमानाश्रद्धाप्यतद्दया हिम्यतो हृश्चवते प
श्यति तन्यत्त्वद्धर्मत्वात् तस्मिन्नेवैते मनसो गततत्वा
दिति यमांतरज्ञानार्थमेव को भवानिति पृच्छति यथा क
श्चित्किंचिन्नामादिकं ज्ञानन्नपि जानाति ज्ञानार्थं पृच्छति
कस्त्वमिति यदि तदेव न जानाति तर्हि विस्मापितिं संबोधनं
स्यात् नमस्त्वमित्यादिव ॥२०॥

भाषा अनुवाद

और हे महात्मन् स्वर्ग औ पृथिवी तथा अन्तरिक्ष और सकल दिशा एक आपसे व्याप्त हैं सो यह उग्र रूप आपका देखिके त्रैलोक्य भय खाता है २०

चौपई

भूमि अकाश होउ अभिअंतर एक तोसें सम व्याप दिशांतर
लखि अपूर्व रूप तव एहा डरि भय पदवी लोकत्रय जेहा २०

अमी हि त्वां सुरसंघा विशन्ति केचिद्भीताः प्रा
ञ्जलयो गृणन्ति स्वस्तीत्युक्त्वा महर्षि
सिद्धसंघा स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः
२१

शाङ्करभाष्यटीका १

अथाधुना पुरा यद्वा जयेम यदि वा नो जयेयुरिति अर्जुनस्य सं
शय आसीत् तन्निर्णयाय पाण्डवजयमैकान्तिकं दर्शयामीति
प्रवृत्तो भगवान् तं पश्यन्नाह अमी हीति किञ्च अमी हि युध्यमा
ना योधारस्त्वा सुरसंघा येऽत्र भूभारावतारायावतीर्णा वस्वादिदे
वसंघा मनुष्यसंस्थानास्त्वां विशन्ति प्रविशन्तो दृश्यन्ते तत्र केचिद्भी
ताः प्राञ्जलयः सन्तो गृणन्ति स्तुवन्ति त्वामन्ये पलायनेऽप्यशक्ताः
सन्तो युद्धे प्रत्युपस्थिते उत्पातादिनिमित्तान्युपलक्ष्य स्वस्त्यस्तु जग
त इत्युक्त्वा महर्षिसिद्धसंघाः महर्षीणाञ्च सिद्धानाञ्च संघाः स्तु
वन्ति त्वां स्तुतिभिः पुष्कलाभिः सम्पूर्णाभिः २१

आनन्दगिरिकृतटीका २

अमीहीत्यादि समनन्तरग्रन्थस्य तात्पर्यमाह अथेति तं भगव
न्तं पाण्डवजयमैकान्तिकं दर्शयन्तं पश्यन्नर्जुनोऽब्रवीदित्याह तं
पश्यन्निति विश्वरूपस्यैव प्रपञ्चनार्थमनन्तरग्रन्थजातमिति द
र्शयति किञ्चेति अमरसंघा इति पदे स्थित्वा भूभारभूतान्योध
नादयन्त्वां विशन्तीत्यपि च वक्तव्यं उभयोरपि सेनयोरवस्थिते
षु योद्धुकामेष्ववान्तरविशेषमाह अथेति समरभूमौ समागताना
द्रष्टुकामानां नारद प्रभृतीनां विश्वविनाशमाशङ्कमानानां ते प
रिनिर्घोषितां स्तुतिपदेषु भगवद्विषयेषु प्रवृत्तिप्रकारं दर्शयति
पुढइति २१

स्वामिकृतटीका ३

किंच अमीहीति अमी सुरसंघा भीताः सन्तस्त्वां विशन्ति शरणं प्रविश
न्ति तेषां मध्ये केचिदतिभीता दूरत एव स्थिताः कृतसंपुटकरयुग
लाः सन्तो गृणन्ति जय जय रक्ष रक्षेति प्रार्थयन्ते स्पष्टमन्यत् किंच
२१

पैशाचभाष्यटीका ४

स्पष्टार्थं २१

रामानुजभाष्यटीका ५

अमीहीति अमीसुर[संघा] संघाउत कृष्णंतोविद्याश्रयमवलोक्य हृष्ट
मनसस्त्वत्समीपं विशंति तेष्वेव केचिदमद्भुतं चत्वाकारमवलो
क्य भीताः प्रांजलयः स्वज्ञानानुगुणं स्तुतिरूपाणि वाक्यानि गृणंति उ
च्चारयंति अपरे महर्षिसंघाः सिद्धसंघाश्च परावरतत्त्वयाथात्म्यविदः स्वस्त्यु
क्त्वा पुष्कलाभिर्भगवदनुरूपाभिः स्तुतिभिः स्तुवंति २१

स्पष्टार्थं २१

अभिनवगुप्तकृतटीका ८

॥ ॥ ॥

परमार्थप्रपाटीका १

तदेवाह अमीहीति सुरसंघा देवसमूहास्त्वामतिभीषणं दृष्ट्वा
रतः परं क्व गंतव्यमिति व्याकुलचित्तास्त्वामेव प्रविशंति तथापि
भीताः संतः प्रबहुमशकाः केचित्कृतांजलिपुटा अस्मान् रक्ष रक्षे
ति सकरुणं गृणंति तथा महर्षिसिद्धसंघा गंधर्वचारणादय
स्त्वां त्रिलोकीप्रभुं मत्वा स्वस्तीत्याशीर्वचनमुक्त्वा पुष्कलाभिर्दीर्घो
भिः स्तुतिभिः स्तुवंति एतद्दृष्ट्वैनोपसंसमाप्ति तेवादस्मद्दीर्घ
वसोर्मेदानमंपसः अभिवत्सं कामसरेषुयेनव इंद्रगीर्भिर्नवा
मह इति भाष्ये नोधाऋषिः इंद्रं परमात्मानं स्तौति हे इंद्र विग्रपज
मा न दस्मदृशीनां येऋषीषदे अभिवाधकास्तेषामभिभविता
ते पुनः कीदृशाः वसोर्इंद्रः स्वसवासपितारमाच्छादके तथाऽधसः
सोमलक्षणस्यान्नस्योत्पादनेन मदाने मोदमानता दृशामिंद्रं गीर्भिः
त्व तिलतलाभिर्गीर्भिरभिनवामहे अभिष्टुमः अभितः प्राहयामः
कुत्र स्वसरेषु दिवसेषु वयमभिष्टुमः तत्र दृष्टांतः वत्सं यथा नवप्र
सूतिका धेनवः स्वसरेषु स्वष्ट्रमसंते अभिघोषं तेनावोऽनेति स्वसराणि
हानि तेषु वत्समभिलक्ष्य हूपंतितद्दस्मरमेप्रमास्पदं त्वामिंद्रस्तुमः ॥ २१

वनमाली टीका ८

अधुना भूभारावतरणमात्मनः प्रकटयंतं भगवंतं पश्यन्नाह अमी
हीति अमी हि सुरसंघा वस्वादिदेवगणा भूभारावतारार्थं मनुष्य
रूपेणावतीर्णा युद्ध्यमानाः संतस्त्वां विशंति प्रविशंतो दृश्यंते
एवमसुरसंघा इति यदुच्छेदेन भूभारभूता दुर्योधनादयस्त्वां विशं

नीत्यपि वाच्यं एवमुभयोरपि सेनयोः केचिद्भीताः पलायने प्रशक्ताः सं
तः प्रांजलयो गृणंति स्तुवंति त्वां एवं प्रत्युपस्थिते युद्धे उत्पातादिनि
मित्तान्युपलक्ष्य स्वस्त्यस्तु सर्वस्य जगत इत्युक्त्वा महर्षिसिद्धसंघा नारदा
द्याः युद्धदर्शनार्थमागता विश्वविनाशपरिहाराय स्तुवंति त्वां स्तुति
भिर्गुणोत्कर्षप्रतिपादिकाभिः पुष्कलाभिः परिपूर्णाभिः ॥ २१ ॥

हनुमद्वैजयन्ती टीका ॥

भूभारसंहरणार्थं युद्धे विश्वाश्रयं भगवंतं सर्वलोकसमुदायः सन्नाह १
अमी हीति अमी ये युद्धदिदृक्षया गताः स्वर्लोक एवास्थिता वा भगव
त्स्वरूपस्य वा पृथिव्यादि सम्यक्प्रकारेण सर्वलोकव्यापित्वात् सुरसं
घा ब्रह्मेशेंद्रादिदेवसमूहाः सुरसंघा इति पदच्छेदे मल्लाद्यवलिप्त
भृतिका सुरगणाः हि शब्दात्तु निमानवादयस्त्वां सर्वोत्कृष्टं विश्वाश्र
यं मूर्तिमंतं सर्वलोकव्याहितहर्षमनसः सन्तो विशन्ति त्वच्चरणं प्रविश
न्ति केचित्तेषां मध्ये तव रूपमद्भुतं तिकारणेन भीताः भीताः अथैव वि
ला प्रमलयो भवतीति मत्सकम्पभययुक्ताः पलायने पनवायावसराः
प्रांजलयः कृतसंपुटकरयुगलाः संतो गृणंति पाहि पाहि प्रभो विश्व
मिति प्रार्थयन्त इदं सुचारयन्ति विश्वविनष्टनिमित्तां सर्वलोका सर्वस्य
जगतः स्वस्त्यस्त्विति सकामहर्षिसिद्धसंघाः महर्षयो ये देवर्षिब्रह्मर्षि
राजर्ष्यादयः सिद्धा ये च धर्मपुत्रकपिलासुरवोढप्रमुखा मारादयस्तेषां
महर्षिसिद्धानां संघाः समूहास्ते पुष्कलाभिः परिपूर्णाभिः स्तुतिभि
र्भगवद्रूपगुणोत्कर्षाभिर्वाग्भिस्त्वां विश्वाश्रयं स्तुवन्ति ॥ २१ ॥

अथ धनाभूभारसंहारकृत्त्विनात्मनः मधुसूदनी टीका ॥ १ ॥ प्रकटयन्तं भगवन्तं पश्यन्नाह ॥

अमी हि त्वां सुरसंघा वसवादिदेवगणाः भूभारावतारार्थं मनुष्यरूपेण अ
वतीर्णाः युध्यमानाः संतः त्वां विशंति प्रविशंतो दृश्यंते एवमुत्कर्षप्र
कारेण सुरसंघा इति पदच्छेदेन भूभारभूता दुर्योधनादयः त्वां वि
शंतीत्यपि वक्तव्यं एवमुभयोरपि सेनयोः केचिद्भीताः पलायनेऽप्य
शक्ताः संतः प्रांजलयो गृणंति स्तुवंति त्वां एवं प्रत्युपस्थिते युद्धे उत्पा
तादिनिमित्तान्युपलक्ष्य स्वस्त्यस्तु सर्वस्य जगत इत्युक्त्वा महर्षिसिद्ध
संघाः नारदप्रभृतयो युद्धदर्शनार्थमागताः विश्वविनाशप
रिहाराय स्तुवंति त्वां स्तुतिभिर्गुणोत्कर्षप्रतिपादिकाभिः पु
ष्कलाभिः परिपूर्णाभिः ॥ २१ ॥

सदानंदी टीका ॥ ११ ॥

अथभूभारसंहारकारिणंस्वात्मनःपरंरूपमप्रकटयंतंश्रीभगवंतमु
वाचह १ भुवोभारावतारार्थेदेवसंघाःसहस्रशः त्वद्रूपेणावतीर्णा
मेयुध्यमानाविशंतिते २ त्वामेवासुरसंघाश्चदुर्योधनप्रमुखास्त्वन्नृपाः
हृष्यंतेप्रविशंतोत्रभीताःप्रांजलयोविभुंस्तुवंतिस्वापरेशक्ताःसंतो
प्यत्रपलायने उत्पातादिनिमित्तानिसुपलभ्यमहारणे स्वस्त्यस्तु
सर्वभूतेभ्यइत्युक्त्वापुनःपुनःमहर्षीणांचसिद्धानांसमूहास्त्वांस्तु
वंतिच स्तुतिभिःपरिपूर्णाभिर्गुणैरैश्वर्यवाचकैः २१

नीलकंठी टीका: १२

व्यथामेवाह अमीति हियतःअमीत्वांत्वांअसुरसंघाःअसुरांशाः
दुर्योधनादयःसंपतंगाःपावकमिवअदृष्टप्रेरिताःविशंतिमर
णायेत्यर्थः केचिद्भीताःप्रांजलयोबद्धांजलयोगृणंतिस्तुवंति २१

आनंदीटीका उपक्रमे २१ लोकत्रयस्यव्यथामेवाह॥
तेषांदेवयोधानांतथाविधरूपदर्शनेनभ

रामकंठीटीका येत्पन्नावस्थाःप्रतिपादयितुमाह॥

अमीयस्मात्त्वांकुतूहलयायाविष्कृतनराहरणाकारंशक्रादिदेवसमूहाविशं
तितत्प्येवलीयंतेकेचिद्भीताःसंत्रस्ताःसंतोविरचितकरसंपुटागृणंति
स्तुतीःपठंति अन्येतुमहर्षिसंघामुनिप्रवरसाध्याजगतःक्षेमायस्वस्ति
मावदन्तुचार्यपुष्कलाभिर्मुखाग्रेस्थिताभिर्वहाभिः स्तुतिभिस्तत्स्तुवंतिता
दीरोगोसिंस्तवंतिप्रशंसंति विंप २१

लासिकी [illegible]टीका

तथाहि अमीअस्मत्तेभासमानाःसुरसंघाःसमापतनपतनात्त्वांविशंतिसमा
वेशेनासादयति तन्मध्येपिकेचिद्भीताःसंतःप्रांजलयोबद्धांजलय
स्त्वांकालरूपंगृणंति जयजयरक्षरक्षेतिप्रार्थयंते तथामहर्षीणां
नारदादीनांसिद्धानांकपिलादीनांचसमूहाः स्वस्त्यस्तुजगतइतिउ
क्त्वापुष्कलाभिःश्रेष्ठाभिःस्तुतिभिस्त्वांस्तुवंतिनारदीरागोस्त्वांप्रशंसंति
२१

पंचोलीटीका

इदानींपूर्वंयदिवाजयेमयदिवानोजयेयुरित्यर्जुनस्यजयाजयसं
शयविषयवचनंतत्रानिर्णयायपांडवेभ्यएकंजयंदर्शयंतंभगव

तंपश्यन्नर्जुनआह अमीहीतिहियस्मादमीयुध्यमानाःयोधाः
सुरसंघावस्वादिसमूहाभूभारावतारायमनुष्यरूपेणावतीर्णाः
त्वांविशंतित्वयिप्रविशंतोदृश्यंतेतेषांमध्येकेचिद्भीताःप्रांजलयो
गृणंतिमहर्षिसिद्धसंघाःमहर्षीणांभृग्वादीनांसिद्धानांकपिला
दीनांसंघाःसमूहाउत्पातादिनिमित्तान्युपलक्ष्यजगतोविश्वस्य
कल्याणमेवास्त्वितिस्वस्तीत्युक्त्वापुष्कलाभिःसंपूर्णाभिस्त्वद्गुणकी
र्तनलक्षणाभिःस्तुतिभिःत्वांस्तुवंति २१

रणवीरसमिद्बोधिनी॥

अथभगवतोघोररूपस्यदैवीस्तुतिंविवक्षोरर्जुनस्यप्रार्थनामाह
अमीति अमीसुरसंघाइंद्रादयोपि हिमाह्वोयप्रसिद्धैएतद्घोरतर
रूपंदृष्ट्वात्वाविशंति त्वत्तेजसिप्रविशंतोदृश्यंते तत्रकेचित्स्वरा
भीताःप्रांजलयःपलायनेसमर्थत्वात्त्वामेवशरणंतिस्तुवंति त
थामहर्षयः सिद्धसंघाश्चैतद्घोरतररूपदर्शनेनभीताइव जग
तोर्थेस्वस्तीति स्वस्त्ययनमंत्रोच्चारयित्वेति स्वस्त्ययनरूपाभिः
पुष्कलाभिःसंपूर्णाभिःस्तुत्यार्थप्रतिपादिकाभिस्त्वांस्तुवंति त्वत्
स्वरूपलक्षणानिप्रतिपादयंतीतिभावः २१॥

मधुभाष

भाषा अनुवाद

और ये सम्पूर्ण देवता भय पाय तुमारे शरणागत है और कोई अति भीत होय दूर खड़े कर जोड़े जय जय रत रत पुकार प्रार्थना करते हैं और महर्षि तथा सिद्ध संघ तुम को देखते स्वस्ति वचन उचारते हुये संपूर्ण स्तुति से स्तुति करते हैं २१

चौपई

सुरसमूह यह तोहि प्रवेसें कोइक अत्त कर जोर विषेसें करें स्वस्ति महाऋषि सिद्धसमूहा स्तुतहिं तोहि सम स्तुति कर हूहा २१॥

रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ
मरुतश्चोष्मपाश्च गन्धर्वयक्षासुरसिद्धसं
घा वीक्षन्ते त्वां विस्मिताश्चैव सर्वे २२

शाङ्करभाष्यटीका १

किञ्चान्यत् रुद्रेति रुद्रादित्या वसवो ये च साध्या रुद्रादयो गणाः
विश्वेऽश्विनौ विश्वेदेवाः अश्विनौ च देवौ मरुतश्च वायव ऊष्मपा
श्च पितरो गन्धर्वयक्षासुरसिद्धसङ्घाः गन्धर्वा हाहाहूहूप्रभृतयो
यक्षाः कुबेरप्रभृतयः असुरा विरोचनप्रभृतयः सिद्धाः कपिला
दयस्तेषां सङ्घाः गन्धर्वयक्षासुरसिद्धसङ्घास्ते वीक्षन्ते पश्यन्ति
त्वां विस्मिताः विस्मयमापन्नाः सन्तस्त एव सर्वे २२

आनन्दगिरिकृतटीका २

दृश्यमानस्य भगवद्रूपस्य विस्मयकरत्वे हेत्वन्तरमाह किञ्चेति
त एवोक्ता रुद्रादयः सर्वे विस्मयमापन्नास्त्वां पश्यन्तीति सम्ब
न्धः २२

स्वामिकृतटीका ३

रुद्रेति रुद्राश्चादित्याश्च वसवश्च ये च साध्या नाम देवा विश्वेदेवाश्च अ
श्विनौ देवौ मरुतस्तु मरुद्गणाः ऊष्माणं पिबन्तीति ऊष्मपाः पित
रः ऊष्मभागा हि पितर इति श्रुतेः स्मृतिश्च यावदुष्णं भवेदन्नं या
वदश्नन्ति वाग्यताः पितरस्तावदश्नन्ति यावन्नोक्ता हविर्गुणा इति
यक्षा गन्धर्वाश्चासुराश्च विरोचनादयः सिद्धानां सङ्घाश्च ते सर्व ए
व हि विस्मिताः सन्तस्त्वां वीक्षन्त इत्यन्वयः २२

पैशाचभाष्यटीका ४

रुद्रादित्येति विश्वे हि विश्वेदेवाः ऊष्मपाः पितरः २२

रामानुजभाष्यटीका ५

रुद्रेति ऊष्मपाः पितरः ऊष्मभागा हि पितर इति श्रुतेः एते सर्वे
विस्मयमापन्नास्त्वां वीक्षन्ते २२

अभिनवगुप्तकृतटीका ६

स्पष्टार्थः २२

श्री· गी·टी· ९

अथ केषुचित्चकितत्वेनस्तो परमार्थप्रपा टीका ७ तमसन्नास्तुस्तीत स्तुतिमाह ॥

रुद्रादित्या इति रुद्रा एकादश आदित्या द्वादश वसवोऽष्टौ ये च साध्या
विश्वेदेवा अश्विनौ मरुतः ऊष्मपा इति ते ऊष्मपाः पितरः
[illegible] गंधर्वयक्षासुरसिद्धसंघा वीक्षंते तद्दर्शनाद्विस्मिताः संत
स्त्वां वीक्षंते त्वां लोकमवलोक्य स्थिताः [illegible]
[illegible] वणात
[illegible] २२

वनमाली टीका· ८

रुद्रास्त्वादित्याश्च वसवो ये च साध्या नाम देवगणा विश्वे तत्स्या विभ
क्तिक विश्वदेवशब्दाभ्यामुच्यमाना देवगणा अश्विनौ द्वौ मरुत
एकोनपंचाश देवगणाः ऊष्मपाश्च पितरः गंधर्वाणां यक्षाणा
मसुराणां सिद्धानां संघाः समूहा वीक्षंते पश्यंति त्वां तादृशाद्भु
तदर्शनात्ते सर्वे सर्व एव विस्मिताश्च विस्मयमलौकिकचम
त्कारविशेषमापद्यंते च २२

[illegible]नपती टीका· ९

किंच रुद्रादित्या वसव इति ये रुद्रा एकादश रुद्रगणा आदित्या द्वाद
श सूर्यगणाः वसवोऽष्टौ वसुगणा ये च साध्याः साध्यानाम देवगणाः
ये च विश्वे समविभक्तिक विश्वेदेवशब्दाभ्यामुच्यमाना देवगणाः
यौ चाश्विनौ नाम सदस्रौ मरुतो ये चैकोनपंचाश देवगणाः ये चो
ष्मपाः पितृगणा ऊष्मभागा हि पितर इति श्रुतेः यावदुष्णं भवेदन्नं ता
वदश्नंति वाग्यताः पितरस्तावदश्नंति यावन्नोक्ता हविर्गुणा इत्या
दिस्मृतेश्च गंधर्वयक्षासुरसिद्धसंघाः ये च गंधर्वाणां यक्षाणामसु
राणां विरोचनादीनां सिद्धानां संघाः समूहाः सर्व एव त्वां वीक्षंते
पश्यंति च तु नस्तदाश्चर्यदर्शनाद्विस्मिता विस्मयमलौकिकचमत्का
रविशेषमापद्यंते २२

किं चान्यत् ॥

मधुसूदनी टीका· ९

रुद्रास्त्वादित्याश्च वसवश्च ये च साध्यानाम देवगणाः विश्वे तत्स्यवि
भक्तिक विश्वदेवशब्दाभ्यामुच्यमान देवगणाः अश्विनौ नासत्य
दस्रौ मरुतः एकोनपंचाश देवगणाः ऊष्मपाश्च पितरः गंधर्वा
णां यक्षाणां असुराणां सिद्धानां च जातिभेदानां संघाः समूहाः वी
क्षंते पश्यंति त्वां तादृशाद्भुतदर्शनात्ते सर्व एव विस्मिताश्च विस्म

यमलौकिकचमत्कारविशेषमापद्यंते [illegible]
[illegible] २२

सदानंदीटीका· ११

रुद्रावसवश्चादित्याः साध्याविश्वेश्विनौतथामरुतः पितरश्चैतेगं
धर्वाणांसमूहकाः १ यक्षाणामसुराणांचसिद्धानांयेव्रजालया
वयतेविस्मिताः संतस्त्वाद्दृशाद्भुतदर्शने २ पश्यंतित्वामहद्भु
तेविश्वरूपमलौकिके अलौकिकचमत्कारमापद्यंतेविलाश्च
पि २२

नीलकंठीटीका· १२

किंच येत्वदनुग्रहीताः रुद्रादयस्तेपिविस्मिताः संतः सर्वेत्वांवी
क्षंतेइत्याह रुद्रादित्याइति साध्याः विश्वेच देवगणविशेषोरुद्रा
दिसमवत् तेभ्यो उष्मपाः पितरः गंधर्वाणांयक्षाणामसुराणांसि
द्धानांजातिभेदानांसंघाः समूहाः शेषंस्पष्टं २२

आनंदीटीका

ऊष्मपाः पितरः अद्भुतदर्शनाद्विस्मिताः आश्चर्यान्वितास्त [illegible]
[illegible] २२

रामकंठीटीका

किंच रुद्रादयोदेवविशेषाव्याख्याताः ऊष्मपाख्याः पितरः गंधर्वादयः प्रसि
द्धाएतेसर्वेदेवयोनित्वाज्ज्ञानविशेषसंभवेसतित्वांवीक्षंतेचोत्कटादरपूर्वक
२२
मस्य [illegible]
[illegible]

लासिकी वसगमीटीका

किंच रुद्राश्चादित्याश्चवसवश्चयेचसाध्यानामदेवाविश्वेदेवामरुतोप
कोनपंचाशद्देवगणाः ऊष्मपाश्चपितरः गंधर्वाश्चयक्षाश्चासु
राश्चविरोचनादयः सिद्धानांसंघाश्चतामीश्वरंकालरूपंवीक्षंतेसाक्षा
त्कुर्वंतितथातेसर्वएवविस्मिताश्च योगोपलब्धाभक्तविस्मयमा
पन्नाश्च [illegible] २२॥

पंचोलीटीका

रुद्राःशंकरप्रभृतयः एकादश आदित्याः द्वादश वसवोऽष्टौ साध्या नाम देवा द्वादश विश्वेदेवाः त्रयोदश अश्विनौ द्वौ मरुत एकोनपंचाशत् ऊष्माणं पिबंतीति ऊष्मपाः पितरः गंधर्वाः हाहाहूहूप्रभृतयः यक्षाः कुबेरप्रभृतयः असुरा विरोचनप्रभृतयः सिद्धाः कपिलादयः तेषां संघाः विस्मयाः पन्नाः सर्वे त्वां स्तुवंति २२

रणवीरसमिद्धोधिनी॥

किंच येचादित्यादयो गणा ये च साध्या वा तरप्राना स्वघयोऽउपतयोन्ये च विश्वेदेवाः कव्यपतयो ऽश्विनौ मरुतश्च मरुन्नामानो देवगणा ऊष्मपा ये ऊष्म सूक्ष्मं सहितं सन्नं पिबंती ऊष्मपाः तन्नामानः पितरस्ते च तथा च गंधर्वयक्षासुरसिद्धसंघा एते सर्व एतद्धोर रूपं दृष्ट्वा विस्मिताः संतो वीक्ष्यंते त्वां प्रति हे हिरण्यं तोनिसंदग्धाश्चितिनाः वहंपंते इति महदाश्चर्यमिति २२॥

मधुभाष्य

२२॥

भाषा अनुवाद

और रुद्रगण आदित्यगण वसुगण औ साध्यगण तथा विश्वे
देवा अश्विनीकुमार औ मरुतगण पितृगण उष्मा हव्य पान
करनेवाले पितृगण धर्मशास्त्र औ स्मृति मे ऐसे कहा है कि
पितृगण तब तक मौन भोजन करते जब तक अन्न उष्ण है
और यावत् पितृ उद्देश करि दिये हुये अन्नका गुण वर्णन क
र मधु वातादि वैदिक मन्त्र पाठ समाप्त न होय तावत् पितर
अन्न खाते हैं और गन्धर्वगण यक्षगण और विरोचन प्रभृत
असुरगण औ सिद्धगण ये सकल विस्मययुक्त होके तुम को
खडे देखते हैं २२

चौपई

रुद्र रवि वसु साध्य हि जो हे विश्वे अश्वन मरुत पितृ सो हैं
गंधरव यक्ष असुर सिद्ध जाता तोहि लखि सब विस्मय जाता २२

73

रूपंमहत्ते बहुवक्त्रनेत्रं महाबाहो बहुबा
हूरुपादं बहूदरंबहुदंष्ट्राकरालं दृष्ट्वा
लोकाःप्रव्यथितास्तथाहं २३

शाङ्करभाष्यटीका १

यस्मात् रूपमिति रूपं महदतिप्रमाणं ते तव बहुवक्त्रनेत्रं
बहूनि वक्त्राणि मुखानि नेत्राणि चक्षूंषि च यस्मिंस्तद्रूपं बहु
वक्त्रनेत्रं हे महाबाहो बहुबाहूरुपादं बहवो बाहवः ऊरवः पा
दाश्च यस्मिन् रूपे तद्बहुबाहूरुपादं किञ्च बहूदरं बहूनि उद
राणि यस्मिन्निति तत् बहूदरं बहुदंष्ट्राकरालं बह्वीभिः दंष्ट्रा
भिः करालं विकृतं तद्बहुदंष्ट्राकरालं दृष्ट्वा रूपमीदृशं लोकाः
लौकिकाः प्राणिनः प्रव्यथिताः प्रचलिता भयेन तथाहं २३

आनन्दगिरिकृतटीका २

लोकत्रयं प्रव्यथितमित्युक्तमुपसंहरति यस्मादिति ईदृशे य
स्मात्ते रूपं तस्मात्त्वां दृष्ट्वेति योजना भयेन लौकिकवदहमपि
व्यथितो व्यथां पीडां देहेन्द्रियप्रचलनं प्राप्तोस्मीत्याह तथेति २३

स्वामिकृतटीका ३

किंच रूपमिति हे महाबाहो महदत्यूर्जितं तव रूपं दृष्ट्वा लोकाः स
र्वे प्रव्यथिता अतिभीताः तथाहं च प्रव्यथितोस्मि कीदृशं रूपं दृष्ट्वा
बहूनि वक्त्राणि नेत्राणि च यस्मिंस्तत् बहवो बाहव ऊरवः पादाश्च
यस्मिंस्तत् बहून्युदराणि यस्मिंस्तत् बह्वीभिर्दंष्ट्राभिः करालं वि
कृतं रौद्रमित्यर्थः २३

पैशाचभाष्यटीका ४

स्पष्टार्थं २३ ॥ ॥ ॥

रामानुजभाष्यटीका ५

रूपमिति बह्वीभिर्दंष्ट्राभिरतिभीषणाकारं लोकाः पूर्वोक्ताः प्रतिकू
लानुकूलमध्यस्थास्त्रिविधाः सर्वे अहं च तवेदमीदृशं रूपं दृष्ट्वा
व्यथिता भवामः २३

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं २३ ॥ ॥ ॥

एवं स्थितिरूपेण विश्वरूपं दर्शयन् इदानीं संहाररूपेण सप्तभिः अतिभयानकरूपद
र्शनेन तदन्तर्वर्तिनां लोकानां स्वस्य च भयं नाटयति ॥

परमार्थप्रपा टीका॰ ७

रूपमिति तेतव रूपं करालमत्युग्रेण दृष्ट्वा लोकाः कौरवसैनिकाः
तूष्णीं कृतेरुर्जमानैरित्यादिवस्यमाणवाक्यैः प्रव्यथिताः नाश
पर्यवसिता इति च दृष्ट्वा एते देवा ब्रह्मा एवं परे तमपानात्रयधर्मस
निष्ठायक जगद्रूपवाक्यमविगणय्य वधार्थं संग्रामाडुपरतमिमह
मपि प्रव्यथितोस्मीत्यर्थः २३

वनमाली टीका॰ ८

हेमहाबाहो तेतव रूपं दृष्ट्वा लोकाः सर्वे प्राणिनः प्रव्यथितास्तथाहं
प्रव्यथितो भयेन कीदृशं रूपं महत् अतिप्रमाणं बहूनि वक्त्रा
णि नेत्राणि च यस्मिन् तत् बहवो बाहव ऊरवः पादाश्च यस्मिन् त
त् बहून्युदराणि यस्मिन् तत् बहुदंष्ट्राभिः करालमतिभयान
कं दृष्ट्वेवमात्मसहिताः सर्वे लोका भयपीडिता इत्यर्थः २३

उत्तमवैजयन्ती टीका॰ ९

लोकत्रयं प्रव्यथितं महात्मन्निमं कमुपसंहरन्नाह रूपं महदिति हे
महाबाहो महतो निरतिशयदीर्घपीना बाहवो यस्य स तथा हे महा
बाहो हे विश्वरूप ते तव महत् निरतिशयसामर्थ्यमतिरूढं रूपं
विश्वाकारं दृष्ट्वा ऽव लोकानुकूलप्रतिकूलमध्यस्थरूपाः पूर्वोक्ताः
सर्वे लोकाः त्रिविधाः प्राणिनः प्रव्यथिताः अतिभीषणाकारदर्शन
जन्मभयेनातिपीडिता भवेति तथाऽहमपि प्रव्यथितो भवामि न तु
यस्माल्लोकास्तव सर्वे यूयं प्रव्यथिता भवथ तन्मम रूपं कीदृशमित्य
पेक्षायामाह बहुवक्त्रनेत्रमित्यादिवतभिर्विशेषणैः बहूनि वक्त्रा
णि नेत्राणि च यस्मिंस्तत्तथा बहवो बाहव ऊरवः पादाश्च यस्मिंस्त
था बहूदराणि यस्मिंस्तत्तथा बहीभिर्दंष्ट्राभिः करालमतिभया
नकाकारमीदृशं रूपं दृष्ट्वा सर्वे वयं प्रव्यथिता भवाम इत्यर्थः २३

लोकत्रयं प्रव्यथितमित्युक्तमुपसं
हरति ॥

मधुसूदनी टीका॰ १०

हे महाबाहो तेतव रूपं दृष्ट्वा लोकाः सर्वेपि प्राणिनः प्रव्यथिताः त
थाहं प्रविव्यथितो भयेन कीदृशं ते रूपं महदति प्रमाणं बहूनि वक्त्रा णि नेत्रा
णि च यस्मिन् तत् बहवो बाहव ऊरवः पादाश्च यस्मिन् तत् बहूद
राणि यस्मिंस्तत् बहुभिर्दंष्ट्राभिः करालमतिभयानकं दृष्ट्वेवम
त्सहिताः सर्वे लोका भयेन पीडिता इत्यर्थः भयानकत्वमेव प्रपं
चयति २३

सदानंदी टीका ११

अतिप्रमाणेनरूपंवक्त्रनेत्रभुजालिंते बहवोबाहवोयस्मिंस्तादृ
शेतितथोरवः १ उदराणिबहूनिवंवक्त्रदंष्ट्राभिःकरालं तथाह
पमपीलोकाद्दृष्ट्वाभीताअहंतथा २३

नीलकंठी टीका १२

एतल्लोकानामात्मनश्चव्यथामाह रूपमिति महत् आदिमध्यां
तहीनं हेमहाबाहो तेतवकरालेमहारूपंदृष्ट्वालोकाःप्रव्यथि
तास्तथाहंचव्यथितइतियोजना २३

अत्रविशेषतःस्वामवस्थामाह ॥

आनंदीटीका

करालमतिभयानकंरूपंदृष्ट्वासर्वैस्त्रिलोकस्थाःप्राणिनःअहंचप्रव्यथि
ताःप्रकर्षेणव्यथांप्राप्ताः [illegible] २३

विस्मयाविष्टायाहर्षशोकहृष्टातएवंविधाः

रामकंठीटीका

संहनात्मदर्शयतिमाह ॥

स्पष्टार्थःश्लोकः [illegible] २३

तदेवंकालरूपंविशिनष्टि ॥

लासिकी

टीका

एवंविधंतवरूपंदृष्ट्वालोकाऽज्ञप्रायःसर्वेप्रव्यथिताअतिभीताः तथात्म
तेनैश्वररूपसाक्षात्कारेसत्यपि लोकवदेवाहंअज्ञानेनातिभीतोस्मि तप
रभीतएवास्मि २३

पंचोलीटीका

विस्मयहेतुमाहरूपमितिहेमहाबाहोतेतवबहुवक्त्रंचनेत्रंचबहुबाहू
रुपादंबहूदरंबहुदंष्ट्राभिःकरालंविकृतंमहत्परिमाणातीतंए
वंविधंत्वदीयंरूपंदृष्ट्वाभयेनसर्वेलोकाःप्रव्यथिताःतथाहमपि
प्रव्यथितःचलितोभीतः २३

रत्नावीरसमिद्बोधिनी ॥

किंचरूपमिति निगदव्याख्यातमेतच्छ्लोकम् २३॥

मधुभाष्य

२३॥

भाषा अनुवाद

और हे महाबाहो यह महान् तुमारा रूप जिसमे बहुत मुख नेत्र बाहु उरु पाद उदर हैं और जो बहुतेरे दांतो से अति कराल कहे भयानक है इसको देखके सकल लोक व्यथित हैं और मै भी पीडित हौं २३

चौपई

रूपमहत तव मुख बहु नयना महाबाहु बहुबाहु उरु चरना॥
बहुत उदर बहु दाढ कराला लोक डरित लखि अरु मेहुं कृपाला २३॥

नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्त
विशालनेत्रं दृष्ट्वा हि त्वां प्रव्यथितान्तरा-
त्मा धृतिं न विन्दामि शमञ्च विष्णो २४

शाङ्करभाष्यटीका १

तत्रेदं कारणं नभःस्पृशमिति नभःस्पृशं द्युस्पर्शमित्यर्थः दीप्तं
प्रज्वलितं अनेकवर्णं अनेकवर्णा भयङ्करा नानासंस्थाना यस्मिंस्त्व
यि तं त्वामनेकवर्णं व्यात्तानि विवृतानि आननानि मुखानि य
स्मिन् त्वयि तं व्यात्ताननं दीप्तविशालनेत्रं दीप्तानि प्रज्वलितानि
विशालानि विस्तीर्णानि नेत्राणि यस्मिंस्त्वयि तं त्वां दीप्तविशाल
नेत्रं दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा प्रव्यथितः प्रभीतोऽन्तरात्मा
मनो यस्य मम सोऽहं प्रव्यथितान्तरात्मा सन् धृतिं धैर्यं न विन्दा
मि न लभे शमञ्चोपशमं मनस्तुष्टिं हे विष्णो २४

आनन्दगिरिकृतटीका २

अर्जुनस्य विश्वरूपदर्शनेन व्यथितत्वे हेतुमाह तत्रेति २४

स्वामिकृतटीका ३

न केवलं भीतोऽहमिमे तावदेव अपितु नभःस्पृशमिति नभःस्पृश
तीति नभःस्पृक् नभोऽन्तरिक्षव्यापिनमित्यर्थः दीप्तं तेजोयुक्तं यस्य तं
व्यात्तानि विवृतानि विवृतानि आननानि यस्य तं दीप्तानि विशालानि
नेत्राणि यस्य तं एवंभूतं हि त्वां दृष्ट्वा प्रव्यथितोऽन्तरात्मा मनो यस्य सोऽहं
धृतिं धैर्यमुपशमं च न लभे २४

पिशाचभाष्यटीका ४

नभ इति व्यात्ताननं व्यात्तानि विवृतानि आननानि यस्य सो व्यात्तान
नं शमं सुखं २४

रामानुजभाष्यटीका ५

नभ इति नभःशब्दः तद्देशपरमव्योमेत तमसः परस्तात्त्वयं तमस
रजसः परस्तात् अस्याध्यक्षः परमे व्योमन्नित्यादिश्रुतिसिद्धत्रिगु
णप्रकृतिस्थानपरमव्योमवाची सविकारस्य प्रकृतितत्त्वस्य पु
रुषस्य च सर्वावस्थस्य कृत्स्नस्याश्रयतया वर्तमानस्य नभःस्पृश
मिति वचनात् द्यावापृथिव्योरिदमन्तरं हि व्याप्तमिति पूर्वोक्तत्वात्

श्री·१
गी टी·
५

दीप्तमनेकवर्णंव्यात्ताननंदीप्तविशालनेत्रंत्वांदृष्ट्वाप्रव्यथितान्तरात्मा
अत्यन्तभीतमना धृतिं न विंदामि देहस्य धारणेन लभे मनस्य इन्द्रिया
णां च शमेन लभे विष्णो व्यापिन् अतिमात्रमत्यद्भुतमतिघोरं च त्वां दृ
ष्ट्वा प्रशिथिलसर्वावयवो व्याकुलेन्द्रियश्च भवामीत्यर्थः २४

अभिनवगुप्तकृतटीका· ६

स्पष्टार्थं २४ ॥ ॥ ॥ ॥

परमार्थप्रपाटीकासी· ७

किंच नभ इति नभोन्तरिक्षं स्पृशतीति नभस्पृक् तेन नभस्पृशं दीप्तं
ज्वलितं अनेकवर्णं व्यात्तं प्रसारितं आननं येनेति दीप्तानि प्रज्वलि
तानि विशालानि नेत्राणि यस्य विष्णो व्यापक एवंविधं त्वां दृष्ट्वा प्रव्य
थितान्तरात्मा मनो यस्य एवंविधोहं धृतिं धैर्यं शम उपशमं वा न विंदामि
२४ ॥ ॥ ॥ ॥

वनमालीटीका· ८

भयानकत्वं विवृण्वन्नाह नभ इति न केवलं प्रव्यथित एवाहं त्वां दृष्ट्वा
किन्तु प्रव्यथितान्तरात्मा मनो यस्य सोहं धृतिं धैर्यं देहेन्द्रियादिधारणसा
मर्थ्यं शमं च मनःप्रसादं न विंदामि न लभे हे विष्णो कीदृशं नभः
स्पृशं अन्तरिक्षव्यापिनं दीप्तं प्रज्वलितम् अनेकवर्णं भयंकरनाना
संस्थानयुक्तं व्यात्ताननं विवृतमुखम् दीप्तविशालनेत्रम् प्रज्वलि
तविस्तीर्णचक्षुषम् त्वां दृष्ट्वा हि एवं प्रव्यथितान्तरात्मा धृतिं शमं
च न विंदामीत्यन्वयः २४

जमुमवैजयन्तीटीका· ९

अथ तस्य कालत्वं प्रपंचयन् त्वत्स्वरूपं देवं प्रकाशयति द्वाभ्यां नभःस्पृ
शमिति नभो ऽक्षरं परमव्योमादिशब्दवाच्यं विष्णुपदं स्पृशतीति व्या
प्नोतीति तथा तं कार्यकारणावस्थावस्थितस्य स्थूलसूक्ष्मविश्व
स्याश्रयतया वर्त्तमानमित्यर्थः तदक्षरं परमे व्योमन्नन्तमसः पर
स्तात् तद्यन्नमस्य रजतः परार्केयोः स्याध्यक्षः परमे व्योमन्निमादि
श्रुतिभ्यः द्यावापृथिव्योरिदमन्तरं हि व्याप्तमित्युक्तत्वाच्च दीप्तं प्रज्व
लितं अनेकवर्णं श्वेतपीताद्यनेकवर्णविशिष्टावयवसंस्थानयुक्त
मति भयंकरमित्यर्थः व्यात्ताननं विवृतमुखं दीप्तविशालनेत्रं ॥
अतिप्रज्वलितविस्तीर्णलोचनं एवंविधं त्वामतिभयानकं विश्वा
त्मावधारणे दृष्ट्वैव हे विष्णो व्यापनस्वभाव प्रव्यथितान्तरात्मा प्रव्य
थितान्तरात्मा प्रव्यथितो निरतिशयपीडितो ऽन्तरात्मा मनो यस्य त

भाषा अनुवाद

और जो कहा कि अमत् जो भावी पराजय है सो भी इस मेरी शरीर मे देखो सोई देखि अब अर्जुन पांच श्लोक से कहते हैं कि जयद्रथ प्रभृति राजगण समेत ये धृतराष्ट्र के पुत्र दुर्योधनादि तुमारे मुख मे प्रवेश करते हैं और भीष्म द्रोण औ सूतपुत्र कर्ण ये भी तुमारे मुख मे प्रवेश करते हैं और यही सब नहीं प्रवेश करते हैं वरु प्रतियोधा अर्थात् हमारे पक्ष के भी शिखण्डी धृष्टद्युम्न प्रभृति कौ के समेत वे प्रवेश करते हैं २९

चौपई

यह धृतराष्ट्र सुत तोहि प्रवेशों सर्व अवनिपति संग विशेषों
भीष्म द्रोण कर्ण पुन तैसें योधे हमरे मुख्य हि जैसें २८

थासोऽहं धृतिं देहेन्द्रियप्राणादिधारणसामर्थ्यरूपं धैर्यं न वि
न्दामि न लभे एवं पुनः शमं मनःप्रसादं न लभे अत्र व्यात्ताननादि
कालरूपदर्शनं विभावो मनसोऽयथाऽनुभावो धैर्यशमादिभा
वः एतैर्हेत्वादिभिः पुष्टो भयस्थायी भयानकरसः स्वशोकलणा
हितत्रैवोक्तव्याघ्रादिभिर्विभावैर्लब्धपितायनुभावमत भावे
मोहादिभिर्युक्तो भयस्थायी भयानक इति २४

॰म

मधुसूदनी टीका १०

न केवलं प्रव्यथित एवाहं त्वां दृष्ट्वा किंतु प्रव्यथितः अंतरात्मा म
नो यस्य सोऽहं धृतिं धैर्यं देहेन्द्रियादिधारणसामर्थ्यं शमं च मनः
प्रसादं न विंदामि न लभे हे विष्णो त्वां कीदृशं नभःस्पृशं अंतरि
क्षव्यापिनं दीप्तं प्रज्वलितं अनेकवर्णं भयंकरं नानासंस्थानयुक्तं
व्यात्ताननं विवृतमुखं दीप्तविशालनेत्रं प्रज्वलितविस्तीर्णचक्षु
षं त्वां दृष्ट्वा हि एव प्रव्यथितो तरात्माहं धृतिं शमं च न विंदामी
त्यन्वयः २४

सदानंदी टीका ११

नभोव्यापिनमसंतं प्रज्वलंतं समंततः नानासंस्थानसंयुक्तं भी
षणं विवृताननं १ दीप्तविस्तीर्णनेत्रं त्वां दृष्ट्वा भीतमनो मम ना
पि धैर्यं लभे विष्णो न शांतिं मनसो लभे २४

नीलकंठी टीका १२

स्पर्शं व्योमव्या
पथलक्षणः
नभस्पृशप्रकृष्टो
नः

करालत्वप्रपंचनेन स्वव्यथामेवाह नभ इति नभःस्पृशं व्यो
मव्यापिनं दीप्तं अग्निवज्ज्वलत्समानं व्यात्ताननं विस्फारितमुखं
दीप्तविशालनेत्रं रक्तनेत्रं मिषधः हि प्रसत्ते वा त्वां दृष्ट्वा प्रव्यथि
तांतरात्मा प्रकर्षेण व्यथितचित्तः धृतिं धैर्यं न विंदामि न लभे शमं
वं शांतिं स्वास्थ्यं च लभे हे विष्णो व्यापक भयानकं त्वदाक्रांतदेशा [illegible]
सत्कामत्रगंतुमशक्तत्वव्यापकत्वादिति भावः २४ [illegible]

॰न

श्रानंदीटीका

भयानकत्वमेवाह ॥
धृतिं न विंदामि वित्तानवस्थानादनाकुलत्वं भजामि शमं न विंदामि म
नो ज्वलति २४

रामकंठीटीका

तद्रूपदर्शनेन विशेषतः स्वामवस्थां दर्शयितुमाह ॥

श्री
गी॰टी॰
प॰

78

अयमपिश्लोकोगतार्थएव किंतुदिव्यचक्षुर्दानेनलब्ध्वाभगवद्
रूपदर्शनोत्कर्षादिमज्ञानेनानुभूयाधुनामर्त्यधर्मावेशोमतितद्रूप
स्मरन्भीतचित्तः सन्धैर्यनिराकुलचित्तत्वेनप्रशमोमोत्पत्तेःदर्शनकौ
लएवनभयादीनांसंभवोवेदितव्यः अन्यत्रापिवर्तमानानांव्याघ्रादि
योगेऽप्येवंदृष्टस्मरणोत्करणात्वेनबोद्धव्यं [illegible] २४

नपरंभीतएवास्मि॥

लासिकी [illegible]टीका

खव्यापिनंदीप्तमनेकवर्णंविवृतास्यंदीप्तविशालनेत्रमेवंविधंतां
कालरूपंसमाप्तिकालेदृष्ट्वाइदानींप्रकानेतिभीतमनाधृतिंरतिंशा
मंमनस्वचनलेभे हेविष्णोव्यापक [illegible] २४

पंचोलीटीका

लोकानामात्मनश्चप्रव्यथितत्वेकारणमाह नभइति हे
विष्णोअहंत्वामेवंविधंदृष्ट्वाप्रव्यथितोन्तरात्मामनोयस्यसः
अहंधृतिंधैर्यंनविंदामिअन्यतःशममनःतुष्टिंनलभेकथंभू
तंत्वांनभःस्पृशंदीप्तंज्वलितमनेकवर्णंअनेकाभयकराःवा
र्णाआकारायस्मिंस्तंव्यात्ताननंविवृतमुखंदीप्तविशालनेत्रं
ज्वलितविस्तीर्णलोचनं २४

रणवीरसमिद्धोधिनी

नभःस्पृशमिति नभःस्पृशंनोभव्यापिनंदीप्तंप्रज्वद्रूपमनेकव
र्णैर्नैकोवर्णोयस्यतंलोहितशुक्लकृष्णप्रतिभेदात् व्यात्ताननं
व्यात्तानिव्याहृतान्याननानिमुखानियस्यतंदीप्तविशालनेत्रं
दीप्तानिविशालानिविस्तीर्णानिनेत्राणियस्यानेकवक्त्रादिरे
तादृशिपिदृष्टवोरतराकारंत्वांदृष्ट्वाइदानीमेवप्रव्यथितान्तरात्मा
प्रव्यथितोन्तिभयएवकितोन्तरात्मामनोयस्यसंमूढत्वात्सोहमेता
दृशंदृष्ट्वाहृतिंमनसोधैर्यंनविंदामि नलभे किंपुनःशमं
विंदामीतिवाक्यशेषमिति २४॥

मधुभाष्य

२४॥

भाषा अनुवाद

और मै हीं केवल डरा हूं यह नहीं ऐसा आकाशको परस कर
ने वाला अर्थात् भूम्यव्यापी तेजयुक्त नाना वर्ण विशिष्ट विस्ता
र को प्राप्त औ जलजलाते हैं विशाल कहे वडे नेत्र जिस के
ऐसे तुम को अवलोकन करि के विसो हमारा अन्तरात्मा व्य
था युक्त है और मै इस रूप को देखते हुये शान्ति तथा धीर
ज नहीं धर सकता हूं २४

चौपई

स्पर्शहि नभ दीपें बहुवर्णा विहसतमुख दिपें वडे नेत्रहि अरुणा"
देखित तोहि मन व्यथा हमारे धैर्य न धरों अरु शांति अधारे २४

दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानल
सन्निभानि दिशो न जाने न लभे च शर्म प्र
सीद देवेश जगन्निवास २५

शाङ्करभाष्यटीका १

कस्मात् दंष्ट्राकरालानीति दंष्ट्राभिः करालानि वि
कृतानि ते तव मुखानि दृष्ट्वैवोपलभ्य कालानलसन्निभानि प्र
लयकाले लोकानां दाहकोऽग्निः कालानलस्तत्सन्निभानि कालानल
सदृशानि दृष्ट्वेत्येतत् दिशः पूर्वापरविवेकेन न जाने दिङ्मूढोऽस्म्य
तो न लभे न चोपलभे च शर्म सुखमतः प्रसीद प्रसन्नो भव
देवेश जगन्निवास २५

आनन्दगिरिकृतटीका २

दृश्यमानेऽपि भगवद्देहे परितोषाभावे कारणान्तरं प्रश्नपूर्व
कमाह कस्मादिति दृष्ट्वैवेत्येवकारेण प्राप्तिर्व्यावर्त्यते २५

स्वामिकृतटीका ३

किंच दंष्ट्रेति भो देवेश तव मुखानि दृष्ट्वा भयावेशेन दिशो न जानामि
शर्म च सुखं न लभे भो जगन्निवास प्रसन्नो भव कीदृशानि मुखानि
दंष्ट्राभिः करालानि कालानलसन्निभानि कालानलः प्रलयाग्निस्त
त्सदृशानि २५

पिशाचभाष्यटीका ४

स्पष्टार्थं २५ ॥ ॥ ॥

रामानुजभाष्यटीका ५

दंष्ट्रेति युगान्तकालानलवत्सर्वसंहारे प्रवृत्तानि अतिघोराणि तव मुखानि दृ
ष्ट्वा दिशो न लभे जाने सुखं च न लभे जगन्निवास देवेश ब्रह्मादीनामीश्वरा
णामपि परममहेश्वर मां प्रति प्रसन्नो भव यथाहं प्रकृतिं गतो भवामि त
था कुरु इत्यर्थः एवं सर्वस्य जगतः स्वायत्तस्थितिप्रवृत्तितां दर्शयन् पार्थ
सारथ्यः राजवेषच्छन्मनावस्थितानां धार्तराष्ट्रादीनां यौधिष्ठि
रेष्वनुप्रविष्टानां चासुरांशानां संहारेण भूभारावतारणं स्वमनीषितं ते
नैव करिष्यमाणं पार्थाय दर्शयामास स च पार्थो भगवतः स्रष्टृत्वा
दिकं सर्वैश्वर्यं साक्षात्कृत्य तस्मिन्नेव भगवति सर्वात्मनि धार्तराष्ट्रा

दीनोउपसंहारमनागतमपितत्प्रसादलब्धेनदिव्येनचक्षुषापश्यन्निदं
प्रोवाच २४

अभिनवगुप्तकृतटीका॰ ९

स्पष्टार्थं २५ ॥ ॥ ॥

परमार्थप्रपाटीकाटी ७

अथभयातिशयेनस्वस्यकोदिशोऽहमस्मीतिवदति दंष्ट्रेति दंष्ट्राक
रालानिभयानकानि कालानलः संकर्षणमुखानलस्तत्सदृशानि
तेमुखानिदृष्ट्वा अहं दिशोनजानेप्रागपरादिविभागेनदिशोज्ञाने
सूर्येणकृताभवतिसोपितवतेजोभूतोस्तीत्यर्थः तथाइतः परंकिं
भविष्यतीतिव्याकुलचित्तत्वेनशर्मविश्रामेनलभे अथभूयोपश
मत्वयैवविधेयइत्याह प्रसीदेतिस्पष्टं २५

वनमाली टीका ८

दंष्ट्राभिःकरालानिविकृतत्वेनभयंकराणिप्रलयकालानलसदृ
शानिचतेमुखानिदृष्ट्वैवनतानिप्राप्यभयवशेनदिशः पूर्वाप
रादिविवेकेननजाने अतोनलभेचशर्मसुखंत्वद्रूपदर्शनेप्यतोहे
देवेशहेजगन्निवासप्रसीदप्रसन्नोभवमांप्रति यथापूर्वयाभयाभा
वेनत्वद्दर्शनजंसुखमाप्नुयामितिशेषः २५

कृसमवैजयन्तीटीका॰ ९

किंचदंष्ट्राकरालानीतिदंष्ट्राभिः अतितीक्ष्णदीर्घवक्रविरलपंक्ति
भिःकरालान्यतिविकृतत्वेनभयंकराणिचपुनःकालानलसन्निभा
निमहाप्रलयाग्निसदृशानिमुखानितववदनानिदृष्ट्वैवपवकारेण
नतानिस्पृष्ट्वा प्राप्यवाभययभीतोऽस्मिकिंतन्मुखानांदर्शनमात्रेण
वेतिसूचितं दिशःपूर्वापरादिदिग्विभागान्विवेकेनाहंननजानेन
वेद्मि अतोहेतोः शर्मचसुखंनलभे यथापूर्वंत्वत्पूर्णेन्दुनिभमतिसुं
दरसमकुंदकणोज्ज्वलराजितस्मरदनेवदनेदृष्टेःहे सुखंप्राप्नुवंत
थाधुनानप्राप्नुयांतस्माद्धेजगन्निवासजगदाश्रयहेदेवेशदेवानांके
शवेशब्रह्मेशादीनामीशनियंतः प्रसीदप्रसन्नोभवतदेवातिसौंदर्या
दिगुणयुक्तंरूपंमेदर्शयेतिभावः २५

मधुसूदनी टीका॰ १०

दंष्ट्राभिःकरालानिविकृतत्वेनभयंकराणिप्रलयकालानलसन्नि
भानिप्रलयकालवह्निसदृशानिचतेमुखानिदृष्ट्वैवनतानिप्रा

प्यभयवशेन दिशः पूर्वापरादिविवेकेन न जाने अतो न लभे च
शर्म सुखं च दृष्टदर्शनेपि हे देवेश हे जगन्निवास प्रसीद प्रसन्नो
भव मां प्रति यथा भयाभावेन तद्दर्शनजं सुखं प्राप्नुयामिति शे
षः [illegible]
[illegible]
[illegible] २५ ॥ सदानंदीटीका ॥

भयंकराणि दंष्ट्राभिर्विकृतत्वान्मुखानि ते प्रलयानलतुल्यानि
दृष्ट्वातिभयाहतः । पूर्वापरविवेकेन न जाने हे दिशो शर्म
न लभे हे सुखं सामिसद्रूपस्यापि दर्शने प्रसन्नो भव देवेश २५
जगदाधार मां प्रति यथाहं निर्भयो भूत्वा त्वद्दर्शनसुखं लभे

नीलकंठीटीका ॥

कालानलः प्रलयाग्निस्तत्सदृशानि प्रसीद प्रसन्नः सुखदो भव ।
स्पष्टोर्थः २५

आनंदीटीका स्पष्टार्थं २५

रामकंठीटीका

किंच स्फुटार्थमेतद्वाक्यं किंतु भगवतो दंष्ट्राकरालवक्त्रस्य सर्वसंहारमहत्
तेवक्त्रविकृतत्वकृतो न भक्तभावेषां तु [illegible]
[illegible] २५ ॥

लासिकी ~~[illegible]~~टीका

किंच तव कालरूपस्य दंष्ट्राभिः करालानि विकृतत्वेन भयानकानि प्रलय
कालाग्निसदृशानि मुखानि दृष्ट्वैव समाधिकाले सातत्याकृत्यैव दिशः
पूर्वापरादिविभागेनेदानीं मुक्तो न समाधिसंस्कारफलेन जानेऽतः सुखं
चेतो पलभे हे देवेश कालादिदेवनियंतः हे जगन्निवास जगदाश्र
येति साकृतमामंत्रणद्वयम् तं प्रसन्नो भव जगद्वत्तां प्रति [illegible] २५

पंचोलीटीका

धृतिशमयोरलाभेकारणंतरमाह दंष्ट्रेति चपुनःदंष्ट्राकरा
लानिविकृतानिकालानलसंनिभानिप्रलयाऽग्निसदृशानि
तेतवमुखानिदृष्ट्वैवअहंपूर्वापरविभागेनदिशोनजानेदिग्
मूढोस्मिचपुनःशर्मसुखंनलभेहेदेवेशजगन्निवासप्रसीदप्र
सादंकुरुप्रसन्नोभव २५

श्रीधरस्वामिसुबोधिनी ॥

कालानलसंनिभानि कालाग्निरुद्ररूपाणीव दंष्ट्राकराला
नि तेमुखानिदृष्ट्वैवतत्समकालेभीतत्वाद्बलितोऽहंततोपि
दिशोदेशविभागान्पूर्वापरान्नजानेर्धीदिग्भ्रमइतोस्य
तएवनलभेचशर्मेतिसर्वथाप्रसादंमांप्रत्यधुनाजगन्निवा
सत्वात्प्रसीदयेनाहंस्थितोभवामीत्यभिप्रायः २५॥

मधुभाष्य

२५॥

भाष्य अनुवाद

और हे देवेश तुमारा मुख देखि डरके मारे हमे दिशा भूलि गई और सुख पावते नहीं हे जग निवास अब प्रसन्न होउ के सा मुख देखि डर भाषा सो कहते कि बडे कराल दांती सेभ यानक जो प्रलयाग्नि के समान हैं २५

चौपई

दंत करालतोरे मुख नाना देखिए कालानल हि समाना
भा सें दिशा हि न लहों सुखलेशा होप्रसन्न जगवास सुरेशा
२५॥

अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवाव-
निपालसंघैः भीष्मो द्रोणः सूतपुत्रस्तथा-
सौ सहास्मदीयैरपि योधमुख्यैः २६

शाङ्करभाष्यटी॰ १

येभ्यो मम पराजयशङ्का प्रागेव आसीत् सा चापगता यतः
अमी चेति अमी च त्वां धृतराष्ट्रस्य दुर्योधनप्रभृतयस्त्वरमाणा वि-
शन्तीति व्यवहितेन संबन्धः सर्वे सहैव संहताः अवनिपाल-
संघैः अवनिं पृथ्वीं पालयन्तीत्यवनिपालास्तेषां संघैः किञ्च भीष्मो द्रो-
णः सूतपुत्रः कर्णस्तथासौ सहास्मदीयैरपि धृष्टद्युम्नप्रभृतिभि-
र्योधमुख्यैः योधानां मुख्यैः प्रधानैः सह २६

आनन्दगिरिकृतटीका॰ २

अस्माकं जये परेषां पराजये च यदिदं तत्तं पश्यामीत्याह येभ्य इति
तत्र हेतुत्वेन श्लोकमवतारयति यत इति २६

स्वामिकृतटीका ३

यच्चान्यद्द्रष्टुमिच्छसीत्यनेनास्मिन् संग्रामे भाविजयपराजयादिकं च
मम देहे पश्येति यद्भगवतोक्तं तदिदानीं पश्यन्नाह अमी चेति प-
ञ्चभिः अमी धृतराष्ट्रस्य पुत्रा दुर्योधनादयः सर्वे अवनिपालानां जय-
द्रथादीनां राज्ञां संघैः सहैव त्वद्वक्त्राणि विशन्तीत्युत्तरेणान्वयः त-
था भीष्मश्च द्रोणश्चासौ सूतपुत्रः कर्णश्च न केवलं त एव विशन्ति अ-
पि तु प्रतियोद्धारो ये अस्मदीया योधमुख्या धृष्टद्युम्नादयस्तैः
सह २६

पैशाचभाष्यटीका॰ ४ ॥

स्पष्टार्थं २६ ॥

॥ रामानुजभाष्यटीका॰ ५

[1] अमी चेति वक्त्राणीति अमी धृतराष्ट्रस्य पुत्रा दुर्योधनादयः सर्वे भीष्मः
द्रोणः सूतपुत्रः कर्णश्च तत्पक्षीयैरवनिपालसमूहैः सर्वैरस्मदीयै-
श्च केश्चिद्योधमुख्यैः २६ सह

अभिनवगुप्तकृतटीका॰ ६

स्पष्टार्थं २६

[1] स च पार्थो भगवतः श्रेष्ठत्वादिकं सर्वं स्वयं साक्षात्कृत्य तस्मिन्नेव भगवति सर्वात्मनि धार्तराष्ट्रादीनां
उपसंहारमनागतमपि तत्प्रसादलब्धेन दिव्येन चक्षुषा पश्यन्निदं प्रोवाच ॥

श्री· गी· टी· पे

परमार्थप्रपाटीका· ७

अथ्यामदपूर्वं पश्यामीत्याह अमी चेति पंचभिः तत्र रणे मरिष्यमा
णानां भक्तानामभक्तानां च भाविनीं दृश्यमाणां गतिं प्रथमेतानिरूप
यति तत्र भीष्मो द्रोणः सूतपुत्रः कर्णः तथा पुण्यकर्माणो भगवद्
भक्ताश्च तथाविधैरेवास्मदीयैर्योधमुख्यैः शिखंडि धृष्टद्युम्नादिभिः स
ह अपुनर्भवप्रदं त्वां विशन्ति तथाऽमी कूटकारिणेनानितापिव
नवनामेवमसिद्धा धृतराष्ट्रस्य पुत्रा दुर्योधनदुःशासनादय एको
त्तरशतं तथाविधैरेवावनिपालानां संघैः सह त्वरमाणाः पातना
र्थं वेगवत्तराण्येव वक्त्राणि विशन्ति २६

वनमाली टीका· ८

योऽस्वातंत्र्यमस्मेषां च पराजयं सर्वदा द्रष्टुमिच्छुः पश्यमस्मदेहेगुडा
केशयद्वा मद्दष्टुमिच्छसीति भगवदादिष्टं मधुना पश्यामीत्याह
अमी चेति पंचभिः अमी च धृतराष्ट्रस्य पुत्रा दुर्योधनादयः शतं तु
त्वं विना सर्वे त्वां त्वरमाणा विशन्तीत्यग्रिमेणान्वयः अतिशयत्त्व
कत्वेन क्रियापदस्थमत्वं गुण एव सहैवावनिपालानां शल्यादीनां
संघैः त्वां विशंति न केवलं दुर्योधनादय एव विशन्ति किंतेनयवे
न सर्वसंभाविनो भीष्मो द्रोणः सूतपुत्रः कर्णस्तथासौ सहास्मदी
यैः परकीयैरिवास्मदीयैः धृष्टद्युम्नादिभि
र्योधमुख्यैः सह त्वां विशन्तीति संबंधः २६

ऊस्मसवैजयन्तीटीका· ९

एवमखिलचेतनाचेतनात्मकस्य विश्वस्य भगवदधीनस्थिति
महत्त्वविमर्शेनेन भगवद्देह एव दृष्टमिस्लकमधुना राजवषा
पथितो भयोः सेनयोः स्थितानां सराग्रणां संहररूपं भूभाराव
तारणमनागतमपि भगवद्देहे दिव्येन चक्षुषा विश्वाकारे भगव
द्रूप एव दृष्ट्वा पार्थः निव्याकुलमनास्तत्त्वमेव भगवन्तमाह पञ्च
भिः अमी चेति धृतराष्ट्रस्य धृतो राष्ट्रो येन सतत्वेनेनाधर्मेणायेन
व्याकुलमनास्तत्त्वमेव भगवन्तमाह पञ्चभिः अमी चेति धृतराष्ट्र
स्य धृतो राष्ट्रो येन सतत्वेनेनाधर्मेणायेन यत्किंचित्कालं राज्यं लब्धं
पुत्राः पालितास्तस्य तद्राजस्य तेषां पुत्राणां चानन्तकालोत्तरस्य पुनरिति सूचि

तम् पुत्रा एकोनशतं दुर्योधनादयः सहोदराः अमी ये प्राणे-
भ्योऽप्यधिके युद्धस्य यात्वे स्वं स्वं मरणमविगणय्य स्थिताः इत्यनेन
स्वविपक्षयुधिष्ठिरादि पांचालानां कृपाचार्याश्वत्थामप्रभृतीनां च युद्धे
मरणाभावत्वं सूचितम् तथा भीष्मद्रोणाश्वत्थामासोमदत्तपुत्रः
कर्णः अस्मा विस्मेनन तस्य स्वविद्वेष्टृत्वं द्योतितम् वशाद्वादस्मा
के युधिष्ठिरादीनामपि प्रतिविन्ध्यघटोत्कचाभिमन्युप्रभृतयः
सर्वे एते अवनिपाले सर्वैः शल्यजयद्रथादीनामवनिपालानां
राज्ञां सैन्यैः समूहैः सह केवलं त एव किं त्वस्मदास्मदीयैरपि
केचित् मदीयैः परकीयैर्योधमुख्यैर्धृष्टद्युम्नविराटादिभिः स
हतां विष्णाश्रयमतिभयंकरे विशतीत्यध्याहारः अत्र भयसूच
कत्वेन क्रियापदस्यानन्वयत्वे गुण एव न तद्दोषो भवतीत्यर्थः येऽ
स्मदीया धृष्टद्युम्नादयस्तेऽपि प्रविशन्तीति सहोक्तिरलङ्कारः २६

मधुसूदनी टीका १०

अमी च धृतराष्ट्रस्य पुत्रा दुर्योधनप्रभृतयः शतं सोदराः युयु-
त्सुं विना सर्वे त्वां त्वरमाणा विशन्तीत्युत्तरेणान्वयः अतिभयसू-
चकत्वेन क्रियापदस्यानन्वयत्वं गुण एव सहैवावनिपालानां
शल्यादीनां राज्ञां संघैः त्वां विशन्ति न केवलं दुर्योधनादय ए-
व विशन्ति किं त्वजेयत्वेन सर्वैः संभावितोऽपि भीष्मो द्रोणः
सूतपुत्रः कर्णः तथा सोमदत्तादयः समद्वेष्टा सहास्मदीयैरपि पर-
कीयैरपि धृष्टद्युम्नप्रभृतिभिर्योधमुख्यैस्त्वां विशन्तीति संब-
यः २६

सदानंदी टीका ११

येभ्यः पराजयाशंका मम मासीत्तेऽप्यमी दुर्योधनप्रभृतयो
धृतराष्ट्रसुताः शतं १ शल्यादीनां महीपानां समूहैः सहैते
खिलाः त्वां विशन्ति तथा भीष्मद्रोणकर्णादयोऽप्यमी २ अजेय
त्वेन ये लोके शूराः संभाविता हि ते अस्मदीयैः सहानेकैर्धृ-
ष्टद्युम्नादिभिस्तथा योधमुख्यैर्विशन्ति त्वामित्येतेनान्वयास्स
च २६

नीलकंठी टीका १२

अमी त्वां विशन्तीत्यग्रिमश्लोकादपकृष्यते २६

आनंदीटीका स्पष्टार्थम् २६

रामकंठीटीका स्पष्टार्थम् २६ तएवहन्तांतउ

हषाक्रांतानांऊर्वादीनांचेष्टितंवर्णयि तमाह ॥

लासिकी [illegible]टीका

किंच अमीधृतराष्ट्रस्यपुत्रादुर्योधनादयःसर्वेशतंसहजाः अवनिपाला
नांशल्यजयद्रथप्रभृतीनांराज्ञांसमूहैःसहैवत्वांकालरूपंविशं
तीत्युत्तरेणसंबंधः येष्वरूपसात्ताकारस्यैवरूपेनानुभूतचरस्यापि
त्वन्मुखाविशंतीतिवर्तमानत्वेनोक्तिः एवमग्रेऽपिच तथाभीष्मोद्रोणः
सूतपुत्रोसौकर्णः अस्मदीयैस्तेषांप्रतियोद्धृभिर्धृष्टद्युम्नादिभिः स
हैतेसर्वेविशंति [illegible] २६

पंचोलीटीका

येभ्योममपराजयशंकाप्रागासीत्साचापगताइत्याह अमीचे
तिपंचभिः वचनैः अमीधृतराष्ट्रस्यपुत्राःदुर्योधनप्रभृतयः त
थाभीष्मोद्रोणःअसौसूतपुत्रःकर्णःअवनिपालसंघैःराज्ञां
समूहैःवास्मदीयैरपिधृष्टद्युम्नप्रभृतिभिःयोधमुख्यैःसहत्व
रमाणाःत्वांविशंतितेतवत्वरमाणाःदंष्ट्राकरालानिदंष्ट्राभिः
विकृतानिभयानकानिभयंकराणिवक्त्राणिविशंतितवमुखे
प्रविष्टानांमध्येकेचित्चूर्णीकृतैरुत्तमांगैःशिरोभिःदशना
तरेषुदंतविवरेषुविलग्नामांसभक्षाकलाइवदृश्यंते २६

रणवीरसमिद्धोधिनी ॥

अमीचेति अमीधृतराष्ट्रस्यपुत्रा दुर्योधनादयोवनिपालसंघैः
सहसर्वे तथाभीष्मोद्रोणोसौसूतपुत्रश्चकर्ण इत्येतेवास्मदी
यैर्धृष्टद्युम्नादिभिर्योधमुख्यैरपिसहसर्वे तेतवदंष्ट्राकरालान्य
तएवभयानकानिवक्त्राणित्वरमाणाः ससंभ्रमास्त्वां
विशंत्यर्थात्तेजस्यंतर्हिताभवंतीति तत्रकेचित्तवदह्यमानांतरे
षुदह्यमानानांदंतानांयान्यंतराणिसंधिच्छिद्राणितेषुविलग्नावि

लीनाःसंदृश्यंते उपलक्ष्यंते तत्रोपलक्षणमाह कूर्मांगैरिति कूर्मां
गैः स्वकैरुत्तमांगैः शिरोभिरुपलक्षणभूतैरेव तत्सादृश्यविली
नाउपलक्ष्यंते नत्वन्यावयवैरित्यर्थः २८॥

मधुभाष

२८॥

वक्त्राणि ते त्वरमाणा विशन्ति दंष्ट्राकराला
नि भयानकानि केचिद्विलग्ना दशनान्त
रेषु संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः २७

शाङ्करभाष्यटीका १

किञ्च वक्त्राणीति वक्त्राणि मुखानि ते तव त्वरमाणास्त्वरायु
क्ताः सन्तो विशन्ति किं विशिष्टानि दंष्ट्राकरालानि मुखानि भ
यानकानि भयङ्कराणि किञ्च केचिन्मुखानि प्रविष्टानां मध्ये
विलग्ना दशनान्तरेषु मांसमिव भक्षितं संदृश्यन्ते उपलभ्यन्ते चू
र्णितैश्चूर्णीकृतैरुत्तमाङ्गैः शिरोभिः २७

आनन्दगिरिकृतटीका २

न केवलं दुर्योधनादीनामेव पराजयः किन्तु भीष्मादीनाम
पीत्याह किञ्चेति भगवद्रूपस्याकतेहेत्वन्तरमाह किञ्चेति प्र
विष्टानां मध्ये केचिदिति सम्बन्धः २७

स्वामिकृतटीका ३

वक्त्राणीति एते सर्वे त्वरमाणा धावन्तस्तव दंष्ट्राभिर्विकृतानि भ
यंकराणि वक्त्राणि विशन्ति तेषां मध्ये केचिच्चूर्णीकृतैः शिरोभि
रुपलक्षिता दन्तसन्धिषु संश्लिष्टा दृश्यन्ते २७

पिशाचभाष्यटीका ४ ॥

स्पष्टार्थं २७ ॥

रामानुजभाष्यटीका ५

त्वरमाणा दंष्ट्राकरालानि भयानकानि तव वक्त्राणि विशन्ति
तत्र केचिच्चूर्णि तैरुत्तमाङ्गैर्दशनान्तरेषु विलग्नाः संदृश्यन्ते २७

अभिनवगुप्तकृतटीका ६ ॥

स्पष्टार्थं २७ ॥ ॥ ॥

परमार्थप्रपाटी टीका ७

किंभूतानि वक्त्राणि दंष्ट्राकरालानि अत एव भयानकानि तत्र के
चित् दुष्कृतिनश्चूर्णीकृतैरुत्तमाङ्गैः शिरोभिः दशनान्तरेषु दन्तस
न्धिषु विलग्नाः संश्लिष्टाः दृश्यन्ते २७

वनमालीटीका ८

अमी च त्वां धृतराष्ट्रस्य पुत्राद्याः सर्वे ते तव दंष्ट्राकरालानि भयानकानि वक्त्राणि त्वरमाणा विशन्ति तत्र केचिच्चूर्णितैरुत्तमाङ्गैः शिरोभिर्विशिष्टा दशनान्तरेषु विलग्ना विशेषेण संलग्नाः दृश्यन्ते मया सम्यगसंदेहेन २७

कुसुमवैजयन्ती टीका॰ ९

किंच वक्त्राणीति पूर्वोक्तास्ते सर्वे त्वरमाणा अतिवेगयुक्तास्संतस्ते तव वक्त्राणि कालानलसन्निभानि मुखानि विशन्ति प्रविशन्ति कीदृशानि दंष्ट्राकरालानि दंष्ट्राकरालाभयंकराणि युतानि अत एव भयानकानि अतिशयभयरूपाणि तेषां मध्ये केचित् कतिचित् वीराश्चूर्णितैः शकलीभूतैरुत्तमाङ्गैर्मस्तकैस्सहिताः दशनान्तरेषु तव दंतसंधिषु विलग्नास्संश्लिष्टाः संदृश्यन्ते मयेति शेषः २७

मधुसूदनी टीका॰ १०

अमी धृतराष्ट्रस्य पुत्रप्रभृतयः सर्वेऽपि ते तव दंष्ट्राकरालानि भयानकानि वक्त्राणि त्वरमाणा विशन्ति तत्र च केचित् चूर्णितैरुत्तमाङ्गैः शिरोभिर्विशिष्टा दशनान्तरेषु विलग्ना विशेषेण संलग्ना दृश्यन्ते मया सम्यगसंदेहेन २७

सदानंदी टीका॰ ११

तव दंष्ट्राकरालानि वक्त्राणि त्वरान्विताः विशन्ति भीष्मणामेते सर्वे दुर्योधनादयः १ तत्र चूर्णीकृतैः केचिच्छिरोभिः संयुता भटाः दंतान्तरेषु संलग्ना दृश्यन्ते मया स्फुटं २७

नीलकंठी टीका॰ १२

ते भीष्मादयः उत्तमाङ्गैः शिरोभिः अयं भावः धृतराष्ट्रस्य पुत्राः पापिष्ठाः भवंतमेव त्रैलोक्यशरीरं विशन्ति पापात्मरूपं तस्य पापपुरुषस्थानस्थितान्नरकानेव गच्छन्तीति तत्र त्वां [illegible] विशन्तीत्येव लोके भीष्मादयस्तु भक्ता यतोऽग्निर्ब्राह्मणावदास्यप्रसृतास्तद्भगवतो मुखं प्रविशन्तीति वैषम्यगतिसूचनार्थं त्वां धृतराष्ट्रस्य पुत्रा विशन्ति भीष्मादयस्ते वक्त्राणि विशन्तीति विभागदर्शनेनोक्तमिति २७

आनंदीटीका

[illegible] २७

रामकवीटीका

नानारूपैःपुरुषैर्वध्यमानाविशंतितेवक्त्रमविलब्धरूपम् योधिशिरा
धातराष्ट्राद्यायोधाःशस्त्रैःकृत्ताविविधैःसर्वएव वेगजमानिहतान्नून
मेवतथाहीमेत्वच्छरीरंप्रविष्टाः २७

लासिकी [illegible]तीटीका

किंच अमीदुर्योधनादयोदंष्ट्राभिर्विकृतानिभयंकराणितववक्त्राणिधावं
तोविशंति तन्मध्येकेचिद्योधाश्चूर्णितैः शिरोभिर्विशिष्टादंतसंधिषु
संश्लिष्टादृश्यंते [illegible] २७

पंचोलीटीका

स्पष्टार्थं २७

रणवीरसमिद्बोधिनी॥

स्पष्टार्थः २७॥

मधुभाष्य

२७॥

भाषा अनुवाद

और ये दुर्योधनादिक धावते हुये तुमारे विकट दन्त कराल मुखमे प्रवेश करते हैं और तिनके बीच कोई कोई योद्धा मस्तक चूर्ण हुये तुमारे दांतो के मध्य सन्धिमे लपटे से देख पडते हैं २७

चौपई

जो मुखमांहि परहि यह सहसा दंतकराल भयानक सहसा
कोईक दंतनमांहि लगे है देखिय चूर्णित सीस किते है २७

यथानदीनांवहवोऽम्बुवेगाःसमुद्रमेवा
भिमुखाद्रवन्ति तथातवामीनरलो
कवीराविशन्ति वक्त्राण्यभितोज्वलन्ति
२८

शाङ्करभाष्यटीका॰१

कथं प्रविशन्ति मुखानीत्याह यथा नदीनामिति यथा नदी
नां स्रवन्तीनां वहवोऽनेकेऽम्बूनां वेगाअम्बुवेगास्त्वराविशेषाः
समुद्रमेवाभिमुखाः प्रतिमुखाः द्रवन्ति प्रविशन्ति तथा त
त्तव अमी भीष्मादयोनरलोकवीरामनुष्यलोकपालाविशन्ति
वक्त्राण्यभितोज्वलन्ति प्रकाशमानानि २८

आनन्दगिरिकृतटीका॰२

उभयोरपि सेनयोरवस्थितानां राज्ञांभगवन्मुखप्रवेशनं नि
दर्शनेन विशदयति कथमित्यादिना २८

स्वामिकृतटीका॰३

प्रवेशप्रवेशमेवदृष्टान्तेनाहयथेति नदीनामनेकमार्गप्रवृत्ता
नांबहवोऽम्बूनांवारीणांवेगाःप्रवाहाःसमुद्राभिमुखाःसन्तोयथा
समुद्रमेवद्रवन्तिप्रविशन्ति तथामीयेनरलोकवीरास्तेऽभितो
विज्वलन्तिसर्वतःप्रदीप्यमानानितववक्त्राणिप्रविशन्ति २८

पैशाचभाष्यटीका॰४

स्पष्टार्थो २८ ॥ ॥ ॥

रामानुजभाष्यटीका॰५

यथेति एतेराजलोकाबहवोनदीनामम्बुप्रवाहाः^ २८ समुद्रमिव^

अभिनवगुप्तकृतटी ६ ॥ ॥

स्पष्टार्थो २८ ॥

परमार्थप्रपाटीटीका॰७

नुकृत^ अथास्येमन्दृष्टान्तमाह यथेति यथावहवोनानामार्गप्रवृत्ताः
नदीनामम्बुवेगाःप्रवाहाःसमुद्रमेवद्रवन्तिप्रविशन्तिप्रविश्यच
समुद्राकारामवन्तितथातवाभिमुखा अनुकूलानरलोकवीराउ
त्साहशालिनोभीष्मद्रोणादयस्त्वांविशन्ति २८

वनमालीटीका ८

राज्ञां भगवन्मुखप्रवेशने निदर्शनमाह यथेति यथा नदीनामनेकमार्गप्रवृत्तानां बहवोऽम्बूनां जलानां वेगा वेगवन्तः प्रवाहाः समुद्राभिमुखाः सन्तः समुद्रमेवाद्रवन्ति विशन्ति तथा तवामी नरलोकवीरा विशन्ति वक्त्राण्यभितः सर्वतो विज्वलन्ति २८

ऊरुमवैजयन्तीति ९

राजवीराणां विश्वरूपमुखप्रवेशने दृष्टान्तमाह यथा नदीनामिति यथेति दृष्टान्तेन नदीनां नदनदीनां बहवोऽनेकाः अम्बुवेगाः अम्बूनां नीराणां वेगाः वेगवन्तः प्रवाहाः अभिमुखाः सम्मुखाः सन्तः समुद्रमेवाद्रवन्ति प्रविशन्ति तथेति दार्ष्टान्ते अमी नरलोकवीराः नररूपेण नरलोकवर्तिनः स्वरासुरांशोत्पन्ना वीराः शूरास्तव विश्वरूपस्याभिविज्वलन्ति अभि सर्वतो विज्वलन्ति प्रदीप्यमानानि वक्त्राणि मुखानि विशन्ति प्रविशन्ति अयमवशानां ज्ञानपूर्वकत्वे दृष्टान्तो बोध्यः २८

राज्ञां भगवन्मुखप्रवेशने निदर्शनमाह—

मधुसूदनी टीका १०

यथा नदीनामनेकमार्गप्रवृत्तानां बहवः अम्बूनां जलानां वेगाः प्रवाहाः समुद्राभिमुखाः सन्तः समुद्रमेवाद्रवन्ति विशन्ति तथा तवामी नरलोकवीरा विशन्ति वक्त्राण्यभितः सर्वतो ज्वलन्ति अभिविज्वलन्तीति वा पाठः [illegible] २८

सदानंदी टीका ११

कथं ते प्रविशन्ति तत्र दृष्टान्ताभ्यां निदर्शयति वक्रमार्गप्रवृत्तानां नदीनां बहवोऽम्बुवेगाः वेगवन्तः प्रवाहा इव समुद्राभिमुखा यथा समुद्रं प्रविशन्ति एवं त्वद्वीरा महत्तराः भीष्मद्रोणादयः सर्वे तव वक्त्राणि सर्वतः प्रविशन्ति ज्वलन्ति ते महाकालेन योजिताः २८

नीलकंठी टीका १२

इदमेव सदृष्टान्तमाह यथेति तव वक्त्राणि विशन्तीति संबन्धः अभिविज्वलन्ति सर्वतः जाज्वल्यमानानि २८

आनंदीटीका स्पष्टार्थम् २८॥राज्ञांकालमुखप्रवेशेनिदर्शनमाह॥

रामकंठीटीका स्पष्टार्थम् २८

लालिकी [illegible]तीटीका

प्रवेशेत्वरयाहृष्टांतमाह॥
यथाबहुमार्गप्रवहंतीनांनदीनांजलप्रवाहः समुद्राभिमुखाः
समुद्रमेवद्रवंतिप्रविशंतितथामीनरलोकवीराः सर्वतोदीप्ता
नितवमुखानिविशंति [illegible]
[illegible] २८

पंचोलीटीका

भगवान्मुखेप्रवेशंदृष्टांतेनयोजयति यथेति यथानदीनां
बहवअनेकाअंबुवेगाः समुद्रमेवाभिमुखाद्रवंतिविशंतितथा
तद्वत् अमीभीष्मादयोनरलोकवीराः मनुष्यलोकशूराः तवअ
भिविज्वलंतिप्रकाशमानानिवक्त्राणिप्रविशंति २८

रणवीरसमिद्धोधिनी॥

अथपुनरस्तमेवार्थंनिदर्शयति यथेति नदीनां बहवोंबुवे
गा जलप्रवाहाअभिमुखा अभितःसर्वतोमुखंगतिर्येषांतेभि
मुखानिरर्गलगतिकाअपि यथासमुद्रमेवगच्छंति तथा
मी नरलोकवीरा नरलोकोमनुष्यलोकस्तत्रापियेवीरावीर
पुरुषास्तेपितवाभिविज्वलंति प्रज्वलद्रूपाणिवक्त्राणिविशं
तीति २८॥

मधुभाष्य

90

भाषा अनुवाद

अब उनके प्रवेश विषय मे दृष्टान्त कहते हैं कि जैसे अनेक अनेक मार्ग से नदियो के धारा प्रवाह समुद्रके अभिमुखे धा येभये जायकर समुद्रमे प्रवेश करते हैं तैसेही ये नरलोकके वीर सकल जाज्वलसमान तुमारे मुखमे पैठत जात हैं २८

चौपई

जैसे नदीके बहु जल वेगहि सागर सनमुख धह सम चलहि॥
तिमि यह भूमिलोकके वीर तव मुख ज्वलित प्रवेश अधीर २८

यथा प्रदीप्तं ज्वलनं पतङ्गा विशन्ति नाशाय समृद्धवेगाः तथैव नाशाय विशन्ति लोकास्तवापि वक्त्राणि समृद्धवेगाः २९

शाङ्करभाष्यटीका १

ते किमर्थं प्रविशन्ति कथं वा इत्याह यथेति यथा प्रदीप्तं ज्वलनं अग्निं पतङ्गाः पक्षिणो विशन्ति नाशाय विनाशाय समृद्धवेगाः समृद्धः उद्भूतो वेगो गतिर्येषां ते समृद्धवेगाः तथैव नाशाय विशन्ति लोकाः प्राणिनस्तवापि वक्त्राणि समृद्धवेगाः २९

आनन्दगिरिकृतटीका २

प्रवेशप्रयोजनं तत्प्रकारविशेषं चोदाहरणान्तरेण स्फोरयति ते किमर्थमित्यादिना २९

स्वामिकृतटीका ३

अवशत्वेन प्रवेशे नदीवेगा दृष्टान्त उक्तः बुद्धिपूर्वकप्रवेशे दृष्टान्तमाह यथेति प्रदीप्तं ज्वलनमग्निं पतङ्गाः शलभा बुद्धिपूर्वकं समृद्धो वेगो येषां ते यथा नाशाय मरणायैव विशन्ति तथैव लोकास्ते जना अपि तव वक्त्राणि प्रविशन्ति २९

पैशाचभाष्यटीका ४

स्पष्टार्थः २९ ॥ ॥ ॥

रामानुजभाष्यटीका ५

यथा प्रदीप्तं ज्वलनमिव चपलमानव वक्त्राण्यभिज्वलन्ति स्वयमेव त्वरमाणाः आत्मनाशाय विशन्ति २९

अभिनवगुप्तकृतटीका ६

स्पष्टार्थः २९ ॥ ॥ ॥

परमार्थप्रपा टीका ७

तथाये त्वमभिज्वलेति अभितो ज्वलमानानि वक्त्राणि विशन्ति ते यथा बुद्धिपूर्वकं समृद्धो वेगो येषां ते शलभाः पतङ्गा नाशाय मरणाय प्रदीप्ते ज्वलने विशन्ति तथैव लोकास्तव तव अतिनोपि तव वक्त्राणि विशन्तीति २९

वनमालीटीका ८

अबुद्धिपूर्वकप्रवेशे नदीवेगं दृष्टान्तमुक्त्वा बुद्धिपूर्वकप्रवेशे दृष्टान्त

माह यथेति यथा पतंगाः शलभाः समृद्धवेगाः संतो बुद्धिपूर्वकं
प्रदीप्तं ज्वलनं विशंति नाशाय मरणायैव तथैवैते लोकाद्दुर्योध
नादयः नाशाय विशंति सर्वेपि नाशाय विशंति सर्वेपि नाशाय त
ववक्त्राणि समृद्धवेगाः बुद्धिपूर्वकप्रवाहेण विशंति २९

कृष्णमेवेजयन्तीटी ९

किंचात्र दृष्टांतमाह यथा प्रदीप्तमिति यथा नाशायात्मविनाशा
यैव समृद्धवेगाः समृद्धः सम्यक्पुष्टो वेगो येषां ते तथा संतः पतंगाः
शलभाः प्रदीप्तं प्रज्वलितं ज्वलनमनलं विशंति तथात्मविनाशायै
व समृद्धवेगाः लोकाद्दुर्योधनप्रभृतयः सर्वेपि ते जनास्तव विश्वा
कारस्य वक्त्राणि मुखानि प्रविशंति अत्र स्ववशेन ज्ञानपूर्वकप्रवेश
ने दृष्टांतो बोध्यः २९

अबुद्धिपूर्वकप्रवेशे नदीनां वेगं दृष्टांतमुक्त्वा माह—

मधुसूदनीटीका॰ ९ बुद्धिपूर्वकप्रवेशे दृष्टांत

यथा पतंगाः शलभाः समृद्धवेगाः संतो बुद्धिपूर्वं प्रदीप्तं ज्वलनं
विशंति नाशाय मरणायैव तथैव नाशाय विशंति लोकाः एते दु
र्योधनप्रभृतयः सर्वेपि तव वक्त्राणि समृद्धवेगा बुद्धिपूर्वमना॰
यथा [illegible] २९

सदानंदी टीका॰ ११

यथा पतंगा उद्धतवेगास्ते बुद्धिपूर्वकं विशंत्यग्निं ज्वलंतं च स्वना
शाय तथैव ते १ दुर्योधनादयः सर्वे वेगवंतो मुखानि ते मरणा
य विशंतीमे बुद्धिपूर्वं प्रवाहतः २९

नीलकंठी टीका॰ १२

बुद्धिपूर्वकमेव ते त्वद्वक्त्राणि प्रविशंतीति सदृष्टांतमाह यथा प्र
दीप्तमिति २९

आनंदी टीका स्पष्टार्थम् २९

रामकंठी टीका

यन्न्लोकपंचकेऽभिगदितमाख्यानमात्रं किंतु तव वक्त्राणि विशंतीति
वस्तुवृत्तेन दंष्ट्राकरालानीत्यादिविशेषणविशिष्टानि वक्त्राणि पूर्वकस्मा
विंतु रूपं वक्त्रं न विशंति इति यदुक्तं तत्र कालभक्षणमेवाधिनोवात

कृतिविशेषरूपानानाविधशास्त्रयपकस्मोतदीयायोपरस्मोसामान्यश
स्रोपदिशामेति इतिभगवतः सर्वशास्त्रप्रत्यवप्रतिपादनपरंवोद्धव्यम्
यतएकवक्त्रशब्देनप्रतिपादितायाः सामान्यशास्त्रैरव्यपदेशत्वादचिंत्य
रूपत्वेनविशेषणामुक्तम् तथाहि इमेतवशरीरस्यनेत्रतदेवस्फुटीकृतं
अत्रश्लोकपंचकेसार्धेनानारूपेरित्यादितवशरीरंप्रविशन्तीत्यंतंश्लो।
कसार्धकंश्लोकसामान्यार्थेनपठंतिकेचित् कश्चित्तवरोगसानिहताश्च
मित्यादिश्लोकाधमनेनाभिप्रायेणनपठंतीह तत्ववद्रूपुस्तकदर्शनाद्वा
रतेच तत्रसार्धश्लोकप्रमाणपनाद्यामस्माभिःश्लोकपंचकंसार्धमेवपठि
तं २८ [illegible]

लासिकी [illegible]टीका स्पष्टार्थः [illegible] २९ वेवश्यपनप्रवेशेनदीवेगंहृष्टांत
सुक्तासातंअग्रोणकेषांचिद्योधकृत्वात् नांप्रवेशेहृष्टांतमाह ॥

पवोलीटीका

अवश्यत्वेनप्रवेशेनदीशशाहृवेगदृष्टांतउक्तः बुद्धिपूर्वकप्रवेशे
सप्रयोजनदृष्टांतमाह यथाप्रदीप्तमिति यथासमृद्धवेगाः अ
तिरंहसायुक्ताः पतंगाशलभाप्रदीप्तंज्वलनमाग्निंनाशायविशं
तितथैवलोकाः प्राणिनः नाशायसमृद्धवेगाः तववक्त्राणिविशं
ति २९

रसावीरसमिक्षोयिनी ॥

यथेति यथाप्राह्मोनिदर्शने प्रदीप्तंज्वलन्तमानंज्वलनंधि
ग्वावंतपतंगाः पक्षिविशेषाः समृद्धवेगाअपि नाशायस्वा
त्मानंस्वयमेवनाशायितंयथाविशंति तथैवलोकाः समृद्धवे
गाः प्रबलाअपि तववक्त्राणिनाशायविशंतीति २९ ॥

मधुभाष्य

२९

भाष्य अनुवाद

वेवश रूप प्रवेश मे नदी का दृष्टान्त कहि कर अब बुद्धिपूर्वेक प्रवेश करने मे दृष्टान्त करते हैं कि जैसे बड़े वेग औ उत्साह से पतङ्ग जो पंखी ते नाशके निमित्त दीप शिखामे जाय गिरते औ मरते हैं तैसेही अति वेगसे ये सब वीर मनुष्य नाशके अर्थ तुमारे मुख मे आय कर प्रवेश करते हैं २९

चौपई

ज्वलित अग्निमे सलभ प्रवेशों नाशहि को निज जव युत जैसों
तिमि सब मुख तव माहि समाहि बहुत वेगकर लोक हि
जाहि २९ ॥

a4

लेलिह्यसे ग्रसमानः समन्ताल्लोकान् समग्रान् वदनैर्ज्वलद्भिः तेजोभिरापूर्य जगत् समग्रं भासस्तवोग्राः प्रतपन्ति विष्णो ॥

शाङ्करभाष्यटीका १

त्वं पुनः लेलिह्यसे इति लेलिह्यसे आस्वादयसि ग्रसमानोऽन्तः प्रवेशयन् समन्तात् समन्ततो लोकान् समग्रान् समस्तान् वदनैर्वक्त्रैः ज्वलद्भिर्दीप्यमानैस्तेजोभिरापूर्य संव्याप्य जगत् समग्रं सहाग्रेण समस्तमित्येतत् किञ्च भासो दीप्तयस्तवोग्राः क्रूराः प्रतपन्ति प्रतापं कुर्वन्ति हे विष्णो व्यापनशील ॥

आनन्दगिरिकृतटीका २

योद्धुकामानां राज्ञां भगवन्मुखप्रवेशप्रकारं प्रदर्श्य तस्यां दशायां भगवतस्तद्भासाञ्च प्रवृत्तिं प्रकारं प्रस्तावयति त्वं पुनरिति भगवत्प्रवृत्तिमेव प्रस्ताय तदीयभासां प्रवृत्तिं प्रकटयति किञ्चेति ॥

स्वामिकृतटीका ३

ततः किमत आह लेलिह्यस इति ग्रसमानो गिलन् समग्राँल्लोकान् सर्वानेतान् वीरान् समन्तात् सर्वतो लेलिह्यसे अतिशयेन भक्षयसि ज्वलद्भिर्वदनैः किंच हे विष्णो तव भासो दीप्तयस्तेजोभिः विस्फुरणैः समस्तं जगत् व्याप्य तीव्राः सत्यः प्रतपन्ति संतापयन्ति ॥

पैशाचभाष्यटीका ४

लेलिह्यसे स्पर्शमास्वादयसि ॥

रामानुजभाष्यटीका ५

लेलिह्यस इति राजलोकान् समग्रान् ज्वलद्भिर्वदनैः समन्ततः कोपवेगेन ग्रसमानः तद्रुधिरासक्तमोष्ठपुटादिकं लेलिह्यसे पुनः पुनर्लेहनं करोषि तवातिघोरा भासो रश्मयः तेजोभिः स्वकीयैः प्रकाशैर्जगत् समग्रमापूर्य प्रतपन्ति ॥

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ॥

१ श्री
गी·टी·
प

05

लेलिह्यसइति समग्रान्लोकान्समंततोवदनैर्ज्वलद्भिःग्रस
मानःगिलन्सन्पुनरत्यर्थंलेलिह्यसेस्वत्रिणीस्टशसिभोवि
ष्णोव्यापनशीलतवभासोदीप्तयस्तेजोभिःस्फुरणैःसमस्तंजगदा
पूर्याउग्राःसंतःप्रतपंतितापयंति अत्रपूर्वोपक्रांतान्दृष्टवद्देवान्
रपि रक्षोहणंवाजिनमाजिघर्मिमित्रंप्रथिष्ठमुपयामिशर्मशि
शानोअग्निःक्रतुभिःसमिद्धःसनोदिवासरिषःपातुनक्तं १ अया
दंष्ट्रोअर्चिषायातुधानानुपस्पृशजातवेदःसमिद्धः आजिह्वया
मूरदेवानुरभस्वक्रव्यादोवृक्त्व्यपिधत्स्वासन् २ भाष्ये रक्षोहण·
मितिपंचविंशत्यृचंसूक्तं — — भरद्वाजऋषिः अनुक्रांतंचर—
क्षोहणं— पंचाधिकाविंशतिःसंहाराभिहरणेपरिव्राजेरित्येषा·
नयेतिसर्वत्रक्रमः तत्रप्रथमारक्षोहणमिति रक्षोहणंरक्षसां
हंतारं वाजिनंबलवंतंवाअग्निमाजिघर्मि· — — — अग्निवैश्वानरा
त्विविश्वरूपमेस्वरंआजिघर्मिघृतेनजुहोमिप्रदीप्तंतीक्ष्णीकरो
मीत्यर्थः किंचमित्रंभजतामनुकूलंप्रथिष्ठंपृथुतरंव्यापकंशर्म
शरणमुपयामि सोयमग्निःशिशानोज्वालाभिस्तीक्ष्णीभूतःक्रतु
भिःकर्मपरैःपुरुषैःप्रज्वालितःकिंचसोग्निर्नोस्मान्दिवाअहनिरि
षोहिंसकाद्रक्षसः सकाशात्पातुरक्षतु अथद्वितीया हेजातवेदः
वैश्वानरत्वंसमिद्धःसम्यग्दीप्तःअयोदंष्ट्रःलोहशलाकावत्ती
क्ष्णदंष्ट्रःसन्यातुधानान् अर्चिषाज्वालयाउपस्पृशदहेत्यर्थः
किंचत्वंमूरदेवान्मूलदेवान्राक्षसान्जिह्वयाज्वालयारभस्व
मारयेत्यर्थः मारयित्वाचक्रव्यादोमांसभक्षकान्वृक्तिस्थिताआस
न् आस्येपिधत्स्वआच्छादय

वनमालीटीका ८

भगवतस्तद्रासोंवुप्रहतिप्रकारमाह लेलिह्यसइतिपवेवेगेन·
प्रविशतोलोकाद्युर्यापनादीसमग्रात्सर्वान्ग्रसमानोंतःप्रवेशय
न्ज्वलद्भिर्वदनैःसमंतात्सर्वतस्त्वंलेलिह्यसेआस्वादयसितेजोभि
र्भाभिरापूर्यजगत्समग्रं यस्मात्त्वंभाभिर्जगदापूरयसि तस्मात्·
वोग्रालोआभासोदीप्तयःप्रज्वलतोज्वलनस्येवप्रतपंतिसंतापजन

येति हे विष्णो सर्वव्यापक ॥

हनुमद्वैजयन्तीटीका ९

एवं योद्धृणां राज्ञां भगवन्मुखप्रवेशप्रकारमाह इदानीं भगवतो भगवद्भासां च तत्र प्रवृत्तिप्रकारमाह लेलिह्यस इति ज्वलद्भिः प्रज्वलमानैर्वदनैः समन्तात्कोपावेशेन सर्वतः समग्रान् समस्तान् लोकान् प्रति वेगेन त्वन्मुखानि प्रविशतो दुर्योधनादियोद्धृजनान् ग्रसमानो गिलन् सन् लेलिह्यसे रुधिरोक्तिताः कृष्णादयः किं त्वं पुनः पुनर्लेलिहि हे विष्णो व्यापनशील तेजोभिरापूर्य यत्समग्रं यस्मात् तेजोभिर्दीप्तिभिस्त्वं समग्रं जगदापूर्य स्थितोऽसि तस्मात्तवोग्राः प्रतिघोराः भासो दीप्तयः प्रतपन्ति प्रज्वलतो ज्वलनस्येव सन्तापं जनयन्ति यद्वा हे विष्णो तवोग्राः प्रतितीव्रा दीप्तयस्तेजोभिः स्वकीयैर्मरीचिभिर्जगदापूर्य परिपूर्णीकृत्वा प्रतपन्ति स्वयमेव प्रकाशन्ते ॥

मधुसूदनीटीका १०

योद्धृकामानां राज्ञां भगवन्मुखप्रवेशप्रकारमुक्त्वा तदा भगवतस्तद्भासां च प्रवृत्तिप्रकारमाह ॥ एवं वेगेन प्रविशतो लोकान् दुर्योधनादीन् समग्रान् सर्वान् [illegible]न् ग्रसमानः अन्तः प्रवेशयन् ज्वलद्भिर्वदनैः समन्तात् सर्वतस्त्वं लेलिह्यसे ज्वलनस्येव प्रतपन्ति सन्तापं जनयन्तीति हे विष्णो व्यापनशील [illegible] ॥

*आस्वादयसि तेजोभिर्भाभिरापूर्य जगत्समग्रं यस्मात्त्वं भाभिर्जगदापूरयसि तस्मात्तव उग्रा तीव्रा भासो दीप्तयः प्रज्वलतो

सदानन्दीटीका ११

एवं प्राणेषु योद्धृकामानां श्रीमद्भगवतो मुखप्रवेशप्रकारं प्रोच्य तदा भगवतो हरेः १ तद्भासां च प्रवृत्तिप्रकारं प्राह पाण्डवः आस्वादयसि तान् सर्वान् दुर्योधनमुख्यान् नृपान् २ ग्रसमानो निवेगेन विशतस्त्वं समन्ततः अन्तः प्रवेशयन् वक्त्रैः प्रज्वलद्भिः रा[illegible] तस्तेव दीप्तयस्तीव्रतरा भाः सन्तापं जनयन्ति प्रभूः ४ ॥

नीलकण्ठीटीका १२

येन यन्तेन लोकस्य करुणाबानपि नवादरो न सिप्रसन्नः ग्रसित इमिष्यसि वेत्याह लेलिह्यसे भूयो भूयोऽतिशयेन वास्वादयसि कीदृशस्त्वं समन्ताज्ज्वलद्भिर्वदनैर्लोकान् समग्रान् ग्रसमानः एवं निर्घृणस्यापि तव तेजो न हीयते प्रत्युत वर्द्धत एवेत्याह तेजोभिरिति हे विष्णो व्यापनशील समग्रं जगत् तेजोभिरा

*नुमित्रं

र्यतवउग्राः स्पष्टमशक्याभासोदीप्तयः प्रतपंतीतियोज
ना परार्थःस्पष्टः ३०

आनंदीटीका स्पष्टार्थम् ३०

रामकेशरीटीका स्पष्टार्थम् ३०

अथतथाविधंघोररूपंभगवतःशक्तिं दृष्ट्वा तत्त्वजिज्ञासार्थमिदमाह ३०॥

लासिकी चतुर्जीटीका

किंच ज्वलद्भिर्वदनैः सर्वाँल्लोकान्समंताद्ग्रसमानो भक्षयन् लेलिह्यसिवा
तायासेन निगिरसि हे विष्णो व्यापक तवकालरूपस्यदीप्तयः
संहारकारणीभूतास्तेजोभिर्विस्फुरणैः समग्रं जगद्व्याप्योग्राःतीव्राः
उष्णाःसत्यःप्रतपंतिःआध्यात्मिकादितापत्रयपरिणामेनसर्वंप्रति
फलंप्रयच्छंतीत्यर्थः ३०॥

पंचोलीटीका

भगवतश्चेष्टितमाह लेलिह्यसइतिहेविष्णोत्वंज्वलद्भिर्दीप्य
मानैः वदनैः समग्रान्लोकान्समंतात्ग्रसमानः अंतःप्र
वेशयन्लेलिह्यसेआदयतापितवउग्राःक्रूराः भासोदीप्तयः
स्वतेजोभिःसमग्रंजगदापूर्यप्रतपंतिसंतापयंति ३०॥

नवीनभक्तमनोरंजिनी॥

इदानीं तद्गुसंतीमूर्तिंस्तौति लेलिह्यसेइति विष्णोत्वमेव
समग्रांल्लोकान्समंतात्सर्वावयवतो ज्वलद्भिर्वदनैर्ग्रसमा
नः संलेलिह्यसे आस्वादयासिअथच तवोग्रा घोराभासश्च
समग्रंसकलमिदंजगत्तवतेजोभिरापूर्यप्रतपंति संताप
यंतिचेति ३०॥

सप्तभाषा

॥ ३०॥

भाषा अनुवाद

श्रोर प्रवेश के अनन्तर फेरि क्या होता सो कहतेहैं कि तुम भी अति भयानक जिह्वा लहलहाते हुये मानो त्रैलोक्य लील वे को रसना पसारी हैं अपने तेजसे समस्त जगत को सन्तप्त क रते भये उन सब वीरों को ग्रास करि भक्षण करनेकी इच्छा क रते हो ३०

चौपई

चारतरफसें ग्रसत अरु खादत मुखप्रदीप्तसें सबलोक दिखा दत तेज हि सें जग पूर्ण हुलस्ता तेरे तेज तपावें हुलस्ता ३०॥

आख्याहि मे को भवानुग्ररूपो नमोऽस्तु ते देव
वर प्रसीद विज्ञातुमिच्छामि भवन्तमाद्यं
न हि प्रजानामि तव प्रवृत्तिं ३१

शाङ्करभाष्यटीका १

यत एवमुग्रस्वभावोऽतः आख्याहीति आख्याहि कथय मे मह्यं
को भवानेवमुग्ररूपः क्रूराकारो नमोऽस्तु ते तुभ्यं हे देवव
र देवानां प्रधान प्रसीद प्रसादं कुरु विज्ञातुं विशेषेण ज्ञातु
मिच्छामि भवन्तमाद्यमादौ भवमाद्यं न हि यस्मात् प्रजानामि त
व त्वदीयां प्रवृत्तिं चेष्टां ३१

आनन्दगिरिकृतटीका २

भगवद्रूपसाक्षात्त्वेन दृष्टपूर्वत्वात्तस्य तस्मिन्नशिक्षितामेवाशङ्क्या
ह यत इति उपदेशं शुश्रूषमाणेनोपदेशकर्तुः प्रह्वीभवनं क
र्तव्यमिति सूचयति नमोऽस्त्विति कोऽर्थलाभो समर्थयते प्रसादमि
ति त्वमेवमां जानीषे किमर्थमिमामिदानीमर्थयसे प्रवृत्तिं चे
ष्टां दृष्ट्वा तथैव प्रतिपद्यस्वेत्याशङ्क्याह न हीति ३१

स्वामिकृतटीका ३

यत एवं तस्मात् आख्याहीति भवानुग्ररूपः क इत्याख्याहि कथय
तुभ्यं नमोऽस्तु हे देववर प्रसन्नो भव भवन्तमाद्यं पुरुषं विशेषेण
ज्ञातुमिच्छामि यतस्तव प्रवृत्तिं चेष्टां किमर्थमेव प्रवृत्तोऽसीति न
जानामि एवंभूतस्य तव प्रवृत्तिं वार्तामपि न जानामीति वा ३१

॥ पैशाचभाष्यटीका ४ ॥ ॥

स्पष्टार्थं ३१

रामानुजभाष्यटीका ५

आख्याहीति दर्शयात्मानमव्ययमिति त्वैश्वर्यं निरङ्कुशं साक्षात्
कर्तुं प्रार्थितेन भवता निरङ्कुशमैश्वर्यं दर्शयता नितान्तघोररूपमिदमा
विष्कृतं अतिघोररूपः को भवान् किं कर्तुं प्रवृत्त इति भवन्तं ज्ञातुं
मिच्छामि त्वदभिमतां प्रवृत्तिं न जानामि एतदाख्याहि मे नमोऽस्तु
ते देववर प्रसीद नमस्तेऽस्तु सर्वेश्वर एवं कर्तुमनेनाभिप्रायेण दर्श नम
घोररूपमाविष्कृतमिमत्कां प्रसन्नो भव आश्रितवात्सल्यातिरेके

श्री॰ १
गी॰ टी॰
प

३१

नविश्वैश्वर्यंदर्शयतोभगवतोघोररूपाविष्कारेकोभिप्रायइतिपृष्टो
भगवान्पार्थसारथिः स्वाभिप्रायमाहपार्थयोगेनविनापिधात
राष्ट्रप्रमुखविशेषराजलोकनिहंतमहमेवप्रवृत्तइतिज्ञापनायम
येघोररूपाविष्कारः तद्विज्ञापनेपार्थंप्रयोजयति

अभिनवगुप्तकृतटीका ९

नवप्रवृत्तिंनवेद्मिकेनाशयेनेदृशीयंप्रवृत्तिरित्यत्रभवतोन्तरंजं
गतो विद्याविद्यात्मनः शुद्धाशुद्धमिश्रसंविद्बलग्रासकरणादभिधी
यतइतिप्रायशः सूचितमत्राध्यायेरहस्यंउहं किंतमात्रसंविन्निमम
तेभ्योस्तु किंयत्संक्लिलेखेनार्थसंदेहः स्फुटस्मालंभेमहि अत्रयद्गुः
केमयाहतेष्वेवेनिमित्तयशोभीभवेतिभगवतातत्त्वंकेप्रागर्जु
नेन नचेतद्विस्मःकतरदिमादि ३१

अथभविष्यदर्थदर्शिनादाश्च परमार्थप्रदीकाटी॰ १ एवंवापुनःपृच्छति आख्याहीति ॥
उग्ररूपोभवान्इतिमेआख्याहिकथयस्वतेतुभ्यंनमोस्तुहेदेवव
रप्रसन्नोभव भवंतमाद्यंपुरुषंविशेषेणज्ञातुमिच्छामि यतोह
हेपिरूपेतवप्रवृत्तिंकिमर्थंप्रवृत्तोसीतिनवेद्मीनजानामि ३१

वनमालीटीका ८

अतिभीतःसंभ्रमादाह आख्याहीतिएवमुग्ररूपोतिक्रूराकारःकोभ
वान् वासुदेवसर्वेश्वरंजगदुदयादिकर्तारंचतुर्भुजंसर्वदाजानाम्यथ
मैश्वर्यविशेषस्त्वयाविष्कृतोमयाकदाचिदपिदृष्टस्तमाख्याहिकथय
ममह्यमनुतामनुग्रहाय अतएवनमोस्तुतेतुभ्यं सर्वगुरवेहेदेववरप्रसी
द विज्ञातुंविशेषेणज्ञातुमिच्छामिभवंतमाद्यंसर्वकारणंहियतस्त
वप्रवृत्तिमभिप्रायंनजानामि मयाज्ञातेनैश्वर्यदृष्टयार्थितेभवताअसर्व
लोकसंहारकमतितीक्ष्णनानाधर्मविशिष्टं प्रकटितंप्रलयकालसदृ
शीमभावात्किमर्थंप्रकटितमितिभावः ३१

[illegible]वैजयंतीटीका ९

दर्शयात्मानमव्ययमित्यादिनात्वनिरंकुशैश्वर्यंविश्वरूपंदर्शम
यात्वंप्रार्थितोसि नतुमहाघोरमिदंदृष्टंतस्माद्यदिदंत्वयाप्रदर्शितंतत्स्वरू
पंतद्धारणप्रयोजनंचज्ञातुमहमिच्छामीत्याह आख्याहीति ईदृशउ
ग्ररूपः क्रूराकारोभवान् कोभवतिममह्यमेतदाख्याहिनुकथयहे
देववर स्वरूपेहतेतुभ्यंसर्वगुरवेनमः प्रणामोस्तुप्रसीदप्रसादंकुरु

गं प्रसादं त्वं कुरु हि यस्मात्तव प्रवृत्तिं प्रसन्नोपयोगेन नाय प्रवृत्तोसी
त्यभिप्रायमहं कुतो चेष्टां न प्रजानामि तव सत्वोपि सन्नहं न वेद्मि तस्मा
दाद्यं कारणं भवन्तं सर्वेश्वरं विज्ञातुं विशेषेण ज्ञातुमिच्छामि सर्वेमत
ह्याख्याहि ३१

मधुसूदनी टीका १०

यस्मादेवं तस्मात्

एवमुग्ररूपः क्रूराकारः को भवानित्याख्याहि कथय मे मह्यमत्यन्ता
नुग्राह्याय प्रतएव नमोस्तु ते तुभ्यं सर्वगुरवे हे देववर प्रसीद प्रसा
दं क्रौर्यत्यागं कुरु विज्ञातुं विशेषेण ज्ञातुमिच्छामि भवन्तमाद्यं सर्व
कारणं न हि यस्मात्तव सत्वोपि सन् प्रजानामि तव प्रवृत्तिं चेष्टां

३१

सदानंदी टीका ११

को भवानुग्ररूपस्त्वं मे मह्यं कथय प्रकृष्टो प्रत एव नमस्तुभ्यमस्तु सर्वे
श्वराय च १ प्रसन्नो भव भक्तायानुग्राह्यायादि देव त्वां भवन्तं ज्ञा
तुमिच्छामि सर्वेश्वरं विशेषतः २ तव चेष्टां न जानामि यस्मात्तव
सत्वोपि सन् ३ ३१

नीलकंठीकादी १२

एवं दीप्याकुलीभूतोर्जुनो भगवानयमिति विस्मृत्याह आख्या
हीति एवमुग्ररूपः क्रूरकर्मा भवान्कोसीत्याख्याहि प्रभुकोसीति कथय प्रसीद शान्तो भव त्वामहं विज्ञातुमिच्छामि यत
स्तव प्रवृत्तिं चेष्टां न जानामि ३१॥

ज्ञानेश्वरीटीका

प्रसीद क्रूराकारं त्यक्त्वा को भवानुग्ररूप इत्याख्याहि [illegible]
[illegible] ३१

रामकंठीटीका

इमान्समग्राँल्लोकान्समंतात्सर्वतो ज्वलद्भिर्वदनैस्त्वानलैर्मुखैर्ग्रसमा
नः कवलं लेलिह्यसे भीतो लेलिह्यमानत्वाद्यस्य एवं तव उग्रा भासो चार
दीप्तयः समस्तं विश्वं तेजोभिर्व्याप्य प्रतपन्ति हे देव दीप्तं ते यतन्त एवं परम प्रा
प्तं तदिन्मात्रस्वभावमतः तव चोरं रूपं पश्यामि ततो देववर त्वां नमस्त
भ्यं नमः प्रसादं कुरु को भवानुग्ररूपः संहर्ता इति मम समाचक्ष्व यस्मात्तवे

वंविधंचोग्ररूपग्रहणेप्रवृत्तिंप्रयोजनंनजानामिततस्तेनाविज्ञाप्य
तमाद्यंपरमकारणंभवन्तंज्ञातुंविशेषेणबोद्धुमिच्छामि [illegible]
[illegible]
[illegible]

लासिकी वनमालीटीका

यतएवंतस्मात्त्वंक्रूराकारःकस्त्वमाख्याहिकथय तेतुभ्यंनमोऽस्तु हे देववरप्रसीदप्रसन्नोभव आद्यमनादिंनमोभवन्तंविज्ञातुंविशेषेण सामान्याकारतयावेदितुमिच्छामि यतस्त्वेश्वरस्यैवंविधाकृतिः क्रौर्यफलामानात्क्रियमाणांप्रवृत्तिंप्रयोजनंकिमर्थमेवंप्रवृत्तोसीतिन प्रजानामि [illegible] ३१॥

पंचोलीटीका

यतएवमुग्रस्वभावस्त्वमतःस्वस्वरूपंकथयेत्याह आख्याहीति हेदेववरमेमह्यंआख्याहिउग्ररूपःक्रूराकारोभवान्कःतेतुभ्यंनमोऽस्तुप्रसीदभवन्तंत्वांआद्यंविज्ञातुमिच्छामिहियस्मात् तवप्रवृत्तिंचेष्टांनजानामि ३१।

रणवीरसमिद्धोधिनी

अथ पुनरपिप्रार्थनांकरोति आख्याहीति देववर नमोऽस्तु ते प्रसीदेति प्रथमंभगवन्तंप्रसाद्यानन्तरंप्रार्थनापूर्वकंपृच्छति उग्ररूपोभवान्कोसीतिमेमह्यमाख्याहि प्रवृत्तीति यतश्चाहं भवन्तमादिमादिकारणंविज्ञातुमिच्छामीति ननुकिंमांप्रार्थ यसेस्वयमेवजानीषेइत्याशंक्याह नहीति तवप्रवृत्तिंप्रसरंच तोनजानाम्यनादित्वादतएवभवन्तंपृच्छामीतिभावः ३१॥

मधुभाष्य

३१॥

भाषा अनुवाद

हे महाराज जिससे तुमारा ऐसा उग्ररूप है इससे आप कोहो सो कहो और हम तुमको प्रणाम करते हैं हे देव श्रेष्ठ तुम मेरे पर प्रसन्न होउ और आदिपुरुष जो तुम सो तुम को मैं जाना चाहता हूं और पूर्व भूत जो तुम तुमारी प्रवृत्ति करे वाली कुछ भी हम नहीं जान सकते हैं ३१

चौपई

को तुम उग्र रूप मोहु कहहूं तोहि नमोस्तु देववर द्रवहूं
तोकों आदिहि जानन चहहों माया तव नहि बूझत अह
हों ३१

श्रीभगवानुवाच कालोऽस्मि लोकक्षयकृत्प्रवृ
द्धो लोकान् समाहर्तुमिह प्रवृत्तः ऋतेऽपि त्वा
न भविष्यन्ति सर्वे येऽवस्थिताः प्रत्यनीकेषु
योधाः ३२

शाङ्करभाष्यटीका·

कालोऽस्मीति कालोऽस्मि लोकक्षयकृत् लोकानां क्षयं करोतीति लो
कक्षयकृत् प्रवृद्धो वृद्धिं गतो यदर्थं प्रवृद्धस्तच्छृणु लोकान् समा
हर्तुं इह अस्मिन् काले प्रवृत्तः ऋतेऽपि विनापि त्वा त्वां न भविष्य
न्ति भीष्मद्रोणकर्णप्रभृतयः सर्वे येभ्यस्तवाशङ्का येऽवस्थिताः प्र
त्यनीकेष्वनीकमनीकं प्रति प्रत्यनीकेषु प्रतिपक्षभूतेषु अनीके
षु योधा एव योद्धारः ३२

आनन्दगिरिकृतटीका· २

यदर्था च स्वप्रवृत्तिः तत्सर्वं भगवानुक्तवानित्याह भगवानिति
कालः क्रियाशक्त्युपहितः परमेश्वरः अस्मिन्निति वर्तमानयुद्धो
पलक्षितत्वं कालस्य विवक्षितं लोकसंहारार्थं त्वत्प्रवृत्तावपि
नास्मावधिवती प्रतिपक्षाणां भीष्मादीनां मत्प्रवृत्तिं विनापि संह
र्तुमशक्यत्वादित्याशङ्क्याह ऋतेपीति ३२

स्वामिकृतटीका ३

एवं प्रार्थितः सन् श्रीभगवानुवाच कालोऽस्मीति त्रिभिः लोकानां क्ष
यकर्ता प्रवृद्धोऽत्युग्रः कालोऽस्मि लोकान्प्राणिनः संहर्तुमिह लोके प्र
वृत्तोऽस्मि अतः ऋतेऽपि त्वा इति त्वां हन्तारं विनापि न भविष्यन्ति न जीवि
ष्यन्ति के ते प्रत्यनीकेषु अनेकान्यनेकानि प्रतिभीष्मद्रोणादीनां स
र्वासु सेनासु ये योद्धारोऽवस्थिताः ते सर्वेऽपि ३२

पिशाचभाष्यटीका· ४

अनेन स्ववचनेऽकृतानस्यान्तरं श्रीभगवानुवाच कालोऽस्मीति लो
कानिहमञ्छरीरे समाहर्तुं पिडीकर्तुं प्रवृत्तः ऋतेऽपि त्वा त्वत्तरणादपि
न भविष्यन्तीति ३२

रामानुजभाष्यटीका·

श्रीभगवानुवाच कालोऽस्मीति कलयति गणयतीति कालः सर्वेषां

श्री० गी० टी० ५

धार्तराष्ट्रप्रमुखानां राजलोकानामवसानं गणयन्नहं तत्तलयं कृ
द्धोरूपेण प्रवृद्धो राजलोकान्समाहर्तुमाभिमुख्येन संहर्तुमिह
प्रवृत्तोस्मि अतो मत्संकल्पादेव त्वामृतेपि त्वद्योगाद्विनापि ते
धार्तराष्ट्रप्रमुखास्तव प्रत्यनीकेषु येव स्थिता योधास्ते सर्वे न भवि
ष्यंति १२

॥ अभिनवगुप्तकृतटीका ६ ॥

स्पष्टार्थं १२

परमार्थप्रपाटीका ७

एवं प्रार्थितः सन् भगवानाह कालइति प्रकर्षेण प्रवृद्धो वृद्धिं प्रा
प्तो लोकक्षयकृज्जगदुल्लकः कालः सन् लोकान्समाहर्तुमेव प्रवृत्तो
स्मि तदेवाह ये प्रत्यनीकेषु अनीकानि अनीकानि प्रति प्रत्येकं भूपतेस्से
नासु ये अवस्थिताः सन्नद्धीभूता योधाः सुभटास्ते सर्वे न भविष्यंति
न जीविष्यंति तर्हि मम गतिः कस्मादाह त्वामृतेत्वं विना त्वमे
भक्तः प्रणश्यतीत्युक्तत्वात् १२

वनमालीटीका ८

कलयतीति कालः जगत्कलयन्नपसंख्यानमोपमितिलयादेषु कर्ता
प्रकर्षेण वृद्धः परिपूर्णः अनादिनिधनो वा लोकानां तत्क्षयकृत् संहार
कर्तापीदानीं युगपद्ब्रह्मन् तद्योधनादीन् प्रसभेन संहर्तुमिह प्रवृ
त्तः उग्ररूपः किमर्थमिति प्रश्नपरिहाराय लोकलोकक्षयकृदित्युक्त्वा
प्रपादयति ऋतेपीति अपि पदात् तेयाद्यादीनपि विनेत्यर्थः अष्टाद
शाक्षौहिणीरूपेषु प्रत्यनीकेषु प्रतिपक्षभूतेष्वनीकेषु सैन्येषु ये व स्थि
तास्ते सर्वेपि न भविष्यंति न स्थास्यंति किं तु मरिष्यंतीत्यर्थः १२

ऋषभदेवजयंतीटीका ९

एवमर्जुनेन पृष्टः पार्थसारथिर्भगवान्स्वरूपं तद्द्वारेण प्रयोजनं चाह
त्रिभिः कालोस्मीति यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः मृत्युर्य
स्योपसेचनं क इत्था वेद यत्र स इत्यादिश्रुतिप्रतिपादितो यः कालः क
लयति सर्वेषां उपाधिभूतानां प्राणिनामवसानं गणयतीति तथाभू
तः अहमस्मि अहं भवामि लोकक्षयकृत् लोकानां ब्रह्मादिस्थावरान्ता
नां सर्वेषां जनानां तत्तत्र वर्णाश्रमवृत्तयकृत् हि नाशकरः प्रवृद्धः प्रभुता
निबोधस्वरूपेण वृद्धिं गतः सर्वव्यापी शंभुः कालः इत्यादि पदत्रयेण काम
वानुग्रहरूपरत्यसोमरसकृदमितदानी तव प्रवृत्तिं न जानामीत्यस्योत्त

न्त्रमाह लोकानिति इहास्मिन्कुरुक्षेत्रे समये वा लोकान्दुर्योधनादीन्स
माहर्तुं समपगाहर्तुं भक्षितुं प्रवृत्तोऽस्मि पूर्वमेवातिघोराकारदर्श
नादतिभयप्रदं पुनः सर्वलोकान्भक्षामीति तदुक्तिश्रवणेन स्वस्या
पि नाशं मा नयेत्तस्मात्कवदनमर्जुनमवलोक्य त्वां विहायेतरान्सर्वा
न्भक्षामीत्याह ऋतेऽपि त्वामिति त्वां सखायं भक्तं प्रपिशाहेन युधि
ष्ठिरादीन् ऋते विना प्रत्यनीकेषु प्रत्यनीकोपलक्षितस्वपक्षप्रतिपक्ष
सैन्येष्ववस्थितेनानेन महास्मदीयैरपि योधमुख्यैरित्यर्जुनो किं ऋतेऽपि त्वा
मिति भगवदुक्तिश्रवणं गच्छतेऽवस्थिताः युद्धकरणार्थं संसन्नमानाः
स्थिताः ये योधा योद्धारस्ते सर्वे मया हतत्वादेव न भविष्यन्ति सर्वाने
व भक्षामीत्यर्थः यद्वा ननु यद्यहं युद्धं करिष्यामि तर्ह्येव त्वमेतान्व
धिष्यसि नो चेत्कथमित्यपेक्षायामाह ऋतेऽपीति त्वां योद्धारं ऋतेऽपि त्वा
त्वामृते त्वद्योगात्तेऽपि विनापि मत्संकल्पादेवैते सर्वे न भविष्यन्ति
मरिष्यन्त्येवेत्यर्थः ३२

मधुसूदनीटीका ९

श्रीभगवानुवाच
कालः क्रियाशक्त्युपहितः सर्वस्य संहर्ता परमेश्वरोऽस्मि भवामि इदा
नीं प्रवृद्धो वृद्धिंगतः यदर्थं प्रवृद्धस्तच्छृणु लोकान्दुर्योधनादीन्स
माहर्तुं सम्यगाहर्तुं भक्षयितुं विना कथमेवं स्यादिति चेत् तत्राह ऋ
तेऽपि त्वामर्जुनं योद्धारं विनापि त्वद्व्यापारं विनापि मद्व्यापारेणैव न भवि
ष्यन्ति विनङ्क्ष्यन्त्येव सर्वे भीष्मद्रोणकर्णप्रभृतयः योद्धुमत्युद्वेगेन संभा
विताः प्रत्यनीकेष्वपि येऽवस्थिताः प्रत्यनीकेषु प्रतिपक्षसैन्येषु योधाः योद्धारः
सर्वेऽपि मयाहतत्वादेव न भविष्यन्ति तत्र तव व्यापारोऽकिंचित्कर इ
त्यर्थः [illegible] ३२

एवमर्जुनेन प्रार्थितः यः स्वयं यदर्थं वा प्रवृत्तिः तत्सर्वं त्रिभिः॥

प्रवृत्तोऽहमिहास्मिन्काले मत्प्रवृत्तिं

त्वया

सदानंदीटीका ११

एवं संप्रार्थितो विश्वजिन्मनातिप्रियेण मः स्वयं यश्च यदर्थं च प्रवृत्ति
स्त्रिभिर्वदन् १ उवाच परमेश्वरो निधिः श्रीभगवानिति कालोऽहमव
संहर्ता क्रियाशक्त्युपहितः सर्वेश्वरो भवामीहेदानीं प्रवृद्धिंगतः परा
लोकान्दुर्योधनादीन्सर्वान्भक्षयितुं त्वहं प्रवृत्तोऽस्मि जगत्कर्ता पाता
संहारकृद्विभुः मत्प्रवृत्तिं विना समेवं कथं स्यादिति चेच्छृणु त्वामर्जुनेन
विना शूरं त्वद्व्यापारं विनापि ते मद्व्यापारेण युद्धेन भीष्मद्रोणादयो
विलाः ५ विनंक्ष्यन्त्यत्र जेयता लोके संभाविताश्च ये चाप्यवस्थि
ताश्चान्ये प्रतिपक्षचमूषु भोः योद्धारस्ते मया सर्वे हतत्वादेव मतितो
व्यापारस्तव तत्र स्यादकिंचित्कर एव हि १२

१ श्री॰
गी॰ टी॰
५

नीलकंठीटीका॰ ३२

एवमर्जुनेन प्रार्थितो भगवानुवाच कालइति इहास्मिन्संग्रामे लोकान्समाहर्तुं भक्षितुं प्रवृत्तः प्रवृद्धो महान् लोकक्षयकृत्कालो नाम परमेश्वरोस्मि यस्मादेवं तस्मात्त्वमृतेपि त्वां त्वां विनापि सर्वे न भविष्यंति मरिष्यंति केते सर्वे ये प्रत्यनीकेषु शत्रुसैन्येषु योधाः शूराः भीष्मादयोऽवस्थिता इति ३२

एवं प्रार्थितः स्वस्वरूपं प्रवृत्तिं च श्रीभगवानुवाच

श्रानंदीटीका

पृथिवीभारभूतान् लोकान्संहर्तुं प्रवृत्तः संहारकर्ता कालस्वरूपोस्मीत्यर्थः ऋतेपि त्वा इति नु यद्यपि एतान्गणयाहं तु नेष्यामि तथापि मयैते हता एवेत्यर्जुनं प्रोत्साहयति यद्वा जयेम यदि वा नो जयेयुरिति प्रागुदितं संशयमपाकरोति ३२

रामकंठीटीका

केन हेतुना कस्त्वमेवंविधो घोररूपोसि किं मा विप्रकरोतीति विज्ञप्तो भगवानुवाच॥

कालोस्मीति कल्पलवस्वरूपापवक्तस्यैव विजृंभमाणशक्तेर्यद्घोररूपं समग्रशक्तेः कालाख्या घोरा ममैषा शक्तिरित्यर्थः शक्तेश्च शक्तिमदभेदादहमेव काल इत्युक्तं कीदृशः कालः सकललोकसंहारैकव्यापको धुनातिवृद्धिं प्राप्तः प्रवृद्धः अस्तं किं करोति पृथिवीभारभूतान् लोकानिमान्समाहर्तुं क्षपयितुं प्रवृत्तः अस्तु तस्मात्त्वदृतेपि त्वां विनापि परित्यागात्मकत्वात्सर्वे एते न भविष्यंति त्वय्ययोत्स्यमानेपि विनंक्ष्यंत्येव केते योधाः संप्रहारिणः प्रत्यनीकेषु प्रतिपक्षसैन्येषु ये स्थिता यत एवमेते सर्वे स्वेनावष्टंभाव विनाशेनाक्रांताः ३२

अत्रोत्तरं श्रीभगवानुवाच लासिकी

व[illegible]तीटीका

लोकक्षयकर्तायः कालः स एवास्मि प्रवृद्धो वृद्धिंगतः किमर्थं प्रवृत्तोसीत्यत आह लोकान्प्राणिनः संहर्तुमिह लोके प्रवृत्तोस्मि अतस्त्वामृतेपि त्वां हंतारं विनापि त्वय्ययोत्स्यमानेपीत्यर्थः एते सर्वे न भविष्यंति विनंक्ष्यंति सर्वेषां प्राणिनां विनाशकोस्मीत्यर्थः परिहारार्थमाह ये योधाः प्रत्यनीकेषु सर्वेषु सैन्येष्ववस्थिता एवं नंक्ष्यंति [illegible]

[illegible] ३२ ॥

पंचोलीटीका

एवंप्रार्थितः सन्श्रीभगवानुवाच कालोस्मीति लोकक्षयकृत् लो
कक्षयकारी कालोहमस्मि प्रवृद्धः प्रवृद्धिं प्राप्तः लोकान्समाहर्तुं सं
हर्तुमिह अस्मिन्काले प्रवृत्तयः ये प्रत्यनीकेषु अनीकमनीकं प्रति
योधाः योद्धारः अवस्थिताः ते सर्वे भीष्मद्रोणप्रभृतयः ये भवन्तं वा श
र्कांते सर्वे त्वां ऋते विना न भविष्यन्ति ३२

रणवीरसमिद्धोयिनी॥

इत्थमेव प्रार्थितो भगवानर्जुनं प्रत्यनुनिहृत्तरुवाच कालोस्मीति
प्रवृद्धः कालः कालक्रियाशक्तिमान् लोकक्षयकृत् लोकानां क्षयं
करोतीति लोकक्षयकृत् लोकसंहारकः प्रवृद्धः समरे हुतेजा इह
अस्मिन् लोके लोकान्समाहर्तुं प्रवृत्तोस्मि इति तथा हि ये योधाः प्रत्य
नीकेषु पाण्डुसेनासु अवस्थिताः संमुखे स्थितास्ते सर्वे त्वदृते त्वामृतेपि
त्वय्ययोत्स्यमानेपि न भविष्यन्ति भाविनां न गच्छेयुः यथा स्वयमेव न
श्यंतीति ३२॥

मधुभाष्य

कालपाशो जगद्बंधनच्छेदनज्ञानादिसर्वं भगवद्धर्मवाची कल
बंधने कलच्छेदने कलज्ञाने कलकामयेत्तुरिति पठति प्र
सिद्धश्च स पाशो भगवति नियतं कालपाशेन बद्धं शक्रविवस्य
स प्रयपुरुषः प्रपाशो लोकस्य हरति प्रजाः बधातिष्ठति मां रो
दुः पश्यन्नस्मानयाययेति मोनयधर्मे विस्तुनाबद्धो बलिर्वं कि
विस्रोवाधीश्वरेवितं धारयन्कालविग्रहे इति भागवते प्रवृद्धः
परिहरणानादिर्वा स्मरतं च सत्यं वाभीष्टादिति श्रुतिः एतन्मद्
हूतमनंतमितिव प्रविस्त्ररत्तु तव मस्तवीर्यात्वेषं प्रस्पस्यवि
रस्येनाम्नेतिव नबवर्द्धतं नासौ जनान न मविष्यति नेपनेसौ
इति हि भागवते यस्य दिव्यं हि तद्रूपं हीयते वर्द्धते न चेति मो नयमे
न कर्मणेति न कर्मणापि नाकिंचयमिति लोकान्समाहर्तुमिह
विशेषणप्रहतः भावादीश्वरं इत्यपि प्राहः प्रत्यनीकेन परस्पर

तथा सर्वेपि न भविष्यंति शूद्रो हिरण्यादिभेदेन बहुवचनं शुक्तं
यो स्याक्षिरक्षिते भूमौ पातयति नच्छिरो भेस्यतीति तत्सिद्धवैर
जयद्योपि विशेषणोक्तः सवर्णको सवीशक्तिरिति कर्णः य
देतद्दव्यमालंतत्स्या नेष्टुक्तमेवेत्यर्थः २२।

भाषा अनुवाद

इस प्रकार अर्जुन से प्रार्थना किये गये श्रीभगवान तीनि श्लोकसे कहते हैं कि मै सकल लोक का तय करनेवाला कालरूपहौं और प्राणियों को संहार करने की इच्छा करि इस लोकमे प्रवृत्तभया हौं सो एक तुमको छोडि और कोई तुम से नबचैगे अर्थात् प्रति सेना मे जो भीष्म द्रोण आदि योद्धा हैं वे सबमरैगे ३२

चौपई

हौंकाल प्रवृद्ध लोकक्षयकारी इरहूं लोकइहतलगअवतारी॥
बिनातोहिनहिकोईबचैहैं योयोधेप्रतिसेनरचे हैं ३२॥

तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून्भुङ्क्ष्व
राज्यं समृद्धं मयैवैते निहताः पूर्वमेव
निमित्तमात्रं भव सव्यसाचिन् ॥

शाङ्करभाष्यटीका १

यस्मादेवं तस्मात्त्वमिति तस्मात्त्वमुत्तिष्ठ भीष्मद्रोणप्रभृतयोऽति
रथा अजेया देवैरप्यर्जुनेन जिता इति यशो लभस्व केवलं पुण्यै
र्हि तत् प्राप्यते जित्वा शत्रून् दुर्योधनप्रभृतीन् भुंक्ष्व राज्यं समृ
द्धं असपत्नमकण्टकं मया एवैते निहताः निश्चयेन हताः प्राणै
र्वियोजिताः पूर्वमेव निमित्तमात्रं भव त्वं हे सव्यसाचिन् सव्येन
वामेन हस्तेन शराणां क्षेप्ता सव्यसाचीत्युच्यतेऽर्जुनः ॥

आनन्दगिरिकृतटीका २

तथोदासीनेऽपि प्रतिकूलानीकस्यामत्यातिकूलत्वादेव न भविष्य
तीत्येवं यस्मान्निश्चिते तस्मात्त्वमुदासीनमकिञ्चित्करमित्याह
यस्मादिति उत्तिष्ठ युद्धाय उद्युक्तो भवेत्यर्थः यशोलाभमभिन
यति भीष्मेति किं तेनाप्यसमर्थेनेत्याशङ्क्याह पुण्यैरिति राज्यभोगेऽपि
लते किमनर्थेति तेनेत्याशङ्क्याह जित्वेति भीष्मादिषु निरपेक्षु कु
तो जयाशङ्का इत्याशङ्क्याह मयैवेत इति नहि मृतमारणार्थे न
मे प्रवृत्तिरित्याह निमित्तेति सव्यसाचिपदं विभजते वामेनेति ॥

स्वामिकृतटीका ३

यस्मादेवं तस्मादिति तस्मात्त्वं युद्धायोत्तिष्ठ देवैरपि दुर्जया भीष्म
द्रोणादयोऽर्जुनेन निर्जिता इत्येवंभूतं यशो लभस्व प्राप्नुहि अयं ते
शत्रून् जित्वा समृद्धं राज्यं भुंक्ष्व एते तव शत्रवस्त्वदीययुद्धात्पूर्वमे
व मयैव कालात्मना निहतप्रायाः तथापि त्वं निमित्तमात्रं भव हे स
व्यसाचिन् सव्येन वामहस्तेन सायकं संधाते शीलमस्येति सव्यसा
वामेनापि बाणक्षेपात्सव्यसाचीत्युच्यते ॥

पिशाचभाष्यटीका ४

स्पष्टार्थं ॥

श्री॰
गी॰टी॰
५

रामानुजभाष्यटीका॰ ५

तस्मादिति तस्मात्त्वं तान् प्रति युद्धायोत्तिष्ठ तान् शत्रून् जित्वा य
शो लभस्व धर्म्यं च राज्यं समृद्धं भुंक्ष्व मयैवैते कृतापराधाः पूर्वमेव
निहताः हनने विनियुक्ताः त्वमेतेषां हनने निमित्तमात्रं भव मया॰
हन्यमानानां शस्त्रादिस्थानीयो भव सव्यसाचिन् शरसमवायसव्ये
न शरसमवायशीलः सव्यसाचीसव्येनापि हस्तेन शरसमवायक
रः हस्तद्वयेन योद्धुं समर्थ इत्यर्थः ३३

अभिनवगुप्तकृतटीका॰ ८

स्पष्टार्थं ३३

परमार्थप्रपाटीका॰ ७

अतएवाह तस्मादिति तस्मात्कारणात्त्वं युद्धायोत्तिष्ठ किं तत्फले
देवैरपि दुर्जया भीष्मद्रोणादयो ऽर्जुनेन निर्जिता इति यशो लभस्व त॰
तः शत्रून् जित्वा समृद्धं देशबलकोशदुर्गाद्युपेतं राज्यं भुंक्ष्व अयथा
र्थं नये एवमेवाह्निशप्रहर्तास्मामपि परमेश्वरेणोनीमारायोन्तर
रः तथाहि श्रीहोरी वामिहिरवामहापेमाताबाजास्याकारावाः
तवाहोवोवाहृत्रापिभुवाद्दुह्मामानिमोगाः लोकाष्टायोपेवाम्
अवातोः उपक्रघाउवाहोरस्तु अवत श्रीहोरी इतिवसंतुदेविकलेहा
उगयत इति उहग्रंथोक्तेः तथा अदीवेदीवेवाकुर्यादिति सामश्रि
तास्थगानक्रमेदर्शितः अथ संहितापाठस्तु त्वामिद्धि हवामहे सा
तौ वाजस्य कारवः त्वां वृत्रेष्विंद्र सत्पतिं नरस्त्वां काष्ठास्वर्वत इति भा
ष्यं भो इंद्र परमात्मन् वयं [illegible]रामानुजाः कारवस्तोतारः वाजस्य व
लस्य सातौ लाभे कांतमात्मानं त्वामित् त्वामेव हवामहे आह्वयामः आ
कारयाम इत्यर्थः तथा वृत्रेष्वावरकेषु उपस्थितेषु सत्सु त्वामेवा
[illegible]यामः तथा अर्वतः संग्रामस्य काष्ठासु मर्यादासु स्थानेषु च नरा
धर्मप्रवृत्तपुरुषास्त्वामेव सत्पतिं भक्तपालनपातिनं प्रभुं आह्वयामो नाम
मिमर्थ्यः आपलंभणावायांचरेहोणेहवेनमस्तनाजयामित्रेष्ठभे
नच्छंदसा पंचदशेन स्तोमेन स्तुतासाम्नावषट्कारेणवज्रेणसह
जानीति भाष्ये इंद्रेण परमात्मना देवेन कृत्वा पृतनाः शत्रुसेनाः
जयामि तत्रानुष्ठानमहत्तासाम्नातदुपासनया किंभूतेन त्रैष्टु
भेन च त्रयस्त्रिंशत्पादत्रेणच्छंदसा तथा पंचदशेन स्तोमेन च्छंदसा

१०५

णेच पंचभ्यो हि किं करोतिमत तिसृभिः सप्तकेनेति अयमर्थः एकेन सृ
क्के त्रिरावर्तनीयं तत्र प्रथमावृत्तौ प्रथमयाऽऽच क्षिरभ्यासः द्वि
तीयावृत्तौ मध्यमायास्तृतीयावृत्तौ उत्तमायाः सोऽयं पंचदशमला
सत्वेन एवमनयोपासनया षड्कारो वशीभूय शत्रून् हित
त्वि सकृतेन शत्रूवत्सहजात्मानिमर्थः साधनभाष्यकारेरपि
देविकाभिप्रायेण वाह्यसंग्रामविषयो दर्शितः साधनभाष्ये अ
ध्यात्मरीत्या अभ्यंतरसंग्रामविषयो दर्शितः वेदभाष्ये तु भयम
पि अत्रार्थेऽरूकृशातो याश्रुतिरपि संस्तुयन उभयसमाकृ
तमसमस्यंदत्तोव रूणस्समसः भिर्यद्धानाहृदयेषु षष्ठवः पय
जितासो मरुपतिलयंतो भाष्ये अस्मयमस्य दर्पपरमेश्वरेण स
मा रूतेय श्यापोप उभयेय ने संस्तुहि सम्यक् प्रकारेण निमित
अध्यात्मिकमाधिदैवं च तयोर्द्वतारोहो अध्यात्मिकस्तदा तावरू
णः प्रकाशकः परमात्मा अमुष्य मस्यरिंशो हृहस्पतिरितिश्रुते
रिंद्रः ऐश्वर्यवान् देवतारूपस्तु अथामभयेय नस फलमाह
भियमिति येन यत्नेन हृदयेषु प्राणिनामंतःकरणेषु षष्ठवः
षड्समपत्नाः भिर्यद्धानाः संतोः पतिलयंतो नाशमाप्नुवंतीम
ध्यात्मपत्नेऽअपरत्र तु हृदयेषु स्वांतःकरणेषु भयं दधानाः सं
तः स्वत एव युद्धं विनापि अपतिलपंतो नाशमाप्नुयोरिति अथ
सकृतमत्र सत्रामपदं शत्रुपराजयेनव प्रयासेनाधिकृतः एते
पूर्वं मयैव निहताः संतीति त्वयैव दृष्टं अतः परंभो सव्यसाचिन्
अर्जुन त्वं निमित्तमात्रं भव अत्रेतदुक्तं भवति पूर्वमहं कदंनि
मित्तमात्रं कृत्वा स्वनिर्मितेषु त्रुषिकल्पांतकालानलसमः स्वयं
वाणभूत्वा अर्जुनं यममपित्रिपुरमघातं सम्प्रति त्वां निमित्तमात्रं कृ
त्वा यतो जगत्सृष्टिप्रलयसमर्थोऽसंकल्पानामस्माकं कृत्क
लहलने कियानायासो लीलयैव श्रुतिरपि अहं रुद्राय धनुरात
नोमि ब्रह्मद्विषे शरवे हंतवा उ भाष्ये अहं रुद्राय महादेवार्थं मे
हत्वाऽसमलोकिके धनुरातनोमि विस्तारयामि किमुद्दिश्य ब्रह्म
द्विषे ब्रह्मद्वेष्टारं शर्वं त्रिपुरदैत्यं हंतं नाशयितुं तदुक्तं रथःतो
णीयंते त्यादि ११

श्री
गी॰ टी॰
८

भीष्मद्रोणादयो ये योद्धुमर्हास्तेन त्वयोक्ता स्ते मयैव निहतास्त्वं वि
षादं मा कार्षीरित्याह । तस्मादिति यस्मात्त्वद्व्यापारं विनाप्येते विनंक्ष्य
न्त्येव तस्मात्त्वमुत्तिष्ठ उद्युक्तो भव युद्धाय देवैरपि दुर्जया भीष्मद्रो
णादयो निरथाः कृता इमे वार्जुनेन निर्जिता इत्येवंभूतं यशो लभस्व
महद्भिः पुण्यैरेव हि यशो लभ्यते अयत्नतस्त्वं जित्वा शत्रून्दुर्योध
नादीन्भुंक्ष्व राज्यं समृद्धं निःकंटकं राज्यं पतेर्व शत्रवो मयैव कालात्मना
निहताः संहता हन्तारः पुरः त्वदीययुद्धात्पूर्वमेव केवलं त्वं शाला
भाय रथात्स्वाङ्गेण निपातिताः अतस्त्वं निमित्तमात्रमर्जुनेनैते नि
र्जिता इति सार्वलौकिकव्यपदेशास्पदं भव हे सव्यसाचिन् सव्ये
न वामेन हस्तेनापि शरान्सचितुं संधातुं शीलं यस्य तादृशस्त्व
न त्वं भीष्मद्रोणादिजयोऽसंभावितस्तस्मात्त्वद्व्यापारेणैतन्मया
रथा मा समानेषु तेषु तवैव कर्तृत्वं लोकाः कल्पयिष्यन्तीत्यभि
प्रायः ३३

उत्तमवैजयन्तीटीका ॥

तस्मादिति यस्मात्त्वद्व्यापारं विनैव मत्संकल्पादेवैते विनंक्ष्यन्त्ये
व तस्माद्धेतोः हे सव्यसाचिन् सव्येन वामेन हस्तेनापि शरान्सचितुं
संधातुं शीलं यस्य तत्संबोधने हे सव्यसाचिन् युद्धनिर्भरेणापि हस्त
द्वयेनापि योद्धुं समर्थ अर्थः मत्सहायेन त्रैलोक्यविजयसमर्थस्त्वमु
त्तिष्ठ स्वधर्मभूताय युद्धायोद्युक्तो भव यशो लभस्व समरे अमर
जयशालिनो देवव्रतगुरुकर्णशल्यादयोऽर्जुनेनानायासेनैव वि
निर्जिता इत्यतितुलां कीर्तिं त्वं प्राप्नुहि शत्रून्दुर्योधनादीन्जि
त्वा विजित्य समृद्धं धनरत्नादिसम्पन्नं निष्कण्टकं राज्यं भुंक्ष्व स्व
कीयत्वेन भोग्यतां प्रापय ननु तेऽतिप्रबलप्रतापान्भीष्मद्रोणादी
न्हठं कथं विजेष्यामीति चेत्तत्राह मयैवैते इति मया चाश्रितदुःखा
सहिष्णुना स्वभक्तविरोधिद्वेष्टा स्वजनरक्षणव्रतकर्त्रा सर्वं पूर्व
मेव कृष्णावस्त्रहरणकाल एवैते कृतापराधा भीष्मादयो निहता
वधिताः केवलं त्वद्यशोलाभाय वरथात्स्वादिवाहनेभ्यो न पातिता
स्मर्यः ननु पुरैव यद्येते त्वयैव निहताः पुनर्हि मां युद्धाय किम
र्थं प्रेरयसीति चेत्तत्राह निमित्तमात्रं भव मम यशः प्रकाशाय स्यात्तीयो भ
व यद्वा मया हन्यमानानामेषां लयाय निमित्तमात्रं कर्तृत्वाकोपप

ँ वद्

त्तमात्रंभव ॥

मधुसूदनीटीका ।

(यस्मादेवं) तस्मात्त्वद्व्यापारमंतरेणापि यस्मादेते विनंक्ष्यंत्येव तस्मात्त्वमुत्तिष्ठ
उद्युक्तो भव युद्धाय देवैरपि दुर्जया भीष्मद्रोणादयः अतिरथाः
फटिति त्वार्जुनेन निरस्ता इत्येवंभूतं यशो लभस्व महद्भिः पुण्यै
रेव हि यशो लभ्यते अयत्नतस्त्वं जित्वा शत्रून् दुर्योधनादीन् भुंक्ष्व
राज्यं सर्वसंपन्नं त्वेन भोग्यतां प्राप्य समृद्धं राज्यमकंटकं एते च त
व शत्रवो मयैव कालात्मना निहता संहृतायुषः त्वदीययुद्धात्
पूर्वमेव केवलं त्वयशोलाभाय रथात्त्वपातिताः अतस्त्वं निमि
त्तमात्रं भव अर्जुनेनैवैते निहता इति सर्वलौकिकव्यपदेशास्पदं भ
व हे सव्यसाचिन् सव्येन वामेन हस्तेनापि शरान् संधातुं शी
लं यस्य तादृशस्त्वं भीष्मद्रोणविजयेनासंभावितः
तस्मात्त्वद्व्यापारानंतरं मया रथात्पात्यमानेष्वेतेषु तवैव कर्तृ
त्वं लोकाः कथयिष्यंतीत्यभिप्रायः ननु द्रोणो ब्राह्मणो ध
नुर्वेदाचार्यो मम गुरुर्विशेषतो दिव्यास्त्रसंपन्नः तथा भी
ष्मः स्वच्छंदमृत्युर्दिव्यास्त्रसंपन्नश्च परशुरामेण द्वंद्वयुद्धमुप
गम्यापि न पराजितः [illegible] तथा यस्य पिता वृद्धक्षत्रः
तपश्चरति मम पुत्रस्य शिरो यो भूमौ पातयिष्यति तस्यापि शि
रस्तत्कालं भूमौ पतिष्यतीति स जयद्रथोऽपि जेतुमशक्यः स्व
यमपि महादेवाराधनपरो दिव्यास्त्रसंपन्नश्च तथा कर्णोऽपि स्व
यं सूर्यसमः कुंडलदानाराधनेन दिव्यास्त्रसंपन्नो वासवदत्तया चैकपुरु
षघातिन्या कर्तुमशक्यया शक्त्या विशिष्टः तथा कृपाश्वत्था
मभूरिश्रवः प्रभृतयोऽपि महानुभावाः सर्वथा दुर्जया एवं तेषु
सत्सु कथं जित्वा शत्रून् राज्यं भोक्ष्ये कथं वा यशो लप्स्ये इत्याशंका
मर्जुनस्यापनेतुमाह तदाशंकाविषयान्नामभिः कथयन् ॥

सदानंदी टीका ॥

त्वद्व्यापारं विनाप्येते मयैव निहता यतः तस्मात्त्वं भव युद्धाय स
मुद्युक्तोऽत्र केवलं । भीष्मादयो महाशूरा अमरैरपि दु
र्जयेन न जितास्त्वेति लभस्व त्वं यशो महत् जित्वा शत्रूननायासाद्भुंक्ष्व

(margin: मोक्षी)

श्री॰
गी॰ टी॰
प

107

राज्यमकंटकं मयैवैते हताः पूर्वं निमित्तं केवलं भव १ यथान
पातितान्लेन यशोलाभाय केवलं शरान्वामेन संधातं शीलेय
स्यतेवतिसः ४ तथापाराजेन तस्मान्मयैवैते हतत्वं स्थान पान
मात्रेषु कर्तव्येकल्पयिष्यतितेनत्वयि ५ ३३

नीलकंठीटीका: २२

तस्मादिति यस्मात्त्वां विनापि नैते भविष्यंति तस्मात्त्वं उत्तिष्ठ युद्धाय
शेषं स्पष्टं ३३

आनंदीटीका स्पष्टार्थम् ३३

रामकेदीटीका

कालात्मिकया मया स्वस्मात्प्रागेव ग्रस्तानेतान्निमित्तमात्रेण त्वं कारणमात्रं भव
पय स्वेति व्यक्तार्थं एवेष श्लोकः [illegible]
[illegible] ३३ ६४

लासिकी ~~[illegible]~~टीका

नैवेतद्धि मद इति प्रश्नसोत्तरं भाविकल्याण रूपमाह ॥

यत एवं तस्मात्त्वमुत्तिष्ठ दुर्जयानां भीष्मादीनां जयेन यशो ल
भस्व एवमप्रयासेन शत्रून्जित्वा समृद्धं राज्यं भुंक्ष्व एते न वशा
वो मयैव कालात्मना पूर्वमेव तद्व्यापारात्प्रागेव निहताः सत एव
याः हे सव्यसाचिन् सव्येन वामहस्तेनापि साचितुं भव [illegible]
[illegible] ३३ ॥

शरान्संधातुं शील मस्येति हे अर्जुन निमित्तमात्रं

पंचोलीटीका

यस्मादेवं तस्मात्त्वमुत्तिष्ठ भीष्मप्रभृतयोऽतिरथाः देवैः रप्यजे
यास्ते अर्जुनेन जिता इति यशो लभस्व केवलं पुण्यैर्हि न प्राप्यते श
त्रून्दुर्योधनप्रभृतीन्जित्वा समृद्धं राज्यं भुंक्ष्व एते मयैव एते
भीष्मप्रमुखाः कर्ण इति दर्शयति निहताः प्राणैः वियोजिताः हे स
व्यसाचिन् त्वं निमित्तमात्रं भव वामेन पाणिना शराणां क्षेपात्स
व्यसाची उच्यते अर्जुनः ३३ ॥

तस्मादिति यस्मादेवं तस्मान्मदाज्ञयात्वमुत्तिष्ठ युद्धोद्युक्तोभव तत एव स्वधर्माचरणाच्छत्रून्जित्वा यशो लभस्व समृद्धं ऋद्धिमन्निष्कंटकं राज्यं च भुंक्ष्वेति ननु कथमहमेतान्निहन्मीति चेत्तत्राह मयैवेति एते भवत्प्रतिपक्षा मयैव पूर्वमेव निहता भवंति ततस्तान्हंतुं त्वं प्रयासः त्वं तु सव्यसाचिन् निमित्तमात्रं भवेति त्वां निमित्तीकृत्य स्वयमेवाहं तान्हन्मि इति कातरविजृंभितो भ्रांतिरिति भावः ॥३३॥

मधुभाष्य

३३॥

भाषा अनुवाद

जिस हेत ऐसा होनहार है इस से तुम युद्ध के अर्थ उठो और देवतों से भी अजय जो भीष्म द्रोण आदि वीर सो अर्जुन से पराजित भये इस यश को लाभ करो और शत्रुवों का विनाश करि कै संपूर्ण राज भोग करो और ये जो तुमारे शत्रु तिन को युद्धके पूर्व ही कालरूप मैने यद्यपि हत करि राखा है तोभी हे सव्यसाचिन् अर्जुन तुम निमित्त मात्र होउ सव्यसाची उसको कहते जो बांये हाथ से युद्धादि कार्य करि शकै ३३

चौपाई

ताते तुं उठ यश को लेहु राज्य रीझि भजत अरि केहु हते पूर्व
सम मैं हि एते हो सव्यसाचि निमित हि तेते ३३

द्रोणञ्चभीष्मञ्चजयद्रथञ्च कर्णंतथान्या नपियोधवीरान् १ हतांस्त्वंजहिमाव्यथिष्ठा युध्यस्वजेतासिरणेसपत्नान् ३४

मया१

येषु१ शाङ्करभाष्यटीका १

द्रोणञ्चेति द्रोणञ्च येषु योधेषु अर्ज्जुनस्याशङ्कासीत् तांस्तान्स र्वान् व्यपदिशति भगवान् मया हतानिति तत्र द्रोणभीष्मयोस्ता वत् प्रसिद्धमाशङ्काकारणं द्रोणो धनुर्वेदाचार्यो दिव्यास्त्रसंपन्नः आत्मनश्च विशेषतो गुरुर्गरिष्ठो भीष्मः स्वच्छन्दमृत्युर्दिव्यास्त्रसंप न्नश्च परशुरामेण द्वन्द्वयुद्धमगमन्न च पराजितः तथा जयद्र थोपि यस्य पिता तपश्चरति मम पुत्रस्य शिरो भूमौ पातयिष्य ति यस्तस्यापि शिरः पतिष्यतीति कर्णोपि वासवदत्तया शक्त्या त्वमोघया सम्पन्नः सूर्यपुत्रः कानीनो यतोतस्तन्नाम्नैव निर्देशः म या हतांस्त्वं जहि निमित्तमात्रेण मा व्यथिष्ठास्तेभ्यो भयं मा कार्षीः युद्ध्यस्व जेतासि दुर्योधनप्रभृतीन् रणे युद्धे सपत्नान् शत्रून् ३४

आनन्दगिरिकृतटीका २

मयैवेत्यादिनोक्तं प्रपञ्चयति द्रोणञ्चेति किमिति कतिचिदेवा त्र द्रोणादयो गण्यन्ते तत्राह येष्विति द्रोणादिषु कुतः शङ्केत्या शङ्क्य द्वयोः शङ्कानिमित्तमाह तत्रेत्यादिना जयद्रथेपि शङ्का निमित्तमाह तथेति दिव्यास्त्रसंपन्न इति सम्बन्धः तत्र शङ्का यां कारणान्तरमाह यस्येति कर्णोपि तत्कारणत्वं कथयति क र्णोपीति पूर्ववदेव सम्बन्धः हेत्वन्तरमाह वासवेति सा खल्व मोघा पुरुषमेकमत्यन्तसमर्थं घातयित्वैव निवर्त्तते जन्मना पि तस्य शङ्कनीयत्वमाह सूर्येति कुन्ती हि कन्यावस्थायां म न्त्रप्रभावं ज्ञातुमादित्यमाजुहाव ततस्तस्यामेवावस्थायामयमुद भूव तदाह कानीन इति एतदेवाभिप्रेत्य कर्णग्रहणमित्याह य त इति उक्तेष्वन्येषु च न त्वया शङ्कितव्यमित्याह मयेति ३४

स्वामिकृतटीका ३

नैवेतद्विद्मः कतरन्नोगरीयोयद्वाजयेमयदिवानोजयेयुरित्यादि
यीशंका सापिनकार्येत्याह द्रोणंचेति येभ्यस्त्वमाशंकसेतान् द्रो
णभीष्मादीन्मयैवहतांस्त्वंजहिज्ञात्वामाव्यथिष्ठाः हत्वाभयंमा
कार्षीः सपत्नान्शत्रून्रणेयुद्धेनिश्चितंजेतासिजेष्यसि ३४

पिशाचभाष्यटीका॰ ४

द्रोणंचेतिजहिव्यापादयमाव्यथिष्ठाः मादुःखंकृथाः भयचलनंमा
कार्षीरित्यर्थः जेतासिजेष्यसि ३४

रामानुजभाष्यटीका॰ ५

द्रोणमिति द्रोणभीष्मकर्णादीन् कृतापराधतयामयैवहनने
विनियुक्तांस्त्वंजहित्वंहन्ताः एतान्गुरून्बंधूनन्यानपिभोगा
सक्तान्कथंहनिष्यामीतिमाव्यथिष्ठाः तानुद्दिश्यधर्मभयेनबंधु
स्नेहेनकारुण्येनचमाव्यथांकृथाः यतस्तेकृतापराधाः मयैवह
ननेविनियुक्ताः अतोनिर्विशंकोयुध्यस्वरणेसपत्नान् जेतासि
जेष्यसिनैतेषांवधेनृशंसतागंधः अपितुजयएवलभ्यतइत्यर्थः
३४॥

अभिनवगुप्तकृतटीका॰ ६

स्पष्टार्थः ३४ ॥ ॥ ॥

परमार्थप्रपाटीका ७

द्रोणंचेति द्रोणंभीष्मंजयद्रथंकर्णंचतथान्यानपियोधवीरा
न्मयासंहारकालरूपेणहतान्प्रहतशक्तीन्त्वंजहिमारय परंतु
माव्यथिष्ठा माभैषीः निर्भयः सन्युध्यस्वरणेसंग्रामेसपत्नान्
शत्रून्जेतासिजेष्यसि [illegible]

वनमालीटीका॰ ८

ननुद्रोणोधनुर्वेदाचार्योदिव्यास्त्रसंपन्नस्तथाभीष्मः स्वच्छंदमृत्युर्दि
व्यास्त्रसंपन्नः परशुरामेणद्वंद्वयुद्धमुपगम्यापिनपराजितस्तथा
यस्यपिताबृहत्क्षत्रस्तपश्चरतिममपुत्रस्यशिरोयोभूमौपातयि
ष्यतितस्यापिशिरस्तत्कालेभूमौपतिष्यतीतिसजयद्रथोपिनेवम
शकः स्वयमपिमहादेवाराधनपरोदिव्यास्त्रसंपन्नश्चकर्णोपिसू
र्यसमस्तदाराधनेनदिव्यास्त्रसंपन्नश्शाक्रदत्तैकवीरघ्नी[illegible]शा

क्त्वा गुरून्स्मत्तथान्ये भगदत्तादयोऽतिदुर्जया एव तेषु सत्सु कथं जि
ताशङ्कं कथं राज्यं कथं वा यशोलब्धमिति शंकामपाकरोतिहे
णमिति हेऽर्जुन दीर्घदर्शिकाविषयभूतान्सर्वानेव योधवीरान्
कालशक्त्या मया हतानेव त्वं जहि हतानां हनने को वा परिश्र
मः अतो मा व्यथिष्ठाः कथमेवं शक्ष्यामीति यथा भयमिति मित्ते भीष्मा
मागाः भयेन त्वा युद्धस्व जेतासि जेष्यसि विरोधिनः रणे संग्रामे स
पत्नान्सर्वानपि शत्रून् अत्र द्रोणं च भीष्मं च जयद्रथं चेति विकार
द्रोणपूर्वकानेय त्वं शंकानुपपत्तेः तथा शाहेन कर्णमप्यन्यानपि य१
योधवीरान्निःश्चापि शाहेन तस्मात्कृतेऽपि स्वस्य पराजयेऽवध
निमित्तमात्रं मा शंकिष्ठा इत्यभिप्रायः ३४

अस्मत्सैजयन्तीटीका ५

ननु यथाहं विद्याकुशलो हि जेतास्मि मम गुरुर्द्रोणस्तथा तद्वत्कु
लीतकरामेण पराजितः स्वेच्छामृत्युर्भीष्मः स्वयाथो मम गुरुः
शिरो भूमौ यातयिष्यति तस्य शिरः स्वयमेव भूमौ न कालमेवप
तिष्यतीति पितुः सकाशाल्लब्धवरो महादेवाराधनेन प्राप्तदि
व्यास्त्रो जयद्रथस्तथा सूर्याराधनेन लब्धदिव्यास्त्रो वासवदत्तैक
शकुक्षयादिशक्तिसम्पन्नः कर्णस्तथा कृपादयस्त्वामभूरिश्रवाः स
मरनपेक्षः निजबलप्रतापिनोऽतिदुर्जयास्तेरेतान्सर्वान् कथं जेष्या
मि कथं वा राज्यं भोक्ष्यामीत्याशंकायामाह द्रोणं चेति तथा चका
रशब्दोऽप्यर्थे द्रोणं दिव्यास्त्रसम्पन्नं गुरुमपि भीष्मं स्वेच्छामृत्युं दि
व्यास्त्रसम्पन्नं पितामहमपि जयद्रथं लब्धवरमपि स्वर्णमौशात्तु मस्त्री
नमपि एतानन्यानपि कृपाश्वत्थामादीन् योधवीरान् युद्धविशार
दान् दुर्जयानपि मया कालात्मना हतान्हता युधः सर्वानेता
न्त्वं जहि घातय रतान्नामारणेऽपि भ्रमो नास्ति समर्थः मा व्यथिष्ठाः को
दिव्यास्त्रसम्पन्नानेताने कोऽहं कथं विजेतुं शक्नोमीति भयं मागाः
यद्वा मा व्यथिष्ठाः वृद्धस्य हननकारुणापन्नयमं भयेन च व्यथा मा कृ
थाः यस्मात्कृतापराधानामाततायिनामेषां वध एव धर्मो लेखा
पिनाक्षितस्मा रसव्यथां मा कृविति स्थः युद्ध्यस्व युद्धं कुरु ध्ययेनार
णे संग्रामे सपत्नान् शत्रून् जेतासि जेष्यसि अपि शाहेः पंच भि नि
मित्तानि च पश्यामि विपरीतानि केशव न च श्रेयोऽनुपश्यामि हत्वा

स्वजनमाहवे नचैतद्विद्मःकतरन्नोगरीयोयद्वाजयेमयदिवानोजये
युःकथंभीष्ममहंसंख्येद्रोणंचमधुसूदन इषुभिःप्रतियोत्स्या
मिपूजार्हावरिसूदनेत्यादीनामस्मासामपिसर्वेषामर्जुनस्यशोका
नोनिराकरणेनयोजितम् ३४

[illegible] ॥ मधुसूदनीटीका ॥

द्रोणादीस्त्वदाशोकाविषयीभूतान्सर्वानेवयोधवीरान्कालात्म
नामयाहतानेवत्वंजहिहतानांहननेकोवापरिश्रमः युतोमा
मपिद्रोणः कथमेवंशस्त्रामीतिव्यथोभयनिमित्तापीडामागाः भ
येनकायुध्यस्वजेतासिनेष्यस्यविरेणैवरणेसंग्रामेसपत्नान्स
र्वानपिशत्रून् अत्रद्रोणंचभीष्मंचजयद्रथंचेतिचकारत्रयेणापू
र्वोक्ता जेयत्वशंकानृत्यपेततथाशब्देनकर्णोपि अस्मानपियोध
वीरानितत्रापिशब्देनतस्मात्कुतोपितवपराजयेवयनिमित्तेयम
पंचमार्थःकिच्छाइत्यभिप्रायः कथंभीष्ममहंसंख्येद्रोणंचमधु
सूदन इषुभिःप्रतियोत्स्यामिपूजार्हावित्यत्रापिसमुदायान्वया
नंतरमसेकात्वयोद्रष्टव्यः [illegible]
[illegible]
[illegible]
[illegible] ३४

सदानंदीटीका ॥

धनुर्वेदाचार्योममगुरुरयंद्रोणउविनेः स्वयंशिष्यैरपिसेवितरद्द
हविजेतनमस्तकः तथाभीष्मोवीरोरणभुविनालोमततसदैवतो
नजेतव्यःकोभुवियरशुरामेणवद्वरा १ तथाजयद्रथोयस्य
पिताश्रुतपसिस्थितः यः शिरोममपुत्रस्यपृथिव्यांपातयिष्यति
२ पतिष्यतिशिरस्तस्यस्वयंचेतिविनिश्चयः तथाकर्णोपिसंपन्नःशा
स्त्रास्त्रासवदतया ३ एकाततिवीरघातिन्यामोघीकर्तमशक्यया स्व
येचस्थैर्यवान्यौसिद्दिव्यास्त्रबलसंयुतः ४ तथान्येपिमहाशूराअस्मा
भ्यामहूपादयः सर्वेथाद्जेयाःस्वविते युधमस्मकथंजयः ५ कथं
निष्कंटकंराज्यंशास्यलप्स्यथवाकथं इत्यर्जुनाशयेनश्रीकृष्णोभिल
ष्याहोन्तरवचः ६ द्रोणंभीष्मंतथाकर्णंजयद्रथमथापरान् योध
वीरांस्त्वदाशोकागोचरान्निर्विलान्निमान् ७ कालात्मनामयेपोनह

तोऽसंज हि संगरे हतानां हनने कोवा तव पार्थ परिश्रमः ८ यथाद्वो
पप्रतापेन धस्ते विश्वमहे तके तत्र मस्यादि वा गजनस्य धीहि न लिप्र
माम्निका ९ तथा तेमस्य तापेन विध्वस्त शत्रु सेनिकं जहि स्थैर्यं म
माश्रित्य न ते तद्धनने श्रमः १० शाल्याम्यहं कथं नैवं पीडामागाम
योद्धवां युध्यस्व तं भयमल्कां जेष्यसे वरणे रिपून् ११ तस्मात्कातोपि
त्वस्य तेमा शोकिष्ठाः पराजये पापं वधनिमित्तं वा श्रीहरेरय माश
यः १२ ३४

नीलकंठी टीका १२

माव्यथिष्ठाः पतेम हान्तः कथं हंतव्या इत्याकुलीभावं मागाः इम
र्थः जेतासि जेष्यसि सपत्नान् शत्रून् ३४

आनंदी टीका

[illegible] ३४

रामकंठी टीका

द्रोणादयश्चाप्रतिमपराक्रमत्वात् दुर्ज याइति च माव्यथिष्ठा इत्याह ॥
द्रोणादयोपि सकललोकैकवीराः कालस्वरूपेण मया व्यापादि
ताः इति तान् त्वं जय मा व्यथिष्ठा मा भैषीरिति तात्पर्यम् [illegible]
[illegible] ३४

[illegible] टीका

द्रोणादयो महानुभावनया लासिकी अजय्या इत्याशंकापरिहारायाह ॥
चोपर्थे द्रोणमपि दिव्यास्त्रसंपन्नं भीष्मं स्वतंत्रमृत्युं परमेश्वराराधन
भिमृतमपि जयद्रथं न हंतुः शिरःपतनवरदानाज्जेतुमशक्यमपि
कर्णं सूर्यादिव्यास्त्रसंपन्नम् वासवदत्तया मोघया शक्त्या विशि
ष्टमपि तथान्यानपि एवंविधप्रभावातिशययुक्तान् वीरमुख्यान् मया
कालरूपेणाहतान् त्वं जहि एतस्य हनने भयाभावमाह माव्यथि
ष्ठा मा भैषीर्युध्यस्व शत्रून् रणे जेतासि जेष्यसि [illegible]
[illegible] ३४ ॥

पंचोलीटीका

नैवैतद्विद्मः इति याशंकासीत्सापि न कार्येत्याह द्रोणमिति येभ्यो
भयमर्जुनस्य शंका तान् मयाहतान् इति भगवान् अपदिशति द्रोणोयत्र

र्वेदाचार्यो दिव्यास्त्रसंपन्नः आत्मनो विशेषतो गुरुरिष्टः भीष्मः स्वच्छं
दमृत्युः दिव्यास्त्रसंपन्नश्च परशुरामेण द्वंद्वयुद्धसमागममापन्नः
पराजितस्तथा जयद्रथो यस्य पिता तपश्चरति यो मम पुत्रस्य शिरो
भूमौ पातयिष्यति तस्यापि शिरः पतिष्यतीति कर्णोपि वासवदत
याशक्त्याऽमोघयासंपन्नः सूर्यपुत्रः कानीनः एतानन्यानपि योधवी
रान् मया हतांस्त्वं जहि मा व्यथिष्ठास्तेभ्यो भयं मा कार्षीः युध्य

रणवीरसमिद्धोधिनी॥

अथाममेवार्थं विवृणोति द्रोणं चेति स्पष्टार्थः ३४॥

मधुभाष्य

३४॥

भाषा अनुवाद

और जो पूर्व मे अर्जुन ने शंका किया कि हम इन को जी
तेंगे या ये हम को पर हम नंही जानते हैं उसका वारण
करते हुये कहते हैं कि जिन से तम को शङ्का भई थी वे मुझ
से हत ये भये जो द्रोण भीष्म जयद्रथ कर्ण तथा और जो वीर
इन सब को तम जय करो और उन से न डरो तम अवश्य ही
जीतोगे ३४

चौपई

द्रोण भीष्म अरु जयद्रथ सोई सूतपुत्र अन्य वीर हिं जोई मैं मारे
ते मार न डरखहु युद्ध करहु रण शत्रु जितहु ३४

संजय उवाच एतच्छ्रुत्वा वचनं केशवस्य कृ
ताञ्जलिर्वेपमानः किरीटी नमस्कृत्वा भूय
एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य ३५

शाङ्करभाष्यटीका १

एतच्छ्रुत्वेति एतत् श्रुत्वा वचनं केशवस्य पूर्वोक्तं कृताञ्ज
लिः सन् वेपमानः कम्पमानः किरीटी नमस्कृत्य भूयः पुनरे
वाहोक्तवान् कृष्णं सगद्गदं सह गद्गदया वाचा मन्दशब्देन भया
विष्टस्य दुःखाभिघातात् स्नेहाविष्टस्य च हर्षोद्भवात् अश्रुपूर्णने
त्रत्वे सति श्लेष्मणा कण्ठावरोधः ततश्च वाचोऽपाटवं मन्दश
ब्दत्वे यत् सगद्गदेन सह वर्तत इति सगद्गदं वचनमाहेति
वचने क्रियाविशेषणमेतत् भीतभीतः पुनर्भयाविष्टचेताः
सन् प्रणम्य प्रह्वीभूत्वाहेति व्यवहितेन सम्बन्धः अत्रावसरे स
ञ्जयवचनं साभिप्रायं कथं द्रोणादिषु अर्जुनेन निहतेषु अजेयेषु च
तुर्षु निराश्रयो दुर्योधनो निहत एवेति मत्वा धृतराष्ट्रो जयं प्रति
निराशः सन् सन्धिं करिष्यतीति ततः शान्तिरुभयेषां भविष्यती
ति तदपि नाश्रौषीत् धृतराष्ट्रो भवितव्यवशात् ३५

आनन्दगिरिकृतटीका २

पराजयाभावात् करिष्यति वृथा सञ्जयो राज्ञे वृत्तान्तमुक्त्वा
निस्याह सञ्जय इति पूर्वोक्तवचने कालोऽस्मीत्यादि विश्वरूपदर्शि
नदशायामर्जुनस्य भगवता संवादवचने किमिति सञ्जयो रा
ज्ञे अजिज्ञापयदित्याशंक्य तदुक्तेस्तात्पर्यमाह अत्रेति तमेवाभि
प्रायं प्रश्नद्वारा विशदयति कथमित्यादिना तर्हि सञ्जयवचनं श्रु
त्वा किमिति राजा सन्धिं न कारयामासेति तत्राह तदपीति ३५

स्वामिकृतटीका ३

ततो यद्वृत्तं तद्धृतराष्ट्रं प्रति सञ्जय उवाच एतदिति एतत्पूर्वं स्मा॰
कर्तृयात्मकं केशवस्य वचनं श्रुत्वा वेपमानः कंपमानः किरीटी
अर्जुनः कृताञ्जलिः संपुटीकृतहस्तः कृष्णं नमस्कृत्य पुनरप्याहो
क्तवान् कथमाह भयहर्षावेशाद्गद्गदेन कंठकंपेन सहव

श्री
गी॰टी॰
५

113

वेतस्ततिसगद्गदं यथा भवति तथा अतिभीतादपिभीतः सन् प्रणम्या
वनतो भूत्वा ३५

पिशाचभाष्यटीका ४

संजय उवाच एतच्छ्रुत्वेति वेपमानः कंपमानः किरीटी अर्जुनः
सगद्गदं भीतभीतः प्रकारेणैव प्रणमपूर्वकं भगवन्तमर्जुन उवा
च ३५

रामानुजभाष्यटीका ५

संजयः एतदिति एवमाश्रितवात्सल्यजलधेः केशवस्य वचनं श्रु
त्वार्जुनः तस्मै नमस्कृत्वा भीतभीतोऽतिभीतस्तं प्रणम्य कृतांजलि
वेपमानः सगद्गदमाह ३५

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ३५ ॥ ॥ ॥

श्रुतधृतराष्ट्रं प्रतिसंजय उवाच
एतदिति –

परमार्थप्रपाटीका ७

किरीटी अर्जुन एतत्केशवस्य वचनं श्रुत्वा वेपमानः कंपमानः
नमस्कृतांजलिर्भूत्वा सगद्गदं कंपितस्वरं यथा भवति तथा भीत
भीतः सन् प्रणम्य इदं उवाच नत्वा भूयः पूर्वापमस्तं भक्ताभक्तको
टिद्वयीगतिं कृष्णं प्रमाह ३५

वनमालीटीका ८

भीष्मादिषु जयाशाविषयेषु हतेषु निराश्रयो दुर्योधनो हत एवेम
उभे ध्यायज्जयाशापरित्यज्य यदि धृतराष्ट्रः संधिं करिष्यति तदा शांति
कभ येषां भवेदित्यभिप्रायवान् ततः किं वृत्तमित्यपेक्षायां स
नयश्चाह एतदिति एतत् पूर्वोक्तं केशवस्य वचनं श्रुत्वा कृतांज
लिः किरीटी शक्रदत्तकिरीटः वेपमानः परमाश्चर्यदर्शनजनिते
न संभ्रमेण कंपमानोऽर्जुनः कृष्णं भक्तपापकर्षणं भगवन्तं नम
स्कृतवान् नमस्कृत्य भूयः पुनरप्याह उक्तवान् सगद्गदं भयेन हर्षे
ण वा अश्रुपूर्णनेत्रत्वे सति कफरुद्धकंठतया यो वाचो मंदत्वसकं
पकत्वादिविकारः सगद्गदस्तद्युक्तं यथा स्यात् भीतभीतः सन् प्र
णम्य अतिनम्रो भूत्वा इति संबंधः ३५

हंसवैजयन्तीटीका ९

यानेव द्रोणभीष्मजयद्रथकर्णादीनाश्रित्य दुष्टस्त्वसज्जो युद्धकर
णमेव निश्चितवान् ते तु कालात्मना भगवतैव हतप्रायास्तन्नित

त्वत्पुत्रविजयाशां मत्को भयेषां राज्ञां संरक्षणायायापि ते कथं
[वा] नवारयसीत्यभिप्रायं संजयस्ततः किमभूदित्येतदपेक्षायामा
ह एतच्छ्रुत्वेति केशवस्य केशौ विधिशिवौ वयति जनयतीति
तथा सतस्य विधिशिवयोर्जनकस्य भक्तवात्सल्यजलधेर्भग
वत इत्यनेन यो विधिशिवयोः पिता तस्याग्रेऽन्यस्तव पुत्रः स्व
विजयाय किंप्रत्यपकरिष्यतीति किंतु मरिष्यत्येवेति सूचितम् एत
कालोऽस्मीत्यारभ्य द्रोणं च भीष्मं चेत्यन्तं केशवस्य वचनं श्रुत्वा संभ्रमकृताञ्जलिः
कृतसंपुटकरयुगस्तन्वेपमानोऽद्भुतघोरदर्शनजनितसं
भ्रमेण कम्पमानः सन् भीतभीतो [illegible] निरतिशयभयाकुलः स
न्किरीटीवासवदत्तकिरीटं शिरोभूषणं विद्यते यस्य तथा स
इत्यनेनास्य परमवीरशिरोमणित्वं सूचितम् पार्थः कृष्णं स
जनशोकमोहादिकर्षणकरं सर्वेश्वरं नमस्कृत्वेमा घातम
कृत्य पुनश्च प्रणम्य प्रकर्षेणानिशयेन नम्रो भूत्वा सगद्गदे
न भयेनानन्देन वाश्रुपूर्णे नेत्रे सति कफरुद्धकंठतया मकं
पत्वमल्पस्वरत्वादिर्यो विकारः स गद्गदस्तत्सहितो यथा तेन सद्गु
कयथा स्यात्तथा भूय एव पुनरप्याह ब्रवीत् ३५

संजय उवाच

मधुसूदनी टीका। १

एतत्पूर्वोक्तं केशवस्य वचनं श्रुत्वा कृताञ्जलिः किरीटी इन्द्रद
त्तकिरीटः परमवीरत्वेन प्रसिद्धः वेपमानः परमाश्चर्यदर्शन
जनितेन संभ्रमेण संभ्रमेण कंपमानः अर्जुनः कृष्णं भक्ताः ख
कर्षणं भगवंतं नमस्कृत्वा नमस्कृत्य भूयः पुनरप्याह उक्तवा
न् सगद्गदं लघु कथयथा स्यात्तथा भीतभीतः अतिशयेन भीतः सन्
पूर्वं नमस्कृत्य पुनरपि प्रणम्यात्यंतं नम्रो भूत्वा प्राहेति संबंधः

[ते] त्वसगद्गदं भयेन हर्षेण वास्तु
पूर्णनेत्रे सति कफरुद्ध
कंठतया यो वाचो मन्द
त्वसकंपत्वादि विकारः

[illegible] ३५

मत्तानंदी टीका ११

हते भीष्मे तथा द्रोणे कर्णे च विनिपातिते जयद्रथप्रभृतिषु
तेषु जयशंसिषु १ हतोद्योधनो नूनं ते विनाशं निराश्रयः
इत्येतरं तत्से भायमृतराष्ट्रान्त्पोयदि २ स्वजयाशोपरिमसंसे

यिं कुर्यात्तदास्वयं उभयेषांभवेत्तांतिरिमभिप्रायवांस्ततः किंकुमि
मपेत्ताप्राग्रवाचेतिससंशयः पूर्वोक्तंवचआकर्ण्यकेशवस्यमहोपि
तः ४ इदंदत्तकिरीटेनपुक्तोसोमूरसत्तमः निवातकवचादीनांस
णसंहारकोर्जुनः ५ कृतांजलिः कंपमानः परमाश्चर्यदर्शनात् न
मस्कृत्यपुनः कृसंभक्तकेशापदं विभुं ६ आहसगद्गदंवाक्यश्रव
णेनिस्पृत्वावदं हर्षेणचभयेनाकसूर्णोत्तिनेमतिस्वयं ७ कफरू
द्धगलत्वेनविकारोयोगिरोभवेत् मंदत्वमप्रकंपत्वरूपः सोयंहि
गद्गदः ८ तमुक्तंवचनंप्रादात्संतभीष्मसंसत्था प्राङ्गमस्कृत्यभू
योपिप्रणम्याननकंधरः ३५

नीलकंठीटीका ११

भगवतैवमुक्तेसतिपश्चात्किंवृत्तमित्यपेक्षायांसंजयउवाच एत
कृतांजलिरित्यादिनाविरूप्तनभगवद्वाक्यान्नश्रुत्वेकिरीटीनकरिष्य
तीतिसूच्यते सगद्गदंभयहर्षाभ्यावेशेनगद्गदेनकंठकंपनेनस
हवर्तमानइतिसगद्गदंयथाभवतितथाआहउक्तवान् भीतभीतःश्र
त्यंतभीतःसन्नाहेतिसंबंधः अत्रआहेतिपदच्छेदेपुनरर्जुनउवाचे
तिपुनरुक्तंस्यात् अतःप्रणम्यअर्जुनउवाचेत्येवसंबंधोनतुप्रण
म्याहेति कातर्हिआहेतिक्रियायागतिः नेयंक्रियाकिंतर्ह्याहेतिम
सिस्वर्णमव्ययमित्यदोषः ३५

आनंदीटीका स्पष्टार्थम् [illegible] भगवद्वचनोत्तरका
लिकीमर्जुनावस्थांसंजयउवाच ३५॥

रामकंठीटीका॥ एवंभगवद्वक्तेरर्जुनावस्थां
धृतराष्ट्रायसंजयउवाच॥ ३५
स्पष्टार्थःश्लोकः [illegible] ३५

लासिकी [illegible]टीका
ततोयद्वृत्तंतद्वृत्तराष्ट्रंप्रतिसंजय
उवाच- एतच्छ्लोकत्रयात्मकंवचनंममाधिकालेकालरूपमालाकारेणाम्नुत्य
[illegible]नेवेपमानः अन्यत्स्पष्टम् ३५ ॥

पंचोलीटीका

ततोयद्वृत्तंतद्वृत्तांतंधृतराष्ट्रंप्रत्याह संजयउवाचएतदितिकिरी

टीअर्जुनःकेशवस्यएतत्पूर्वोक्तंवचनंश्रुत्वाकृतांजलिर्वेपमानः
सन्नमस्कृत्यभूयःपुनरपिकृष्णमेवभीतभीतःप्रणम्यसगद्गदमा
ह ३५

रसवीरसमिद्धोधिनी ॥

एवंविश्वरूपदर्शनानंतरंभगवदर्जुनसंवादःकीदृगभूदिति
पृष्टःसंजयउवाचैतच्छ्रुत्वेति केशवस्यैतदीदृशंवचनंश्रुत्वा
वेपमानोजातकंपः किरीटी एतत्किरीटोप्यर्जुनस्ततःकृतां
जलिःसन्कृष्णंभगवंतंभूयएवनमस्कृत्वापोनःपुण्येनका
यवाङ्मनोभिःप्रणम्येतिप्रणामपूर्वंसगद्गदंयथास्यात्तथाभंगभया
त्सगद्गदमित्युक्तमिति सगद्गदंवचनंवक्ष्यमाणरीत्याप्रोवाचे
स्यानेइति ३५॥

मधुभाष्य

प्रशिषोमाधंतर्यामितया जगद्धर्षणादेहृषीकेशः कृष्णं
त्वंस्तुनांतन्निर्यत्वादेःप्रमाणांतरप्राप्तिस्तूयेनेचमित्यर्थोकं ३५

भाषा अनुवाद

तिस के पाछे जो भया सो संजय धृतराष्ट्र से कहते हैं कि ये श्रीकृष्ण के वचन श्रवण करि कम्पमान कलेवर किरीटी अर्जुन हर्ष औ भयके मारे गदगद कण्ठ अति डरे ऐसे हथ जोडि कृष्ण को प्रणाम करके आगे कहेंगे जो सो बातें करते भये ३५

चौपई

ऐसे वचन सुन हरिके सोई कंपत तन जोड कर दोई करि
नमस्कार कहे पुन कृष्णहि गदगद वाक त्रास कोहि नमहि
३५॥

अर्जुन उवाच स्थाने हृषीकेश तव प्रकीर्त्या
जगत्प्रहृष्यत्यनुरज्यते च रक्षांसि भीतानि
दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसंघाः ३६

शाङ्करभाष्यटीका १

स्थान इति स्थाने युक्तं किं तव प्रकीर्त्या त्वन्माहात्म्यकीर्तनेन
श्रुतेन हृषीकेश यज्जगत् प्रहृष्यति प्रहर्षमुपैति तत् स्थाने यु
क्तमित्यर्थः अथवा विषयविशेषणं स्थान इति युक्तो हर्षादिविष
यो भगवान् यत ईश्वरः सर्वात्मा सर्वभूतसुहृच्चेति तथा अनुरज्य
ते अनुरागञ्चोपैति तच्च विषय इति व्याख्येयं किञ्च रक्षांसि भीतानि
भयाविष्टानि दिशो द्रवन्ति गच्छन्ति तच्च स्थाने विषये सर्वे नमस्य
न्ति नमस्कुर्वन्ति च सिद्धसंघाः सिद्धानां समुदायाः कपिलादीनां
तच्च स्थाने ३६

आनन्दगिरिकृतटीका २

किं तदर्जुनो भगवन्तं प्रति सगद्गदं वचनमुक्तवानिति तदाह स्था
ने इति विषयविशेषणत्वमेव व्यनक्ति युक्त इति भगवतो हर्षादि
विषयत्वे युक्तमित्यत्र हेतुमाह यत इति तव प्रकीर्त्या हर्षवदनु
रागञ्च गच्छति जगदित्याह तथेति तच्चानुरागगमनं रक्षःसु
जगदेकदेशभूतेषु प्रतिपत्तेषु कुतो जगतो भगवति हर्षानुरागा
वित्याशंक्याह किञ्चेति इतश्च जगतो भगवति हर्षादि युक्तमि
त्याह सर्व इति ३६

स्वामिकृतटीका ३

स्थान इत्येकादशभिरर्जुनस्योक्तिः स्थाने इत्यव्ययं युक्तमित्यस्मिन्न
र्थे हे हृषीकेश यद्देवमद्भुतप्रभावो भक्तवत्सलश्च तस्य तव प्रकी
र्त्या माहात्म्यसंकीर्तनेन केवलमहमेव न प्रहृष्यामि किन्तु जगत्स
र्वं प्रहृष्यति प्रकर्षेण हर्षं प्राप्नोति यत्तत् युक्तं स्थाने इत्यर्थः तथा
जगदनुरज्यते अनुरागञ्चोपैतीति यद्रक्षांसि भीतानि सन्ति दिशः प्रद्र
वन्ति पलायन्त इति यत् सर्वे योगतपोमन्त्रादिसिद्धानां संघा नमस्यन्ति
प्रणमन्तीति यत् तत् स्थाने युक्तमेव न विचित्रमित्यर्थः ३६

पिशाचभाष्यटीका ४

स्थाने युक्तं प्रकीर्त्या प्रकर्षेण कीर्तनेनेत्यर्थः ३६

१ श्री॰
गी॰ टी॰
५

रामानुजभाष्यटीका ५

स्थाने इति स्थाने युक्तं तदेतत् युद्धदिदृक्षया गतमशेषदेवगन्धर्वय
क्षसिद्धविद्याधरकिंनरकिंपुरुषादिकं जगत् भवतः प्रसादाद्भवन्तं सर्वे
श्वरमवलोक्य तव प्रकीर्त्या सर्वं प्रहृष्यति अनुरज्यते च यच्च भवन्तमव
लोक्य रक्षांसि भीतानि सर्वा दिशः प्रद्रवन्ति सर्वे सिद्धसंघा नमस्यं
ति च तदेतत् सर्वं युक्तमिति पूर्वेणैवान्वयः

अभिनवगुप्तकृतटीका ६

प्रकीर्त्या प्रकीर्तनेन ३६

परमार्थप्रपाटीटीका ७

स्थाने इति तवाद्भुतसामर्थ्यभक्तवात्सल्यरूपया कीर्त्या विदग्धं पर्यन्त
गतं हृष्यति संतुष्टं भवति तद्धि स्थाने न युक्तं रज्यते चानुरागं प्राप्नोती
ति स्थाने युक्तमेव प्रतद्भयं अवलोक्य सर्वे सिद्धसंघाः कपिलादय
स्तान नमस्यन्तीति स्थाने युक्तमेव ३६

वनमालीटीका ८

स्थाने इत्यस्याव्ययं युक्तमित्यर्थे हे हृषीकेश सर्वेंद्रियप्रवर्तक तवांतर्यामि
न यत्त्वमेवाद्भुतप्रभावो भक्तवत्सलस्तत् तव प्रकीर्त्या प्रकृष्ट
या कीर्त्या निरतिशयप्र[illegible]ह्लादयशःकीर्तनेन श्रवणेन च न
केवलमहमेव प्रहृष्यामि किंतु सर्वमेव जगत् चेतनमात्रं रतो विशे
षं प्रहृष्यति प्रकृष्टं हर्षमाप्नोतीति यत् तत् स्थाने [illegible] युक्तमेव सर्वथा तथा
सर्वं जगदनुरज्यते च तद्विषयमनुरागमुपैतीति च यत्तदपि युक्त
मेव तथा रक्षांसि भीतानि सर्वा दिशो द्रवन्ति सर्वासु दिक्षु पलायन्त
इति यत्तदपि युक्तमेव तथा सर्वे सिद्धानां संघा नमस्यन्ति यत्तदपि यु
क्तमेव सर्वं तत्तव प्रकीर्त्या प्रस्यात्वयः स्थाने इत्यस्य च अव्ययं ओंकार
वोद्गमेत्र शास्त्रप्रसिद्धः ३६

जसमवैजयन्तीटीका ९

यं नेन येन हृष्यार्थे भगवतो यदति रमन्तमस्य एवं तद्धेतुतं भया
नुरूपं पार्थः स्तौति स्थाने इत्यादि [illegible] किरीटिनमिमं तेरेकादशभिः
स्थाने हृषीकेशेति स्थाने इत्यव्ययं युक्तार्थकं हे हृषीकेश वाह्यान्त
ःकरणनियन्तः इत्यनेन त्वं स्वकीयमतिरमरूपं प्रदर्शय भक्तेभ्यो हि

याणि स्वसम्मुखानि करोषि अभक्तेंद्रियाणि च निजानि दोषैः रूपप्र
दर्शनस्व विमुखानि करोषीति सूचितम् तव विश्वरूपस्य प्रकीर्त्या
प्रकृष्टया कीर्त्या जगत् शिष्टाशिष्टात्मकं चेतनमात्रं सर्वं प्रहृष्य
ति प्रकर्षेणानंदं प्राप्नोति चशब्दात् अनुरज्यते च हर्षयानुरागं प्राप्नो
ति इति स्थाने युक्तमेव अयम्भावः विश्वविग्रहस्य भगवतः कति
चिदङ्गान्यतिसौम्यानि कतिचिदतिक्रूराणि संति अस्मिन् जगत्यपि
केचित्शिष्टाः केचिदशिष्टाः जनाः संति तत्र ये शुद्धहृदि दलयागताः
नारदादयः शिष्टजनास्ते तव सौम्यं कारुण्यवात्सल्यसौंदर्यादिक
ल्याणगुणाश्रयं तव रूपमवलोक्य तमहर्णं प्रीतिं कुर्वंति ये त्वशि
ष्टा जनास्ते तवासाधुधर्ममतिक्रमनीयं जगन्मोहनं रूपं दृष्ट्वा तव
नदास्यधर्मसौन्दर्यादिकीर्तनेन श्रवणेन च मोहिताः संतः प्रहृ
ष्यंति त्वद्विषयिणीं प्रीतिं च कुर्वंति तव अतिभयानकं क्रूररूपं वर्ति
नीसकालरूपोऽयं सर्वं जगन्नाशयतीत्येवंरूपया कीर्त्या श्रवणे
न च प्रहृष्यंति अशिष्टानां सर्वानिष्टचिंतनस्वभावत्वात् स्वमरण
भयात्त्वल्लणयव तद्विषयिणीं प्रीतिं कुर्वंति रतिरक्षांसि जगत्सु
मध्ये यानि राक्षसोपलक्षितानि भूतप्रेतपिशाचकूष्माण्डभैरववेता
लादीनि स्वाभाविकात्मस्वरूपगुणक्रूराणि तदारुणापरहिंसादि
कर्माणि तानि तव प्रकीर्त्या शिष्टजनैः कृतेन गीतनाम्ना श्रीनृसिंहदर्श
नमंत्रकवचादिकीर्तनेन श्रवणेन च भीतानि [illegible] त्वस्मादप्यति
भयंकररूपदर्शनात् अतिभयभीतानि संति दिशः सर्वासु द्रवं २ते
ति स्वस्वप्राणरक्षणाय पलायंते इति यत्तदपि स्थाने युक्तमेव च पुनः
सर्वे सिद्धसंघाः ये सिद्धा नाम भगवत्स्वरूपगुणयाथार्थ्यविदः कपिल
कुमारनारदादीनां संघाः समूहास्ते तव प्रकीर्त्या अग्रे स्वस्वस्थेन
वोज्ञानयातव तन्मयकर्मगुणादिकीर्तनेन नमस्यः नमस्यंति तव सौम्या
सौम्यरूपं दृष्ट्वापि हर्षविषादरहितास्तस्मान्नमनमेव कुर्वंति भगवा
न् यथा यद्यत्करोति तत्कर्माणि यत्करोतीति ततस्तत्सर्वमस्माकं सर्वेषां मं
गलायैवेति कृत्वा तव सौम्यासौम्यरूपं दृष्ट्वापि हर्षविषादरहितास्ते
त्वां नमस्कुर्वंति न तु प्रहृष्यंत्यनुरज्यंते वेति यत्तदपि युक्तमेव
त्यर्थः ३६

स्थाने इत्यव्ययं युक्तमित्यर्थः हे हृषीकेश सर्वेंद्रियप्रवर्तक यत्त्व
मेवमेतादृगद्भुतप्रभावो भक्तवत्सलः ततस्तव प्रकीर्त्या प्रकृष्टया की
र्त्या निरतिशयर्यशालस्य कीर्तनेन श्रवणेन च न केवलमहमेव प्रहृ
ष्यामि किं तु सर्वमेव जगत्तेन न माभेरतो विशेषि प्रहृष्यति प्रकृष्टं
हर्षमाप्नोतीति यत्तत्स्थाने युक्तमेवेत्यर्थः तथा सर्वं जगदनुर
ज्यते च त्वद्विषयमनुरागमुपैतीति च यत्तदपि युक्तमेव तथा रक्षां
सि भीतानि सन्ति दिशो द्रवंति सर्वासु दिक्षु पलायंत इति यत्तदपि युक्त
मेव तथा सर्वे सिद्धानां कपिलादीनां संघाः समूहा नमस्यंति चेति यत्त
दपि युक्तमेव सर्वत्र तव प्रकीर्तिरस्मात्त्वयः स्थाने इत्यस्य च व्ययसो
कौत्रमेत्र बेन मंत्रशास्त्रे प्रसिद्धः ॥ [illegible] ॥
३६॥ ॥

१ सव नारायणाष्टाक्षर सुदर्शन मंत्राभ्यां संयुतोत्तेय इति रहस्यं

१ भयाविष्टानि

२ रक्षो

सदानंदी टीका ॥

सर्वेंद्रियगणाधीशाव समेतादृक् तेश्वरः कीर्तनेन तवास्मन्माशत्य
श्रवणेन च १ नाहमेव प्रहृष्यामि केवलं किं तु सर्वतः जगच्च तेन माभ्रे
सि इष्टरतो विशेषियत् २ प्रकृष्टं हर्षमाप्नोतीत्येव युक्तमेव तत्त
त्वद्विषये जगत्सर्वमनुरागमुपैतियत् ३ युक्तं तदपि तद्वत् भयाविष्टा
नि संतियत् सर्वासु दिक्षु रक्षांसि पलायंते निसोऽप्रते ४ सिद्धानां क
पिलादीनां समूहास्तोजगद्गुरुं नमस्यंतीतियत्तव युक्तमेव जगद्गु
रो ५ प्रकीर्तितस्य सर्वत्र तवेत्यस्य तथान्वयः स्थाने इति पदस्याथो
विषयेत्व द्विशेषणे ६ समर्वात्मा महत्स्वामी हर्षादि विषयाहरिः ३६

१ हृ

नीलकंठी टीका ॥ २

एकादशभिः श्लोकैरर्जुन उवाच स्थाने इति हे हृषीकेश सर्वेंद्रिय
प्रवर्तक श्रुतयोमिन् तव प्रकीर्त्या नाम संकीर्तनेन जगत्प्रहृष्य
तियत्तत्स्थाने युक्तं स्थाने इत्यव्ययं युक्तमित्यर्थः यत्तव प्रकीर्त्या ज
गदनुरज्यते तदपि स्थाने युक्तं यत्तव प्रकीर्त्या रक्षांसि भीतानि स
न्ति दिशो द्रवंति पलायंते तदपि स्थाने युक्तं यच्च तव सर्वे सिद्धसंघाः
कपिलादीनां समुदायाः नमस्यंति तदपि स्थाने श्रयं श्लोकोरक्षोघ्न
मंत्रत्वेन मंत्रशास्त्रे प्रसिद्धः सच नारायणाष्टाक्षर सुदर्शनाख्यमंत्रा
भ्यां संपुटितो जेय इति रहस्यं ३६

ग्यानेश्रीटीका

स्थाने इति विभक्तिप्रतिरूपकमव्ययं युक्तमित्यर्थे एतत्सर्वं तव प्रकीर्त्या
भगवन्नामकीर्तनमात्रेण जगत्प्रहृष्यतीत्यादिकं स्थाने युक्तमेवेत्यर्थः ३६

कस्मदर्ज्जुनः किंप्राहेत्याह ॥ रामकंठीटीका

इत्थं सर्वश्लोकैः सर्वैश्वर्यस्य तव प्रकीर्त्या प्रशंसया सर्वं जगत्प्रहर्षं भजते
तथैव च तव्यनुरक्तं भवति तदा तत्कस्यापकानि रक्षांसि यानि तथा नानि
भयायतन्सन्तः पलायंते सिद्धसंघादेवविशेषसमूहाः समस्ताः प्रण
मंति च तत्सर्वं स्थाने युक्तं [illegible]

लासिकी [illegible]टीका

हे हृषीकेश इंद्रियस्वामिन् आत्मरूपनयेंद्रियप्रवृत्तेः प्रवृत्तिनिवृत्त्यौर्य
ऋः योहं विनियोगे तव प्रकीर्त्या माहात्म्यसंकीर्तनेन न केवलमहमेव प्र
हृष्यामि यावत्सर्वं जगत्प्रहृष्यति प्रकर्षेणाह्लादं प्राप्नोतीति यत्
एतत्स्थाने युक्तं भवति नैतद्विचित्रमित्यर्थः तथा सर्वं जगदनुरज्यते
त्वय्यनुरक्तं भवतीति यत् रक्षांसि भीतानि संति दिशो यतस्ततः पला
यंते इति यत् तथा सर्वे सिद्धानां ज्ञानात्मकर्षिप्राप्तानां समूहाः प्रणामंती
तियत् एतत्सर्वं युक्तमेव सर्वत्रवाक्ये तव प्रकीर्त्या स्थाने इत्यस्य चा
न्वयः अयं श्लोको रक्षोघ्नमंत्रेषु मंत्रशास्त्रे प्रसिद्धः [illegible] ३६

पंचोलीटीका

यदाहार्जुनस्तद्दर्शयति स्थान इति हे हृषीकेश तव प्रकीर्त्या तव
माहात्म्यकीर्तनेन जगत्प्रहृष्यति हर्षमुपैति च पुनरनुरज्यते अ
नुरागमुपैति च पुनः रक्षांसि भीतानि दिशो द्रवंति सर्वे सिद्धसंघाः
कपिलादीनां समूहाः नमस्यंति तत्स्थाने युक्तं ३६

रमावीरसमिद्धोधिनी॥

हृषीकेशेति भगवत्संबोधनं सर्वजगदंतर्यामित्वसूचनार्थं सक
लजगत्तव प्रकीर्त्या त्वन्नाम संकीर्त्या प्रहृष्यति प्रकर्षेण हर्षं या
ति अनुरज्यते त्वय्यनुरक्तं च भवति तथा त्वन्नामकीर्तनमहा
त्म्यादेव भवद्भक्तेभ्यो भीता निरस्तां सिद्दिशो द्रवंतीतस्ततः प
लायंते तथा च सर्वे सिद्धसंघाश्चापि नमस्यंति भवद्भक्तानि
ति शेषः इत्येतत्सर्वं त्वन्नामकीर्तनमाहात्म्यादेव स्थाने युक्तं
भवतीति ॥३६॥

मधुभाष्य

हृषीकाणामिंद्रियाणामीशत्वाच्च तेषां विशेषतः ईशत्वं च यः प्रा
र्गति श्रुतेर्नित्यादेः सिद्धं न मे हृषीकाणि पतंत्यसत्पथे इत्यादि
प्रयोगाच्च अतएवोयं मोक्षधर्मे सिद्धः सूर्याचंद्रमसोः शश्वत्केशै
र्मेंशुसंज्ञितैः बोधयंस्तापयंश्चैव जगदुत्पद्यते पृथक् बोध
नात्तापनाच्चैव जगतो हर्षसंभवात् अग्नीषोमकृतैरेभिः क
र्मभिः पांडुनंदन हृषीकेशोहमीशानो वरदो लोकभावन इति
कथं स्थाने इति तत्राह कस्मादित्यादिना इत्यश्चासावात्मा
चेति महात्मा आत्मशब्दस्योक्तो भावतः यच्चाप्नोति यदादत्ते यः
चाति विषयानिह यच्चास्य संततो भावस्तस्मादात्मेति भण्यते
इति ३६॥

भाषा अनुवाद

अब इस श्लोक मे अर्जुन कहते हैं कि हे हृषीकेश जिस हेतु तुम ऐसे अद्भुत प्रभाव से युक्त औ भक्त वत्सल हो इससे तुम्हारा माहात्म्य संकीर्तन करने मे केवल हमीने जो हर्ष पाया सो नहीं किन्तु ब्रह्माण्डभर अति हर्षित औ प्रीति युक्त है यह उचित है और इस ब्रह्माण्डमे जो सब सज्जन प्रसन्न औ राक्षस सकल डरके मारे दश दिशामे भागे फिरते हैं और योग तप मन्त्र आदि के द्वारा सिद्ध गण तुम को प्रणाम करते हैं यह कुछ आश्चर्य नहीं है ३६

चौपई

हृषीकेश तव नाम कहियोगा हर्षित जगत अनुराग हि लोगा
राक्षसभीत दशोदिशानाशों नमहि सिद्धगण यथाहिमकाशों
३६॥

कस्माच्च ते न नमेरन्महात्मन् गरीयसे ब्रह्म
णोऽप्यादिकर्त्रे अनन्त देवेश जगन्निवा
स त्वमक्षरं सदसत्तत्परं यत् ३७

शांकरभाष्यटीका १

भगवतो हर्षादिविषयत्वे हेतुं दर्शयति कस्माच्चेति कस्मा
च्चेति कस्माच्च हेतोस्ते तुभ्यं न नमेरन् न नमस्कुर्युः हे महा
त्मन् गरीयसे गुरुतराय यतो ब्रह्मणो हिरण्यगर्भस्याप्यादिक
र्ता कारणमतस्तस्मा आदिकर्त्रे कथमेव ते न नमस्कुर्युः अतो
हर्षादीनां नमस्कारस्य च स्थाने त्वमर्हो विषय इत्यर्थः हे अन
न्त हे देवेश हे जगन्निवास त्वमक्षरं तत्परं यद्वेदान्तेषु श्रूयते
किं तत् सदसत् सत् विद्यमानं तत् सत् असच्च यत्र नास्ती
ति बुद्धिस्ते उपधानभूते सदसती यस्याक्षरस्य यद्द्वारेण सद
सदित्युपचर्यते परमार्थतस्तु सदसतः परं तत् यदक्षरं वेद
विदो वदन्ति तत्त्वमेव नान्यदित्यभिप्रायः ३७

आनन्दगिरिकृतटीका २

उक्तेऽर्थे हेत्वन्तरत्वेनोत्तरश्लोकमवतारयति भगवत इति महा
त्मत्वमत्तु इत्येतस्य गुरुतरत्वान्नमस्कारादियोग्यत्वमाह गुरु
तरायेति तत्रैव हेत्वन्तरमाह यत इति महात्मत्वादिहेतूनामुक्ता
नां फलमाह अत इति तत्रैव हेत्वन्तराणि सूचयति हे अनन्तेति
अनवच्छिन्नत्वं सर्वदेवनियन्तृत्वं सर्वजगदाश्रयत्वञ्च तव न
मस्कारादियोग्यत्वे कारणमित्यर्थः तत्रैव हेत्वन्तरमाह त्वमिति
तत्र मानमाह यदिति कथमेकस्यैव सदसद्रूपत्वं तत्राह ते
इति कथं सतोऽसतश्चान्तरं प्रसाधितं तदाह यद्द्वारेणेति॥
तत् परं यदित्येतमाचष्टे परमार्थतस्त्विति अनन्तत्वादिना भ
गवतो नमस्कारादियोग्यत्वमुक्तं ३७

स्वामिकृतटीका ३

नतिहेतुमाह हे महात्मन् हे अनन्त देवेश जगन्निवास कस्माद्धेतो

त्मने तुभ्यं न नमेरन् न नमस्कारं कुर्युः कथंभूताय ब्रह्मणोऽपि गरीय
से गुरुतराय आदिकर्त्रे ब्रह्मणोऽपि जनकाय किंच सत् व्यक्तं असद
व्यक्तं च ताभ्यां परं मूलकारणं यदक्षरं ब्रह्म तच्च त्वमेवेति तेन व भि
हितं भिन्ना सर्वे नमंतीति निश्चितमित्यर्थः ॥ ३७ ॥

पैशाचभाष्यटीका॰ ४

कस्माच्चेति न नमेरन्न नमस्युः अक्षरं ब्रह्म सद्वा सत् असद्वा सदसदात्मक
मित्यर्थः ताभ्यां सदसद्भ्यां परं तत्परं यत् ॥ ३७ ॥

युक्ततामेवोपपादयति ॥

रामानुजभाष्यटीका ५

कस्मादिति महात्मने तुभ्यं गरीयसे ब्रह्मणो हिरण्यगर्भस्यापि
आदिभूताय कर्त्रे हिरण्यगर्भादयः कस्माद्धेतोर्न नमस्कुर्युः अनंत
देवेश जगन्निवास त्वमेवानंतो निरतिशयजीवात्मतत्त्वं न जायते
म्रियते वा विपश्चिदित्यादिश्रुतिसिद्धो हि जीवात्मा हि निरतिशयतत्त्वं जी
वात्मतत्त्वं सदसत्त्वमेव सच्छब्दनिर्दिष्टं कार्यकारणभावेनावस्थि
तं प्रकृतितत्त्वं नामरूपविभागवत्तया कार्यावस्थं सच्छब्दनिर्दिष्टं
तदनर्हतया कारणावस्थमसच्छब्दनिर्दिष्टं तत्तत्परं यत् तस्मात्
प्रकृतेः प्रकृतिसंबंधिनश्च जीवात्मनः परमं मुक्तात्मतत्त्वं यत्
तदपि त्वमेव [illegible] ॥ ३७ ॥

अभिनवगुप्तकृतटीका॰ ६

सदसदर्थत्वेन अप्रसक्तोपलंभप्रमाविषयत्वात् अथवा प्रमावोऽपि
थिपि निजनिजविशिष्टवाचकसंश्लिष्टज्ञानाकारमनुभवतोऽनुप
रतब्रह्मसगाद्यतिरिक्तः सदसद्रूपाभ्यां च परं तदुभयत्रुटितिरोधाने
तद्रूपोपलब्धेः ॥ ३७ ॥

परमार्थप्रपाटीका॰ ७

तत्र हेतुमाह कस्मादिति भो महात्मन् महाशब्दव्यपदेश्य भो अ
नंतदेवेश जगन्निवास ते सिद्धाः कपिलादयस्ते तुभ्यं वा कस्माद्धेतो
र्नमेरन् नमस्कारं न कुर्युः किंभूताय तुभ्यं ब्रह्मणो जगत्स्रष्टुरपि
गरीयसे श्रेष्ठतमाय आदिकर्त्रे च किं पुनरन्यस्य यस्मात्कारणात्
त्वमक्षरं परं ब्रह्म सत् व्यक्तं असत् अव्यक्तं ताभ्यां परं मूलकारणं ॥ ३७ ॥

वनमालीटीका॰ ८

हर्षादिविषयत्वे हेतुमाह कस्मादिति कस्माच्च हेतोस्ते त्वां न नमे
रन्नमस्कुर्युः सिद्धसंघाः सर्वेपि हे महात्मन् अनंतगुणपरिपूर्ण हे
अनंत देशकालापरिच्छिन्न हे देवेश ब्रह्मरुद्रादीनां देवानां नियंतः
हे जगन्निवास सर्वाश्रय त्वं भो कीदृशाय ब्रह्मणोपि गरीयसे प्रकृत
दाय आदिकर्त्रे ब्रह्मणो जनकाय त्वमक्षरं स्वरूपतोऽपि नश्यामत्रिना
शादि सूक्ष्मं सदसत् भावाभावात्मकं कार्यकारणात्मकं वा मूर्त्तामूर्त्ता
त्मकं वा तद्व्यापकत्वात्तदात्मकत्वमित्यर्थः तत्परं ताभ्यां कारणादिभ्यो
परं मूलकारणं यदक्षरं ब्रह्म तदपि त्वमेव यतो हेतं भिन्नो वसुदेव
सुतं सर्वे नमंतीति न किमपि चित्रमित्यर्थः ३७

ज्ञस्तमवेतयत्नीटीका ५

सिद्धसंघानां भगवन्नमने हेतुमाह चतुर्भिः कस्माच्चेति हे महात्मन्
हान्नपि कस्मात् प्रभुः आत्मा विग्रहो यस्य स सततत्वबोधायने यद्वा महा
नमद्दारधामाविनेयस्य सततत्वात् सम्बोधने हे बृहत्काय हे उदारम
तेवमर्थः हेऽनंत देशकालवस्तुपरिच्छेदशून्य सकलरूप सर्वव्या
पित्वमित्यर्थः हे देवेश देवानां ब्रह्मादीनामीशं नियंतः हे जगन्निवा
स चेतनाचेतनात्मकस्य जगतो निवास आश्रय त्वं पूर्वोक्तकाले
सर्वे सिद्धसंघाः कस्माद्धेतोर्न नमेरन् आत्मनेपदमार्षं अपि तु प्र
णमेयुरेव ते कीदृशायेत्याह ब्रह्मणो हिरण्यगर्भस्यापि च कारा
णशिवस्याप्यादिकर्त्रे पित्रे नारायणाद्ब्रह्मा जायते नारायणाद्रुद्रो जा
यते ललाटाक्षः शूलपाणिरजायतेत्यादिश्रुतिभ्यः कर्त्रे यतोने
व भगवतस्तस्मिन्स्त्वमसि हेत्यादी मतेन परमेश्वरत्वं तावत्स्थि
ममये स्वतेणनाधरायाः स्वप्रकृतेर्हीनान् गुणान् मायातत्र स्वयमेव
क्वयैवमसत्वस्वीकारमात्रमेव कृतेन गांभीर्यजलसौम्यास्यदलेन
त्त विशेषयोर्विधिशिवयोः स योगत्वं तत्तद्गुणाभिमानत्वं तनद
पीन स्थितिग्रहत्तिकं च कारयितास्व सत्तया तन्नद्गुणानुसारेणाच
तयोः स्वाधिष्ठितस्य स्वायत्तस्थितिग्रहत्तिकस्य स्वलीलारूपस्य जग
तः किंचित्सृष्टिसंहारसामर्थ्यं दत्तं तेन तदधिकारेऽस्थापयदिति
योनितम् यद्वा ब्रह्मणो वेदस्याप्यादिकर्त्रे जनकाय यस्य निःश्व
सितमेतदृग्वेदो यजुर्वेदः सामवेद इत्यादिश्रुतेः इत्यनेन ब्रह्मा

दीनांसर्वेषांसत्वानांहितकोपोवेदस्यापिजनकत्वेनभगवतःसर्व
स्थितिप्रवृत्तिहेतुत्वापिस्त्वेसर्वधर्मकर्मकारयितृत्वंसूचितम् अतएव
गरीयसेब्रह्मणोपिकर्तराय अपिशब्देनभगवतःसृष्टिसंहारस्थितिलोक
हेतुत्वविधिविधायकवेदानांजनकत्वेनतन्महत्त्वेनचसर्वोत्कृष्टत्वंसूचित
म् योब्रह्माणंविदधातिपूर्वंयोवावेदांश्चप्रहिणोतितस्मा इत्यादिश्रुतेः
अनन्तादिकर्तॄसमभूतानांब्रह्मणोग्रसमवर्ततेत्यादि वाक्याद्ब्रह्मणोभूतादि
कर्तृत्वंश्रूयतेवर्त्तितंचश्रूयतेवसुदेवपुत्रस्यतत्समवयस्कस्यममब्र
ह्मजनकत्वेनमहत्वंचकथंवदसीत्याशंक्याभोक्तृभोग्यप्रपञ्चरूप
त्वमेवासीत्याह त्वमक्षरंसदसत्तत्परंयदिति अक्षरंजीवात्मवस्तुत
मेवयद्वासुदेवादिभेदवाहकत्वेजीवत्वेनतदन्तर्गतत्वतयास्थितत्वमे
वासीत्यर्थः यद्वासदसन्नामरूपविभागवत्तयाकार्यावस्थंसच्छब्द
निर्दिष्टंतदनर्हतयाकारणावस्थंवासच्छब्दनिर्दिष्टंतच्छब्दवाच्यप्र
कृतितदपित्वमेवयद्वापरंतत्ताभ्यांशब्दवाच्यमव्याकृतंप्राप्यावेतनाचे
तनप्रकृतिभ्यांपरमुत्कृष्टंतन्निखिलकारणंतन्नियंतृरूपंपरमात्म
तत्वंतदपित्वमेवत्वाविमोहकरूपोलोकेलरश्यादर [illegible] एवत्वंतः
सर्वाणिभूतानिकूटस्थोऽक्षरउच्यते उत्तमःपुरुषस्त्वन्यःपरमात्मे
त्युदाहृतः इतिवक्ष्यमाणात् एवंतेषांत्वमेवमहात्म्यवादयोरनेके
हेतवःसमतस्यैकस्याप्यनेनमेवमवैनमपिनमेदेवानेकहेतुकात्मनुवा
लंकारः ३७

भगवतोहर्षादिविषयत्वेहेतुमाह ॥

मधुसूदनीटीका॥

कस्माच्चहेतोस्तेत्वांननमेरन्नमस्कुर्युःसिद्धसंघाः सर्वेपिहेमहात्म
न्परमोदारचित्तहेअनंतसर्वपरिच्छेदशून्यदेवेशहिरण्यगर्भादी
नामपिदेवानांनियंतः हेजगन्निवाससर्वाश्रयत्वंअक्षरंयत्तद्ब्रह्म
णोपिगरीयसेगुरुतरायआदिकर्त्रेब्रह्मणोपिजनकाय नियंत्रेचा
गुपदेष्टृत्वेजनकत्वमित्यादिहेतुकोपिहतेनमस्कार्यता प्रयोजकः
किंपुनर्महात्मत्वानंतत्वजगन्निवासत्वादिनानाकल्याणगुणविशिष्ट
त्वमित्यर्थःसर्वनमस्कारस्यकस्माद्धेतोरिवाशंक्यार्थः चका
रःकिंचसद्विदिमुखत्वेनप्रतीयमानमस्तीति असत्निषेधमुखेन
प्रतीयमानंनास्तीति अथवासदव्यक्तंअसत्अव्यक्तंत्वमेवतयोरनम

सत्वं

येताभ्यांसदसद्भ्यांपरंमूलकारणंयदक्षरंब्रह्मतदपित्वमेवतद्धि
त्रेकिमपिनास्तीत्यर्थः तस्मात्ययदिमंत्रयत्नाहात्माकृचकारमपि
केचित्सदंति एतैर्हेतुभिस्त्वांसर्वेनमंतीतिनकिमपिचित्रमित्यर्थः
[illegible] ३७ सं

सदानंदीटीका ॥

हर्षादिविषयत्वेपिहेतुमाहजगन्नाथैः कस्माद्धेतोर्नतेतुभ्यंनमस्कु
र्युःत्वयेरिताः १ सर्वेपिहेमहात्मन्त्वंपरमोदारविद्वन्ः अपरिच्छिन्न
देवेशानियंतानेविधेरपि २ हेसमस्ताश्रयेशानतुभ्यंकीदृग्विधा
यच ब्रह्मणोपिनियंत्रेतस्मैत्रैतदेशिकायच ३ किंचप्रतीयमाने
यत्तत्सद्धियिभुवेनवैनास्तीतिमानविषयमसत्तेषद्वियंततःव्य
ताव्यक्तेचवासर्वंसदसद्भ्यांपरंतथा यदक्षरंपरब्रह्मतदपित्वंपरा
त्परत्वतोभिन्नेनवस्थूलेनसूक्ष्मेनापिकारणं त्वमात्मासर्वंवस्तुनो
त्वामेतैर्हेतुभिर्विभो सर्वेलोकानमंतीतिनचित्रंकिमपीश्वर ३७

नीलकंठीटीका ॥

कुतोमांप्रतिह्यसंधानमपेक्षतियतस्त्वंपरमिवब्रह्मांडंशानातिसूक्ष्म
र्हेतोमतआह कस्मादिति हेमहात्मन्कस्माद्धेतोस्तेतवाननमेरंत्र
पितृनमेरत्रैव तत्रहेतुः गरीयसेतेपिगुरवत्वमपिगुरुरूत्वा
पितृमतिशायितोगुरुरसीत्यर्थः कुतोममेवातिशायेत्वेषांममेव
समानेपिसमसंकल्पत्वादीसमतआह ब्रह्मणोहिरण्यगर्भस्यापि
आदिकर्त्रेपितामहाय पंचमहाभूतसृष्टिद्वाराब्रह्माणंसृजतेइत्य
र्थः जगद्व्यापारवर्जं प्रकरणादसंन्निहितत्वाच्चेतिमायेनतितस्मि
हेश्वरस्तत्वात्तयातेसर्वैश्वर्यभाजोभवंतिनततस्मात्ते अत
एवहेअनंतहेदेवानांईश जगन्निवासजगतामालयभूत त्वम
क्षरंश्रुतंब्रह्म कीदृशंअक्षरं यत्सदसत्तत्परं सद्व्यक्तसदस
त्तरंअव्यक्तंवा कीदृशंअक्षरं यत्सदसत्तत्परं सव्यक्तसव्यसदस
तीताभ्यांपरंचसदसत्तत्परं कार्यकारणतदुभयातीतंचेतित्रिविध
मित्यर्थः ३८

आनंदीटीका

सतःइंद्रियगोचरात असतःइंद्रियागोचरात्प्रधानात्परम् ३७

रामकंठीटीका

त्वदनुग्रहादेवसाक्षात्कृतंपरंतत्वस्वरूपंपरामृशन्नर्जुनस्त्वाह ॥

गी॰
टी॰ ए॰

अथवा कस्मात्ते तुभ्यं हेतोरेते सिद्धादयस्तुभ्यं न नमेयुः महात्मन्सर्वो
त्कृष्ट कीदृशाय ते ब्रह्मणोपि प्रजापतेरपि गरीयसे परमगुरवे यतस्त्वमा
दिकर्त्रे आद्याय स्रष्ट्रे तस्यापि जन्महेतवे हे अनंत अपरिछिन्न माहात्म्य
यतस्त्वमतः इंद्रियगोचरादिरंतावधारणीया इत्यस्तुनो यत्तदंतातिरिक्तं
तथा सत्स्वाभावरूपादपि यत्परमक्षरमविकारिं निहृत्तं परमार्थसत्त्व
त्वमतोवरैकैकस्वभावमनन्यवेद्यंपरमकारणं लोकं ध्यातेसिद्धादयोवि
दितवेद्याः संतो न नमेयुरिति तात्पर्यम् [illegible]

[illegible] ३७ ॥

लासिकी [illegible]टीका

तत्र हेतुमाह ॥ हे महात्मन् व्यापक अनंतापरिछिन्न हे देवेश हे जगन्निवास स्थावर
जंगमात्मकलोकाश्रय ते तुभ्यं मीस्वराय सर्वे सिद्धसंघाः कस्मात्केना
हेतोः न नमेरन्न नमेयुः अत्र हेतुगर्भविशेषणमाह ब्रह्मणोपि परब्र
ह्मसकाशादपि गरीयसे गुरुतराय यतः आदिकर्त्रे जगतः प्रथमनिर्मात्रे
ब्रह्मणोपि हि निष्क्रियत्वादीश्वरस्यैव प्राथम्येन निर्मातृत्वमतो ब्रह्मणः स
काशाद्गरीयस्त्वम् तथा त्वमेव अक्षरोसत्तं कूटस्थापरपर्यायमात्मरूपं
तथा सत् स्थूलमसत् सूक्ष्मरूपलं भावविषयं तत्परं तयोरपि कारणभूतं
यत्मायाख्यं तत्सर्वं त्वमेव अतएतेषामनंतमस्यापिदृष्टानां तेरानं
कर्तृत्वमनुपपन्नम् तवैवादिकर्तृत्वात् [illegible] ३७ ॥

पंचोलीटीका

भगवतो हर्षादिविषयत्वे हेतुं दर्शयति कस्माच्चेति हे महात्मन्
व पुनस्ते तुभ्यं गरीयसे गुरुतराय कस्माद्धेतोर्न नमेरन्न नमस्कुर्युः
यतो ब्रह्मणो हिरण्यगर्भस्यापि आदिकर्ता कारणमतः आदिकर्त्रे
कथमेव न नमस्कुर्युः अतो हर्षादीनां नमस्कारस्य च युक्तत्वमन्यो
विषय इत्यर्थः हे अनंत देवेश हे जगन्निवास यत् वेदांतेषु परं अक्षरं
श्रूयते तत्त्वमसि तत् विद्यमानं असत् अविद्यमानं कार्यकारणं तत्त्वं ३७

रत्नावीरसंमिद्धोधिनी ॥

अस्यं भगवद्रूपं परमस्थानं: सिद्धादयश्च हर्षादिहेतोः किंन
नमस्कुर्वंतीत्याह कस्माच्चेति हेमहात्मने ते सिद्धादयो गरीय
से गरिमाशक्तिमते तपब्रह्मणोपि स्रष्टिकर्त्रे इत्यादिकर्त्रे प
नाहग्निलक्षणस्वभावाय ते ह्यमुं कस्मान्न नमेरन् अतोन न
मस्कारं कुर्युः यद्भगवन्नामसंकीर्तनमेव हर्षादिकारणमि
त्यवधार्य तमेयं नमस्कुर्वंतीति संगतं परमक्षरमसि यत्परमत
ंसदसत्सदसद्भेदनमसहर्षं तदात्मकं निर्विकारं निरुत्तरं परमार्थ
नवैवेदांतेषु श्रूयते इति ३७ ॥

मधुभाष्य

नस्यं सदसतोः परम् अमसत्सद्वैव वचयहि सं सदसतः परमि
ति भारते एकत्वमेव कारयिता नान्योत्पथापि स्वकं रूपं त
थांतप्रतीत्या अन्यथा तदपि स्वकमेव प्रमाणानि तत्कालानि ड
रस्मात् ३७ ॥

भाषा अनुवाद

और सबके हर्ष औ प्रणाम करने मे अब हेत कहते हैं कि हे महात्मन् हे अनन्त हे जगन्निवास श्रीकृष्ण क्यों न ये सब प्रणाम करेंगे कि जो तुम ब्रह्माके भी आदि कर्ता करके जनक और गुरुहो और सत् कहे व्यक्त प्रगट जो जगत् औ असत् जो अव्यक्त प्रकृति माया इन दोनो से पर अर्थात मूल कारण रूप अक्षर कहे अविनाशी जो ब्रह्म सो भी तुम हो तौ नवधा भक्ति द्वारा जो सब तुमको प्रणाम करते हैं सो उचित हैं ३७

चौपई

हे महात्मा कि मतो दिन मे न सोई भू दिशादि आदि कर्ता ब्रह्म जोई ईश अनंत सभ जगत निवासा हे अखंड सद असत पर जो भासा ३७

त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य
परं निधानं वेत्तासि वेद्यं च परं च धाम त्व
या ततं विश्वमनन्तरूप ३८

शांकरभाष्यटीका १

पुनरपि स्तौति त्वमिति त्वमादिदेवो जगतः स्रष्टृत्वात् पुरुषः पु
रिशयनात् पुराणश्चिरन्तनस्त्वमेवास्य विश्वस्य परं प्रकृष्टं निधा
नं निधीयतेऽस्मिन् जगत् सर्वं महाप्रलयादाविति किंच वेत्ता
सि सर्वस्य वेद्यजातस्य यच्च वेद्यं वेदनार्हं तच्चासि परं च धाम प
रमं पदं वैष्णवं त्वया ततं व्याप्तं विश्वं समस्तं हे अनन्तरूप अन्तो
न विद्यते तव रूपाणां ३८

आनन्दगिरिकृतटीका २

सम्प्रति जगत् स्रष्टृत्वादिनापि नमोयोग्यत्वमस्तीति स्तुतिद्वारा द
र्शयति पुनरपीति जगतः स्रष्टा पुरुषो हिरण्यगर्भ इति पक्षे प्रमा
ह पुराण इति स्रष्टृत्वे निमित्तमेवेति तटस्थेश्वरवादिनस्तान् प्र
त्युक्तं त्वमेवेति महाप्रलयादाविव्याप्तादिपदमवान्तरप्रलयार्थं ईश्व
रस्योभयथा कारणत्वं सर्वज्ञत्वेन साधयति किंचेति वेद्यवेदितृ
भावेन अद्वैतानुपपत्तिमाशंक्याह यच्चेति मुमुक्ष्वालम्बनस्य ब्रह्म
णोऽर्थान्तरत्वं आशंक्योक्तं परं चेति यत्परमं पदं तदपि च त्वमे
वेति सम्बन्धः तस्य पूर्णत्वमाह त्वयेति व्याप्यव्यापकत्वभेदं
शंकित्वा कल्पितत्वात्तस्य मैवमित्याह अनन्तेति ३८

स्वामिकृतटीका ३

किंच त्वमिति त्वमादिदेवः देवानामादिभूतः पुराणोऽनादिपुरुष
स्त्वमतएव त्वमस्य विश्वस्य परं निधानं लयस्थानं तथा विश्वस्य वे
त्ता वेदिता ज्ञाता च त्वं यच्च वेद्यं वस्तुजातं तत्परं च धाम वैष्णवं पदं तद
पि त्वमेवासि अतएव हे अनन्तरूप त्वयैवेदं विश्वं ततं व्याप्तं यतोऽस्मा
ममभिर्हे त्वमित्त्वमेव नमस्कार्य इति भावः ३८

पिशाचभाष्यटीका ४

त्वमादिदेव इति तदपि सर्वं निधीयतेऽस्मिन्निति निधानं वेत्तासि वेदि

१

श्री॰
गी॰टी॰

तधामतेजः ततं व्याप्तं ३८

रामानुजभाष्यटीका ५

त्वमादिदेवस्त्वं
निधीयतेऽत्र विश्वमिति तत्समस्तपूर्वं निधानं विश्वस्य शरीरभूतस्या-
त्मतया परमाधारभूतस्त्वमेवेत्यर्थः जगति सर्वो वेदिता वेद्यं च
सर्वं त्वमेव एवं सर्वात्मतयावस्थितस्त्वमेव परं च धाम स्थानं प्राप्य-
स्थानमित्यर्थः त्वया ततं विश्वमनेन तत्त्वरूपवत्त्वयात्मत्वेन विश्वं विदर्पि
चिन्मिश्रं जगत् ततं व्याप्तं अतस्त्वमेव वाय्वादिशब्दवाच्य इत्याह ३८

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ३८

परमार्थप्रपा टीका ७

तदेवाह त्वमिति आदिभूतो देवः स्थूलसूक्ष्मप्रपञ्चकारणीभूतः
पुरुष आत्मा त्वमेव स एव पुराणः पुरुषो हिरण्यगर्भस्त्वमेव ततो वि-
श्वस्य चराचरस्य निधानं लयस्थानं विराट् त्वमेव ततो जीव-
रूपेण वेत्ता त्वमेवासि भोग्येन रूपेण समष्टिरूपं परं धाम निवा-
सस्थानं ब्रह्माण्डं त्वया ततं विस्तारितं तदपि त्वमेव एवमेक
एव त्वं निरूपितप्रकारैर्वर्तसे इत्यर्थः श्रुतिरपि यो नः पिता जनि-
ता यो विधाता धामानि वेद भुवनानि विश्वा यो देवानां नामधा एक
एव तं संप्रश्नं भुवना यन्तीति भाष्ययोऽस्माकं पिता बीजरूपः
स्वयंभूः जनिता निर्मापकः सूक्ष्मभूतरूपो हिरण्यगर्भः ततः
स्थूलभूतं विदधातीति विधाता विराट् ततो विश्वा विश्वानि सर्वाणि
धामानि शरीराणि भुवनानि भूर्भुवः स्वरादीनि जीवरूपेण यो वे-
द एवं ये देवानां उक्तस्वरूपाणां नामधा ब्रह्मादिनामप्रकारैरनेको
ऽप्येक एव तमेव विविधं भुवना भुवनानि चराचराणि संप्रश्नं यन्ति
कीदृशः परमेश्वर इति प्रश्नं कुर्वन्तीत्यर्थः अग्रेतनकाष्ठवेलोमेन श्रु-
तिरेव प्रश्नोत्तरं वदति एकपाद्भूयो द्विपदो विचक्रमे द्विपात्त्रिपा-
दमभ्येति पश्चात् चतुष्पादेति द्विपदामभिस्वरे संपश्यन्पङ्क्तीरु-
पतिष्ठमान इति एतद्भाष्यं जीवो ब्रह्मलेकपादमिमकमास्के-
पाज्जीवः भूयो भ्यासादिना द्विपदः विराट् प्रपञ्चपञ्चवक्रमं प्राप्नो-
ति पश्चादनन्तरं द्विपाद्विराजेश्वरत्रिपादे हिरण्यगर्भात्मा एवेति
त्रिपादूर्ध्व उदैदिति श्रुतेः तदपि चतुष्पात्मूर्धन्यबलेन इति पदं द्विपदो

अ॰४

मनुष्याणामभिस्वहृटीकाषोपकपदादिपंक्तीः सपुष्पपन्नस्यालिते
नपष्पपन्नपतिष्टमामीत्सिसपवपरमेष्वर इत्यर्थः ३८

वनमालीटीका ८

त्वमादिदेवो जगतः कारणत्वात् पुरुषः पूर्णः पूरयितांतर्यामी
वपुराणश्चिरंतनः त्वमस्य विश्वस्य परं निधानं विश्वस्यात्यंतिकस्थि
तिलयाधार इत्यर्थः अत्राइदत्यादिकर्तृत्वेन प्रधानात्सत्वजीववा
द्यर्थे सर्वज्ञ त्वमाह वेत्तासि वेदिता सर्वस्यासि वेद्यं च सर्वं वेदवे
द्यं च सर्वं कृत यत्त्वामेव बोधयंत्यर्थः वेदैश्च सर्वैरहमेव वेद्य इति
वक्ष्यमाणत्वात् सर्वज्ञत्वमुक्त्वाह सर्वस्याश्रितिवो ध्यानेन तद्गुणाश्रु
मुक्तजैयाश्रुकप्राप्यत्वमेवेत्यर्थः परं धाम प्रकाशरूपं वा त्वम
व इदं सर्वं जगत्त्वयाजैतशाक्तिनाधारत्वेनोपादकत्वेन पालक
त्वेन च ततं व्याप्तिं वहंभुक्तजीवजडानां पालकादि त्वमेवेत्यर्थः
अनंतरूप अनंतरूपं षपि देशकालगुणैरियत्ताहीनैकरूपम
नदेकमव्यक्तमनंतरूपमिति श्रुतेः ३८

ऊस्समवेजयन्तीटीका ९

भगवतः सर्वपरत्वं प्रतिपादयन्नस्तुइकात्मनः स्तौति त्वमादिदे
व इति आदिदेवो देवानां तत्त्वाधिष्ठातृणामादिः कारणमादि
देवस्त्वमसि जगतः सर्गहेतुत्वात् अत एव पुराणोऽनादिः पुरुषः
पूरयिता जगत्पालकश्च त्वमेवास्य विश्वस्य परं सर्वोत्कृष्टं निधा
नं निधीयते सर्वं यस्मिन्निति निधानं विश्वलयस्थानं च त्वमेव न
तु कालकर्मप्रधानपरमाणवादीनां जगत्सृष्ट्यादिकारणत्वं संभ
वति त्वमेव तत्कारणं कथं वदसीमाशंक्य तेषां जडत्वेन स्वाप
तोमाश्रयत्वाभावान्न कारणत्वं तत्वेवं तदाश्रयत्वेन तत्संभवतीत्याह
वेत्तासीति वेत्तासर्वेषां चेतनानां मवेतनानां च स्वरूपं वेदितेत्या
वेत्तासि तत्त्वमेव कारणमिति तेन कालादिषु जडवर्गेषु
नात्वमेवासि अतस्त्वमेव कारणमित्यनेन कालादिषु जडवर्गेषु
कर्तृत्वज्ञात्त्वभोक्तृत्वादिकं ये मन्यंते तेऽज्ञेनेन दूरतोपास्ता अभ
वन्निति सूचितम् वेद्यं शास्त्रैर्मुमुक्षुभिर्वा वेदनविषयं यद्वस्तु तद
पि त्वमेवासि यद्वा जगति यो वेत्ता वेदिता यच्च वेद्यं वस्तु तितद
भयं सर्वं त्वमेवासि ननु वेत्तृवेद्ययोरेकत्वेन हि वेदनरूपे वेदितारि
परमार्थसंबंधाभावेन सर्वस्य वेद्यस्य कल्पितत्वादद्वैतसिद्धिरिति

२ ॥

श्री॰
गी॰टी॰
प

चेतनग्राह्य त्वया ततं विश्वमिति हेतनेन रूपदेशकालाद्यपरिच्छिन्नरू
पत्वया व्यापकेन परमपुरुषेण व्याप्यरूपं चिदचिन्मिश्रं विश्वं ततं व्या
प्तं व्याप्यस्य व्यापकादपृथक्त्वसिद्धत्वरूपस्थितिप्रवृत्तिकत्वाद्व्याप्य
रूपेणाभिन्नमपीश्वरव्याप्यस्याः भिन्नमिति च लक्ष्यः भिन्नं जगदिति सिद्ध
नत्वहेतौ यथा घवट्टारदशायां व्याप्यस्य सद्रूपत्वेनैव व्यापकस्य व्या
पकता सिद्धिर्नोमद्वस्त्वेन तथा परमार्थदशायामपि वेद्यस्य सन्ने
नैव वेदितृत्वं वेदितृत्वसिद्धिर्न तु कल्पितत्वेन न च परमार्थदशायां वे
द्यवेद्ययोः सम्बन्धाभाव इति वाच्यं तत्रापि तयोः संबंधः । त्वमेव हि यस्य
वेत्ता सर्वविदित्यादौ वेद्यरूपस्य सर्वस्य वेद्यरूपस्यत्वं विदितिपद
स्य मेति वेद्यातत्स्य सम्बन्धोऽस्त्येव [illegible] तत्त्वपस्य वेत्ता [illegible] इत्यादयः श्रुतयास
वलमीश्वरं प्रतिपादयंति न च निर्विशेषं ब्रह्मेति वाच्यं ब्रह्मणो न त्वा
पत्तेः तत्रास्माभिरेव दृष्टत्वात् भवदभिमतेय ब्रह्मलक्षणानीत्ववानाली
चेन्नत्वानधर्माश्रयत्वेन ब्रह्मणो निर्विशेषत्वसिद्धौ तत्र भङ्गो हेत्वापत्ति
स्यादिमले [illegible] तर्कनिराशोः प्रकृतिमनुस्सरामः परं च धाम परम
कृतिप्राकृतिद्व्यादप्यनन्तविलक्षणं चशाद्वाकालादप्युपरिवर्तमान
मप्राकृतं परमपदं परमव्योमादिशब्दाभिधेयं धाम प्रकृष्टं प्राप्यस्था
नं यत्तदपि त्वमेवासि ३८

मधुसूदनीटीका ८

भक्तसुदेकात्मनरपिस्तो
ति॥

त्वमादिदेवः जगतः सर्वहेतुत्वात् पुरुषः पूरयिता पुराणः अना
दित्वमस्य विश्वस्य परं निधानं लयस्थानं त्वमेव विधीयते सर्वमस्मि
न्निति एवं स्थितिमलयस्थानत्वेनोपादानत्वमुक्त्वा सर्वज्ञत्वेन प्रधा
नेश्वरावनिमित्ततामाह वेत्तासि वेदितासि सर्वस्यासि हेतौ पत्तिनिवार
णाय वेद्यं तदपि त्वमेवासि वेदनरूपे वेदितरि परमार्थसंबं॰ ध
धाभावेन सर्वस्य वेद्यस्य कल्पितत्वात् अत एव परं च धाम स्वप्रकाश चि
दानंदघनमविद्यातत्कार्यनिर्मुक्तं विष्णोः परमं पदं तदपि त्वमे
वासि त्वया सद्रूपेण स्फुरणरूपेण च कारणेन ततं व्याप्तमिदं स्वतः
सत्तास्फूर्तिशून्यं विश्वं कार्यं मायिकं सर्वं स्थितिकाले हे अनंत
रूप अपरिच्छिन्नस्वरूप ३८

सदानंदीटीका ११

भक्तस्त्वेकात्मनस्तौति भगवंतमुदारधीः जगतः सर्वहेतुत्वादादि
देवः सनातनः त्वमनादिरशेषस्य लयस्थानं तथास्य च निधानं ज॰

गतःसर्वोपादानत्वेनकारणं वेदितासर्वविषयसंवेदनार्हस्त्वमे
वच समस्तस्यापिवेद्यस्यज्ञातरिज्ञानरूपिणि कल्पितत्वात्त्वंसं
वेद्योवास्तवोदृश्यसाक्षिणः अविद्यादिविनिर्मुक्तंसच्चिदानंद
मद्वयं च यस्मात् धामविश्वाख्यंतत्त्वमेवपरंपदं सत्तास्फूर्तिस
रूपेणत्वयाव्याप्तमिदंजगत् स्वतःसत्तादिशून्यंतद्धिसर्वकार्यंहि
मायिकं त्वयिमायिकसंबंधात्स्थितिकालेऽपिसर्वग ३८

नीलकंठीटीका १२

पुनरपिस्तौति त्वमिति आदिदेवोजगतःस्रष्टृत्वात् पुरुषःसर्व
शरीरशायी पुराणःशरीरनाशादिनाप्यविनश्यन् विश्वस्यास्य
त्वंपरंनिधानंनिधीयतेस्मिन्निति लयस्थानं सांख्यानांजडंप्रकृ
तिंवारयति वेत्ताज्ञाता वेद्यंदृश्यंचत्वमेव परंवेत्तृवेद्याभ्यामस्म
त्धामचैतन्यं त्वयाविश्वंततंव्याप्तंस्वसत्तास्फूर्तिभ्यां हेअनंतरू
पत्रिविधपरिच्छेदशून्यस्वरूप ३८

आनंदीटीका

[illegible] ३८ ॥

रामकंठीटीका

अथयथाऽद्भुतभगवद्धर्मानुदीरयति ॥
वद्भूत्याख्यानार्थायुतेभगवद्विषयाःश्लोकाः किंच ३८

लाक्षिकी [illegible]टीका ध:

किंच पुराणःपुरुषईश्वराख्यस्त्वमादिदेवःप्रथमोपासनीयः तथास्यदृश्यत्वाव
धार्यस्यजगतःपरंनिधानम् प्रकृत्याख्यआश्रयस्त्वमेव तथात्वमे
वजीवरूपेणवेदकोसि तथावेद्यंवस्तुजातंचत्वमेव परंधामत्वमो॰
लाख्यंत्वमेव अतएवविधात्वेनानंतरूपत्वयैवसर्वेणविश्वंसर्वंततंव्या
प्तम् [illegible] ३८

पंचोलीटीका

पुनरपिस्तौति त्वमादीति हेअनंतरूपत्वमादिदेवःजगतःस्र
ष्टृत्वात् पुरुषपुरिशयनात्पुरुषःपुराणश्चिरंतनअस्यजगतः
परंप्रकृष्टंनिधीयतेमहाप्रलयादौजगत्सर्वमस्मिन्निति निधानं॰
वेत्तासिसर्वस्यज्ञातासिवेद्यंज्ञेयमपित्वमसिपरमुत्कृष्टंचैसर्वंप॰

दंत्वमसित्वयेदंविश्वंततंव्याप्तं ३८

रणवीरसमिद्धोयिनी

पुनरपिस्तौति त्वमादीति निगदमाख्यातमेतच्छ्लोकत्रय
म् ३८॥

मधुभाष्य

३८॥

भाषा अनुवाद

और संपूर्ण देवतों के आदि भूत जो अनादिपुरुष तुम सो इस विश्वके परनिधान कहे लयस्थान औ विश्वके ज्ञाता औ जो कुछ जानने के योग्य वस्तु हैं सो तुम हो और परम धाम जो विष्णुपद सोभी तुम हो इसैस हे अनन्तरूप कृष्ण तुम इस विश्वमे व्याप्त हो इन सात हेतवो के द्वारा भी तुमही नमस्कार योग्य हो ३८

चौपई

आदिदेव तुं पुरुष पुराणा तुं इस जगको परम निधाना वेत्ता वेद्य परम धाम हि जोई अनंतरूप तव विस्टत सम सोई ३८॥

वायुर्यमोग्निर्वरुणः शशाङ्कः प्रजापति-
स्त्वं प्रपितामहश्च नमो नमस्तेस्तु सहस्र-
कृत्वः पुनश्च भूयोपि नमो नमस्ते ३९

शाङ्करभाष्यटीका १

किञ्च वायुरिति वायुस्त्वं यमश्चाग्निर्वरुणोऽपांपतिः शशाङ्क-
श्चन्द्रमाः प्रजापतिस्त्वं कश्यपादिः प्रपितामहश्च पितामहस्यापि
पिता प्रपितामहो ब्रह्मणोपि पिता इत्यर्थः नमो नमस्ते तुभ्यम-
स्तु सहस्रकृत्वः पुनश्च भूयोपि नमो नमस्ते बहुशो नमस्कारक्रि-
याभ्यासावृत्तिगणनं कृत्वसुचोच्यते पुनश्च भूयोपीति श्रद्धाभक्त्य-
तिशयादपरितोषमात्मनो दर्शयति ३९

आनंदगिरिकृतटीका २

तस्य सर्वात्मत्वे हेत्वन्तरमाह किञ्चेति कश्यपादिरित्यादिशब्दे-
न विराट्दक्षादयो गृह्यन्ते पितामहो ब्रह्मा तस्य पिता सूत्रा-
त्मान्तर्यामी वेत्याह ब्रह्मणोपीति सर्वदेवतात्वमेवमुक्त्वा फ-
लितमाह नम इति सहस्रकृत्व इति कृत्वसुचो विवक्षितमर्थमा-
ह बहुश इति पुनरुक्तितात्पर्यमाह पुनश्चेति श्रद्धाभक्त्योर-
तिशयात्कृतेपि नमस्कारे परितोषाभावादुद्गात्मनोलंप्रत्यय-
राहित्यं तद्दर्शनार्थं पुनरुक्तिरित्यर्थः ३९

स्वामिकृतटीका ३

इतश्च त्वमेव सर्वतः नमस्कार्यः सर्वदेवात्मकत्वादिति स्तुवन्स्वय-
मपि नमस्करोति वायुर्यमोग्निरिति वाय्वादिरूपस्त्वमिति सर्वदेवा-
त्मकत्वोपलक्षणार्थमुक्तं प्रजापतिः पितामहः तस्यापि जनकत्वा-
त्प्रपितामहस्त्वं अतस्ते तुभ्यं सहस्रकृत्वः सहस्रशोपि नमोस्तु भूयो-
पि पुनरपि सहस्रकृत्वः नमो नम इति [illegible]

[illegible]

पिशाचभाष्यटीका ४

वायुरिति प्रजापतिर्दक्षः पितामहो ब्रह्मा तस्य पितामहः ३९

रामानुजभाष्यटीका ५ ॥ ॥ ॥ ॥

अतस्त्वमेव वेद्यादिशब्दवाच्य इत्याह ॥ ॥

श्री॰
गी॰ टी॰
५

वायुरिति सर्वेषां प्रपितामहस्त्वमेव सर्वासां प्रजानां पितरः प्रजा
पतयः प्रजापतीनां हि पिता हिरण्यगर्भः प्रजानां पितामहः हिर
ण्यगर्भस्यापि पिता त्वं प्रजानां प्रपितामहस्तदीनामात्मतया तत्तच्छ
ब्दवाच्य इत्यर्थः ३९

॥ अभिनवगुप्तकृतटीका ६ ॥

स्पष्टार्थं ३९ ॥

परमार्थप्रपाटीका ७

अथानेन रूपत्वमेव प्रकटयति वायुरिति वाय्वादिसमभिः प्रका
रैस्त्वमेवासि तस्मै तेन भ्यनमो नमोस्तु आदरे वीप्सा अथ किंपु
नः समग्ररूपात्मने सहस्रकृत्वः सहस्रप्रकारात्मने भूयोपि नमो
नमः ३९

वनमालीटीका ८

वैदिकसर्वेशत्ववाच्यत्वमेवेत्याह वायुरिति वाययति सर्वान्ग
मयति प्रेरयतीति वायुः यमसंयंतः स्य इति यमः अग्रं गमयति चेष्ट
यतीत्यग्निः सुप्तत्वभिः सर्वान् नस्याश्रितान् हृष्णेनेवावरुणः श
शाकनाह्रशाकः वय्वादिनियामकत्वात्तत्सद वाच्यः इंद्रवंद
कद्दस्यांदिशद्धः प्रहितिनिमित्तानां पमोत्पो कुलस्य भगवन्मे
वसत्वेन समन्वयाध्यायोक्तरीत्या सर्वेशत्ववाच्यस्य एवेति भावः
प्रजानां पतिर्जगत्पितुरपि च तत्पुत्त्वस्यापि पिता त्वमेव यतः स
हस्रकृत्वः पुनश्च भूयोपि पुनरपि नमस्ते भक्तिश्रद्धातिशयेन
नमस्कारेष्वलंप्रत्ययाभावो नमस्काराहुत्यासूच्यते ३९

रत्नमवैजयन्तीटीका ९

नवसर्वेशत्ववाच्यत्वेन सर्वात्मत्वेन च सर्वदेवरूपत्वात्सर्वैर्नमस्का
र्य इति त्वं च त्वयमपि नमस्करोमीति वायुर्यमोग्निरिति वायुरेकोनपं
चाशत् यमः प्रजासंयमनकर्ता अग्निर्भौमदिव्याकरजभेदात्त्रिविधः
वरुणो जलाधिपतिः शशाङ्कः पीयूषरश्मिर्लतौषधीपोषकः प्रजाः
सृष्ट्यादिकानामष्टपत्नरणमेतत्प्रजापतिः जातित्वादेकवचनम्
मनुमरीच्यादयः प्रजापतय इत्यर्थः चकारात्पितामहोपि ते त
त्र्यंशत्वस्यात्मत्वेन प्रजानां प्रजानां मनुमरीच्यादयः पितरस्तेषामपि

ताब्रह्मास त्वं तत्त्वज्ञानां पितामहस्तस्यापि पिता । तस्मात्सर्वेषांतत्त्व

त्त्वज्ञानां प्रपितामहस्त्वमेवासि पुत्रपौत्रपितामहादीनां सर्वेषामा

त्मनयातत्त्वं ह्यवाप्यत्वमेवेत्यर्थः यस्मादेवं तस्मात्तथा सर्वैर

पि देवैस्त्वं नमस्योसि तथा ममापि नमस्यस्तस्मादहं नमो नम इति

सहस्रकृत्वस्तेत्तुभ्यं नमो नमो मम नमस्कारोस्तु पुनश्च भूयोपि पु

नरप्यसंतुष्टः पुनर्नमो नमः अनया नमस्कारावृत्त्या भक्त्या

तिशयेन नमस्कारेष्वलंप्रत्ययाभावः सूच्यते ३९

मधुसूदनीटीका ९

वायुर्यमोग्निर्वरुणः शशांकः सूर्यादीनामप्युपलक्षणमेतत् प्र

जापतिः विराट् हिरण्यगर्भश्च प्रपितामहस्त्वं पितामहस्य हिरण्यग

र्भस्यापि पिता त्वं यस्मादेवं सर्वदेवात्मकस्त्वमेव सर्वैर्नमस्कार्यो

सि तस्मान्ममापि वराकस्य नमो नमस्ते तुभ्यमस्तु सहस्र[illegible]कृत्वः पु

नश्च भूयोपि पुनरपि नमो नमस्ते भक्तिश्रद्धातिशयेन नमस्कारे

ष्वलंप्रत्ययाभावोऽनया नमस्कारावृत्त्या सूच्यते ३९

सदानंदीटीका ११

वायुः सर्वजगत्प्राणो यमः प्राणिनियामकः अग्निः समस्तदेवानां मुखः

प्राणेन पावकः १ प्राणाप्यायनकर्त्ता सोमो वरुणो रसपालकः शशां

क ओषधीस्वामी तथा सूर्यादयोपि ग्राह्याः २ प्रजापतिर्विराट् समष्टि स्र

ष्टिकर्त्ता च विश्वसृट्क् पितामहस्य ब्रह्मणः पिता त्वं जगदीश्वरः ३ सर्व

देवात्मकत्वेन नमस्कार्योसि सर्वकैः यतस्तस्माद्वराकस्य ममाप्यस्तु

नमो नमः ४ तुभ्यं सर्वात्मने भूयो भूयोप्यस्तु सहस्रशः सहस्रकृत्वो

भूयोपि तुभ्यमस्तु नमो नमः ५ भक्त्याधिक्यान्नमस्कारेष्वलंबुद्ध्य

भावतः अनया नमस्कारावृत्त्या सूच्यते इत्यपि ६ ३९

नीलकंठीटीका १२

[illegible]

[illegible]

[illegible] सर्वदेवतात्मत्वेन स्तौति वायुरिति प्रजा

पतिर्दक्षादिस्त्वं तस्यापि वा प्रपितामहस्त्वं ब्रह्मणोपि पिता ३९

आनंदीटीका ॥ एवंपरांव्याप्तिमुक्त्वापरामाह ॥

ल

श्री॰
गी॰ टी॰
५

[illegible]भावः [illegible] सर्वैश्वर्य[illegible]महाविभूते ।
हे सर्वमहाविभूते सर्वेभ्यः ऐश्वर्यगुणाधिकेभ्यः महती प्रकृष्टा विभूतिः
शक्तिविस्फारः सर्वोदयमोक्षा महत्त्वे विभूतये यायस्येति च तस्या मे त्रयाणां
भगवंतं सर्वदिग्देशकालाकारैकात्म्येन परामृशान् प्रणमति ३९

रामकंठीटीका

किंच सर्वेभ्य ऐश्वर्यगुणाधिकेभ्यो महती प्रकृष्टा विभूतिः शक्तिविजृंभाय
स्यत्तथाविधो भगवांस्तादृशः सर्वेश्वरोऽनंतप्रवाप्रतिमप्रभावो न त्वसामा
न्यमाहात्म्यस्तथानादिमानादिर्विद्यते यस्य स आदिमान् आदिमाननादि
मान् सर्वप्रथमः इत्यर्थः एवंविधस्त्वमेव वाय्वादयो देवताविशेषाः य
थाच वाय्वादीनामीश्वरत्वाद्भिन्नत्वं तथा सर्वमादौ व्याख्यातमेव पर
मेश्वरस्य सर्वाकारत्वं परामृशन्नाह सर्वस्य स्रष्टा त्वमेव नत किंच नहि त्व
दन्यः कश्चिदपीह देवलोकत्रये दृश्यते विश्वकर्मा ३९

लासिकी [illegible]टीका

किंच प्रतीच्यादिदिक्स्वामितां देवानां ये ये दाः परः सदाग्निनेत्रा इत्यादिश्रुति त्वं
त्रैलोकनायकत्वेन प्रसिद्धा वाय्वादयश्च त्वमेव प्रजापतिर्ब्रह्मा च त्वमेव त
स्यापि जनकत्वात् प्रपितामहश्च त्वमेव नमो नम इति पौनःपुन्येन भक्त्याति
शयाविष्कारार्थं [illegible] ३९ ॥

पंचोलीटीका

सर्वदेवात्मकत्वात् सर्वैस्त्वमेव नमस्कार्य इति त्रिभुवनस्य यमापि न
मस्कुर्वन्नाह वायुरिति हे भगवन् वायुर्यमोऽग्निर्वरुणः शशांकः
चंद्रः प्रजापतिः च पुनः प्रपितामहस्त्वं ते तुभ्यं नमः अस्तु पुनश्च भूयो
ऽपि ते तुभ्यं नमः पुनर्नमस्कारकरणं आत्मभक्तिश्रद्धातिशयं दर्शय
ति ३९

रणवीरसमिद्धोधिनी

स्पष्टः ३९

३९॥

मधुभाष्य

भाष्य अनुवाद

जिस हेतु तुम सर्व देवरूप हो इससे तुम सबके नमस्कार
योग्य हो ऐसे वचनोंसे अर्जुन भगवान् कीस्तुति करिके अ-
व आप प्रणाम करते हैं कि वायु यम अग्नि वरुण चन्द्र प्रजा
पति ब्रह्मा औ प्रपितामह ब्रह्माके भी जनक जो तुम सो मे
रे सहस्र सहस्र प्रणाम तुमको हैं फेरि फेरि भी सहस्र सह
स्र प्रणाम हैं ३९

चोपई

वायु अनल यम वरुण शशी जोई प्रजापति त्वं प्रपितामह
होई नमस्कार तोहि सहस्र हि बारा पुन नमस्कार तोहि
करौं अपारा ३९ ॥

नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व अनन्तवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि सर्वः ४०

शाङ्करभाष्यटीका १

तथा नमः पुरस्तादिति नमः पुरस्तात् पूर्वस्यां दिशि तुभ्यमथ पृष्ठतोऽपि च नमोऽस्तु ते सर्वत एव सर्वासु दिक्षु सर्वत्र स्थिताय हे सर्व अनन्तवीर्यामितविक्रमः अनन्तं वीर्यमस्य अमितो विक्रमो यस्य वीर्यं सामर्थ्यं विक्रमः पराक्रमः वीर्यवानपि कश्चित् शस्त्रादिविषयेन पराक्रमते मन्दपराक्रमो वा त्वं तु अनन्तवीर्यामित विक्रमश्च त्वमनन्तवीर्यामितविक्रमः सर्वं समस्तं जगत् समाप्नोषि सम्यगेकेनात्मना व्याप्नोषि यतस्तस्मादसि भवसि सर्वस्त्वया विनाभूतं न किंचिदस्तीत्यर्थः ४०

आनन्दगिरिकृतटीका २

विधान्तरेण भगवन्तं स्तुत्वा नमस्कुर्वन्नभिमुखीकरोति तथेति यस्यां दिशि सवितोदेति सा पूर्वा दिगुच्यते तस्यामेव स्थिते सर्वं त्वमेव तस्मै ते तुभ्यं नमोऽस्त्वित्याह नम इति अथशब्दः समुच्चये पश्चादपि स्थिते सर्वं त्वमेव तस्मै ते तुभ्यं नमोऽस्त्वित्याह अथेति किं बहुना यावन्त्यो दिशस्तत्र सर्वत्र यद्वर्तते तदशेषं त्वमेव तस्मै तुभ्यं प्रह्वीभावः स्यादित्याह नमोऽस्त्विति फलितं सर्वात्मत्वं सूचयति हे सर्वेति वीर्यविक्रमयोर्न पौनरुक्त्यमित्याह वीर्यमित्यादिना वीर्यवतो विक्रमाव्यभिचारादपौनरुक्त्यमाशङ्क्याह वीर्यवानिति भगवति लोकतो विशेषमाह त्वं त्विति उक्तं सर्वात्मत्वं प्रपञ्चयति सर्वमिति सम्प्रपञ्चत्वं वारयति तथेति ४०

भक्ति श्रद्धाभरातिरेकेन नमस्कारेषु तृ स्वामिकृतटीका ३ प्तिमनधिगच्छन् बहुशः प्रणमति ॥

पुनरपि सर्वात्मत्वं किंच नमः इति हे सर्व सर्वात्मन् सर्वासु दिक्षु तुभ्यं नमोऽस्तु सर्वात्मत्वं पराक्रमं प्रपादयन्नाह अनन्तं वीर्यं सामर्थ्यं यस्य तथामितो विक्रमः पराक्रमो यस्य स एवंभूतस्त्वं सर्वं विश्वं सम्यक् अन्तर्बहिश्च व्याप्नोषि [illegible] ततः सर्वस्वरूपोऽसि ४० सुवर्णमिव कटककुण्डलादिकार्यव्याप्यवर्तसे

पिशाचभाष्यटीका ४

श्री. टी.

नमइति पुरस्तादग्रतः पृष्ठतः पश्चात्सर्वतः पुरस्तात्पार्श्वतः पश्चाद्वा हे सर्व अनंतवीर्यं यस्य सोऽनंतवीर्यस्तस्य संबोधनं अमितः अपरिछिन्नो विक्रमः पराक्रमो यस्य सोऽमितविक्रमः सर्वं व्याप्नोषि ततस्सर्वो भवसि ४

रामानुजभाष्यटीका ५

नमइति अत्यद्भुताकारं भगवंतं दृष्ट्वा हर्षोत्फुल्लनयनोऽर्जुनः साध्वसावनतः सर्वतो नमस्करोमि अनंतवीर्यामितविक्रमस्त्वं सर्वमात्मतया समाप्नोषि ततः सर्वोऽसि यतस्त्वं सर्वं चिदचिद्वस्तुजातमात्मतया समाप्नोषि अतः सर्वस्य चिदचिद्वस्तुजातस्य त्वच्छरीरतया त्वत्प्रकारत्वात् सर्वप्रकारस्त्वमेव सर्वशब्दवाच्योऽसीत्यर्थः त्वमक्षरं सदसत्तत्पुः परमोऽसि इत्यादि सर्वस्य सामानाधिकरण्यनिर्देशस्यात्मतयाव्याप्तिरेव हेतुरिति स्पष्टमुक्तं त्वयाततं विश्वमनंतरूप सर्वं समाप्नोषि ततोऽसि सर्वं इति ४

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ४

परमार्थप्रपाटीका ७

अथापरिछिन्नापि तमर्थं नमस्कार इति रथंतरसामाभिप्रायेण नमस्करोति नमइति भो सर्व सर्वात्मक पुरस्तादग्रतः पृष्ठतः पश्चात्तेतुभ्यं नमः किंपुनर्हि दिक्षु स्थिताय सर्वतः सर्वदिक्षु स्थिताय नमोस्तु अथ न केवलं दृश्यमात्रेण स्थितोऽसि तस्मात् हे भोस्वामिन्ननंतवीर्यः सन्नमितविक्रमबलौजः सहः समेताः श्रुतिषु विश्रुतोऽसि एकवीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसीति भाष्यनुकमिति निपातेः वधारणार्थः तस्य विष्णोर्वीर्याणि प्रवोचं बलीनि सः पृथिव्यंतरिक्षसर्वयौ निरजांसि लोकांस्त्रिममे निर्मितवान् एवं त्वं सर्वं समाप्नोषि अनवं ह्यिवाप्नोषि ततस्तेन कारणेन सर्वोऽसि सर्वात्मकोऽसि तदंतरस्य सर्वस्य तदु सर्वस्यास्य बाह्यत इति श्रुतेः तथा रथंतरसामापि अभित्वा शूर नोनुमोऽदुग्धा इव धेनवः ईशानमस्य जगतः स्वर्दृशमीशानमिंद्र तस्थुषः इत्यवाहाउवाचअस् भाष्यं भोइंद्र परमात्मन् शूर शत्रुनिवर्हण त्वां अभि अभितः समंततो नमः नमस्कुर्मः कथंभूतं त्वा अस्य जगतो जंगमस्य तस्थुषः स्थावरस्यापि ईशानं नियामकं के इव वयं अदुग्धाः अकृतदोहना धेनव इव वत्सीरेण पूर्णाः संत्यः वत्सानि विसृज्य तत्रान्नापतीर्णाः संत्यः त्वां याति तथा वयमपि स

^ इतिसंहितापाठः सामगानंच अभित्वाशूरनोनुमो वाजादुग्धाइवधेनवः ईशानमस्यजगतः स्वर्दृशम् आईशुक्रा नेमापिइंद्रतस्थुषा

१३२

चू^

१गी

वेविषयजातेविस्तमत्वामेवसर्वगतेनमस्कुर्मः स्वर्देशे जगन्नका
शाके ईशानमितिपदस्याहृतिरादरार्थो तथायस्संभावुपि अमितादे
वेनहृतनानयामिगायत्रेण छंदसा विहितालोमेनरथ्यंतरेणसाम्नाव
षट्कारेणवज्रेणपूर्वजान भ्रातृव्यान यथानणाजयामिति श्रौतं अमिना
विष्णुरूपेणदेवेनदीप्यमानेन कृतमाहृतनाशत्रु मेनाः तथामिगाय
त्रेणवतविशमत्रेणविहितालोमेन ब्राह्मणे निरभ्योहिं करोतिम
प्रथमेपेम्यादि अयमर्थः स्तुतत्रयगतानामत्वोगानंत्रिभिः पर्यायैः
कृतेतत्र प्रथमेपर्याये विष्णुस्तुकेमु पारस्तिस्वरूपवः द्वितीये मध्यमाति
स्म्भरइनितरतीयायेंपंचमीहिंकरोतिगायति शेषं स्पष्टं ॥८॥

वनमालाटीका ८

तभ्यंपुरोग्रतोनमस्तात् अथशब्दः समुच्चये पृष्ठतस्तुभ्यंनमस्तात् न
मोस्तुतेतुभ्यंसर्वत एव सर्वासुदिक्षुस्थिताय हे सर्व सर्वव्यापिन् वीर्यं
शारीरबलं विक्रमः शिलाशस्त्रप्रयोगकौशलं समस्तमेकंपदमनंत
वीर्यं निरवधिबलंवा यतः सर्वं जगत्तस्मादकमाधार त्वमियामकल्पस
मासदत्तादिनामसमासोपि अतः सर्वमर्वशब्दवाच्यस्त्वं पतेनसर्वं वेलि
देवत्रस्तुमायाः कृतयोव्याख्याताः ॥९॥

अह्मसर्वेजयन्तीटीका ९

पुनरस्यभगवतः सर्वव्याप्तित्वेनसर्ववाच्यत्वमवदन्मन्त्रविग्रहेणनम
स्कारेषुत्वेभावमविन्दन्वन्नृकृतः प्रणमतिनमः पुरस्तादिति हे सर्व
सर्वात्मतया सर्वशब्दवाच्य ते तुभ्यं पुरस्तात्समाग्रभागेस्थितायनमो
स्तु तुभ्यं पृष्ठतोनमः स्तादितिवा अथशब्दस्समुच्चये पृष्ठतोममपृष्ठ
देशेस्थितायतेतुभ्यंनमोस्तुनमस्तात् सर्वतएवसर्वासुदिक्षुस्थि
तायतुभ्यंनमस्तात् अनन्तवीर्यामितविक्रमः वीर्यं देहबलं विक्रमो
धीबलंशस्त्रप्रयोगादिप्रावीण्यरूपं अनंतंवीर्यंयस्य अमितोवि
क्रमोयस्यसचासौसच अनंतवीर्यंतिसम्बोधनमवा एकवीर्यामिवि
क्रमस्ते त्रैकेशितयाधिकमिति भीमसत्योयनाब्रह्मिसोकोलयोर
मेषुवैकेकेव्यवस्थितेतत्र अनन्तवीर्यंस्यामितविक्रमस्यभवस्मिसर्व
रूपत्वेहेतुमाह सर्वमिति सर्वंविदद्विलिप्तज्ञगत्समासाविसम्यक
व्याप्नोषितनतस्मात्ते तास्वसर्वो स्मियाः यतवागतो देवसमीपदेव
तागणाः सतमेवजगत्स्थायतस्सर्वगतोभवानितिपराशरोक्तेः ॥१०॥

तभ्यंपुरस्तादग्रभागे नमोस्तु तभ्यंपृष्ठे नमस्तादि तिवा अथशब्दःसमु च्चये पृष्ठतोपि तभ्यं नमः स्तात नमोस्तु ते तभ्यं सर्वत एव सर्वासु दिक्षु स्थि ताय हे सर्व वीर्यं शरीरबले विक्रमः शिक्षाशस्त्रप्रयोगकौशलं एकं वीर्या धिकमपरं तु विक्रमाधिकमिति सर्वत्र भीमदुर्योधनयोरिवैकैक एव स्थितं त्वं तु अनन्तवीर्यश्चामितविक्रमश्च [illegible] समस्तपदे अनन्तवीर्येति संबोधनं वा सर्वं समस्तं जगत् समा [illegible] प्नोषि सम्यक् एकेन सद्रूपेणाप्नोषि सर्वात्मना व्याप्नोषि ततस्तस्मात् सर्वस्त्वमेव त्वदतिरिक्तं किमपि नास्तीत्यर्थः [illegible] ४०

सदानंदीटीका ११

अग्रभागे नमस्तुभ्यं पृष्ठतोपि नमोस्तु ते दिक्षु स्थिताय सर्वासु सर्वरूप नमोस्तु ते १ अपरिच्छिन्नवीर्यस्त्वं तथामितपराक्रमः जगत्सर्वं त्वमेके न सद्रूपेणाखिलात्मना सम्यग्व्याप्नोष्यतः सर्वस्त्वं तेन दृश्यसे नाक ४०

नीलकंठीटीका १२

हे अनंतवीर्य यतः सर्वं समाप्नोषि एकीभावेन समंताद्व्याप्नोषि ततो हेतोः सर्व इति तव नाम पुरस्तात् अग्रभागे पृष्ठतः सर्वतो मध्येपि ते नमोस्तु ४०

आनंदीटीका

अत्र नमस्कारस्यावृत्तिः प्रत्यभिज्ञातपरमेश्वररूपस्यार्जुनस्य भक्तिश्रद्धातिशयं द्योतयति नहि त्वदन्यः कश्चिदस्तीह देवलोकत्रयेपि अप्रतिहतकर्मा वीर्यमानसिकमुत्साहशक्तिः पराक्रमः शारीरिकः क्रियाशक्तिः [illegible] ४०

रामकंठीटीका

अत्रापि न किंचिद्व्याख्यातमस्ति सर्वं स्वशक्त्या समा [illegible] प्नोषि यतस्त्वं तस्मात् सर्वात्मकस्त्वमेव वीर्यमुत्साहशक्तिः पराक्रमः क्रियाशक्तिः [illegible] ४०

लासिकी ~~[illegible]~~टीका

किंच हे सर्वसर्वरूप सर्वतएव सर्वास्सदिक्षु हे अनंतवीर्यपरिच्छिन्नसामर्थ्य
त्व यतः स्वपरिमितेर्विशिष्टः क्रमोव्याप्तिर्यस्य एवंविधः सं त्वं सर्वं सम
गं तर्बहिश्च व्याप्नोषि सुवर्णमिव कटकादिन्तो हेतोः सर्वस्वरूपोसि [illegible]
[illegible]
[illegible] ४०॥
[illegible]

पंचोलीटीका

किंचनमइति हे भगवन् ते तुभ्यं पुरस्तात्पूर्वस्मादिशि नमः अथ
पृष्ठतः ते तुभ्यं नमोस्तु हे सर्वसर्वतएवसर्वास्सदिक्षु ते तुभ्यं नमः हे
अनंतवीर्य अनंतवीर्यसामर्थ्यं यस्य सोनंतवीर्य स्त्वं अमितविक्रम
पराक्रमो यस्य सत्वं सर्वसमस्तं जगत्समाप्नोषि सम्यक् एकेना
त्मनाव्याप्नोषि ततस्तस्मात्त्वं सर्वोसि त्वद्विनाभूतं न किंचिदस्ती
त्यर्थः ४०

रणवीरसमिद्बोधिनी

स्पष्टः ४०॥

मधुभाष

८०॥

134

भाषा अनुवाद

भक्ति औ श्रद्धा तथा आदर की अधिकाईसे भगवत को नमस्कार करने से तृप्ति न पाके पुनर्वार और भी प्रणाम करते हैं कि हे सर्वात्मन् तुमारे सन्मुख औ पृष्ठभागमे प्रणाम करता हूं और तुमारे सब ओर भी मेरी नमस्कार पहुंचै और भगवान की सर्वात्मकता सिद्ध करने की आकांक्षापर कहते हैं कि तिस की अनन्त सामर्थ्य औ अपरिमित पराक्रम एवंभूत जो तुम विश्वके भीतर बाहर सम्यक व्याप्त हो जैसे सुवर्ण नानारूप से भूषणों मे व्याप्त है औ मृत्तिका घट आदि पात्रों मे जैसे व्याप्त है तैसे विश्वमे आप व्याप रहे हो ४०

चौपई

आगे पीछे तोहि वंदन करहूं नमस्कार तोहि जहां तहां सर्वहूं
अनंत वीर्य अतिविक्रम तोहि सभ व्यापहि तें ताते सर्वहि होई
४०

सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव
हे सखेति अजानता महिमानं तवेदं मया
प्रमादात् प्रणयेन वापि ४१

शांकरभाष्यटीका १

यतोऽहं त्वन्माहात्म्यापरिज्ञानादपराधाद्धेतोः सखेति सखा स
मानवया इति मत्वा ज्ञात्वा विपरीतबुद्ध्या प्रसभमभिभूय प्रस
ह्य यदुक्तं हे कृष्ण हे यादव हे सखेति च अजानता अज्ञानिना
मूढेन किमजानतेत्याह महिमानं माहात्म्यं तवेदमीश्वरस्य वि
श्वरूपं तवेदं महिमानमजानतेति वैयधिकरण्येन सम्बन्धस्त
वेममिति पाठो यद्यस्ति तदा सामानाधिकरण्यमेव मया प्रमादा
त् विक्षिप्तचित्ततया प्रणयेन वापि प्रणयो नाम स्नेहस्तन्निमि
त्तो विस्रम्भस्तेनापि कारणेन यदुक्तवानस्मि ४१

आनन्दगिरिकृतटीका २

अज्ञाननिमित्तमपराधं क्षमयति यत इति इदंशब्दार्थमाह वि
श्वरूपमिति नहीदमित्यस्य महिमानमित्यस्य च सामानाधिकर
ण्यं लिङ्गव्यत्ययादित्याह तवेति पाठान्तरसम्भावनायां सामाना
धिकरण्योपपत्तिमाह तवेमामित्यादिना यदुक्तवानस्मि तदहं क्षामये
त्वामिति सम्बन्धः ४१

स्वामिकृतटीका ३

इदानीं भगवन्तं क्षमापयति सखेति द्वाभ्यां तेमाकृतः सखेमेवं
मत्वा प्रसभं हठेन तिरस्कारेण यदुक्तं तत्क्षामये त्वामित्यन्वयेनाल
यः किं तत् हे कृष्ण हे यादव हे सखेति च सोऽपराधः प्रसभोक्तेर्हेतुः त
व महिमानमिदं च विश्वरूपमजानता मया प्रमादात् प्रणयेन हेत
नापि वा यदुक्तमिति ४१

पिशाचभाष्यटीका ४

सखेति प्रसभेन यथा हे सखे सत्र परलोपो द्रष्टव्यः तवेदं तव इदमित्य
र्थः ४१

रामानुजभाष्यटीका ५

सखेति यदिति अनन्तवीर्यामितविक्रमरूपसर्वात्मानं सष्टृ
त्वादिको यो महिमा तवेदं महत्त्वमजानता मया प्रमादान्मोहात्प्र

श्री॰ १ णयेन सखेति मम वयस्य इति मत्वा हे कृष्ण हे यादव हे सखेति मया प्रसभं
गी टी यदुक्तं विनयापेतं ॥ ४१ ॥

अभिनवगुप्तकृतटीका ॥ ९ ॥

स्पष्टार्थं ॥ ४१ ॥

परमार्थप्रपाटीका ॥ ७ ॥

इदानीं स्वापराधं क्षमापयन्नाह सखेति द्वाभ्यां तेषां कृतः सखा इति म
त्वा मया प्रसभं तिरस्कारेण यदुक्तं तथा कथं हे कृष्ण हे यादव हे सख
इत्येकवचनेन सखेति लोपश्छान्दसः किम् तेन मया
इदमनभ्युपमानं तव महिमानमजानता अवज्ञातिरस्कारप्रकारान्तरमा
ह प्रमादात् प्रणयेन अनवधानेन वा प्रणयेन प्रीत्या वा ॥ ४१ ॥

वनमालीटीका ॥ ८ ॥

यतो हे त्वन्माहात्म्यापरिज्ञानादपराधानजस्रमकार्षमतः परमका
रुणिकं त्वां प्रणिपातपूर्वकं तत्क्षमां कारयामीत्याह सखेति द्वाभ्यां त्वं म
म सखा समानवया इति मत्वा प्रसभं स्वाकर्षणयोपनरूपेणाभिभवे
न मया यदुक्तं तवेदं विश्वरूपं तत्स्वामहिमानमैश्वर्यातिशयमजान
ता प्रमादाच्चित्तविक्षेपात् प्रणयेन स्नेहेन वापि किमुक्तमित्याह
हे कृष्ण हे यादव हे सखेति ॥ ४१ ॥

उत्तमवैजयन्तीटीका ॥ ९ ॥

एवं सर्वस्माच्छ्रेष्ठे भगवतो निरंकुशैश्वर्यातिशयमवलोक्य तत्त्वतावन्म
त्कारं कृतवानित्यात्मनो भूतापराधं स्वापराधं प्रपन्नो भगवन्तमाह
द्वाभ्याम् सखेतीति यथेह लोके प्राकृतजनेनाप्राकृतस्य सखा भवति
तथाहमपि मम सखा भवसीति त्वं अनन्तवीर्यामितविक्रमइति मत्वा
विज्ञाय प्रसभं हठात् त्वाक्रमणयोगेन रूपेणाभिभवेन यत्सर्वः प्रमादा
त् मोहाच्चित्तविक्षेपादित्यर्थः प्रणयेन स्नेहेन वा अपि शाब्दात् कस्मैवि
त्प्रयोजनाय हे कृष्ण हे यादव हे सखे इति सम्बोधनार्थः मया यदुक्तं तिर
स्कारपूर्वकं यच्चाभिहितं तत्त्वामेवमहिमानमैश्वर्यातिशयं कीदृशेन मया तवे
दं महत्स्वरूपं दिव्यलक्षणं मति भयानकममद्भुतं रूपं तथैवं महिमानमै
श्वर्यातिशयमजानता पुंलिंगपाठे त्विमं विश्वरूपात्मकं महिमानम
जानता हे कृष्णेति मत्ता श्रीपूर्वकत्वाभावात् हे यादवेत्यत्रापि गुणत्वा
भावावेदनात् हे सखे हे मत्र सख्यपकृतमात्र सूचनात्स्वेष्टोपनत्र
येण भगवतोऽनादरणीयं नन्वरूपं स्वापराधं क्षमापयतीत्यभिप्रायः ॥ ४१ ॥

+ यतोऽहं त्वन्माहात्म्यापरिज्ञानादपराधमजस्रमकार्षं ततः परमकारुणिकं त्वां प्रणम्यापराधक्षमां कारयामी
त्याह द्वाभ्यां ॥

मधुसूदनीटीका ४१

+ त्वं मम सखा समानवया इति मत्वा प्रसभं स्वोत्कर्षख्यापनरूपेणाभि
मानेन यदुक्तं मया तवेदं विश्वरूपं तथा महिमानमैश्वर्यमिति पाठे महिमा
नमजानता पुंलिंगपाठे [illegible] इमं विश्वरूपात्मकं महिमानमजानता प्र
मादाच्चित्तविक्षेपात् प्रणयेन स्नेहेन वापि किं तदुक्तमित्याह हे कृष्ण
हे यादव हे सखेति ४१

सदानंदीटीका ॥

त्वत्स्वभावापरिज्ञानाद्यतोऽहं नित्यशोऽहरहः अपराधमकार्षं यतस्तस्मात्क
क्षमाकरे १ कारयामि प्रणम्याहमपराधक्षमामिति यथा त्वत्सख
याहीति मत्वा स्वोत्कर्षताभ्रमात् १ हे कृष्ण यादव सखेवेति मूर्धन्य
साम्प्रतः अभिभूय यदुक्तं तं महिमानमजानता प्रमादाच्चित्तविक्षेपा
द्वोक्तं स्नेहेन वा मया ४१

नीलकंठीटीका ४२

एवं त्वत्स्वापराधान् क्षमापयते सखेतीति अयं मम सखा इति म
त्वा प्रसभं तिरस्कृत्य विष्करणपूर्वकं यत्तन्मयोक्तं हे कृष्ण हे यादव
हे सखेति इति शब्देन संबोधनार्थः कृतं उक्तं तवेदं एवंविधं म
हिमानं माहात्म्यमजानता कदाचित् प्रमादाच्चित्तविक्षेपात् कदाचित्
प्रणयेन स्नेहेन च ४१

आनंदीटीका आकृष्णसखित्वादिप्रतिपत्त्या विहितमतिक्रमं मन्यमानस्तत्क्षामणाय सर्वश्लोकचतुष्टयेनाह।
अथ भगवतः पारमेश्वर्यप्रत्यभिज्ञानात्
तवेदं माहात्म्यमिदानीं साक्षात्कृतमजानता मया प्रमादादज्ञानात्प्रणयात्
स्नेहपूर्वकेण वशीकारेण वापि अयं सखा ममेति मत्वा प्रसभं स्वोत्कर्ष
रूपेण बलात्कारेण हे कृष्ण इत्यादि यदुक्तं तत्क्षामये त्वामित्युत्तरेणान्वयः ४१

रामकंठीटीका अन्या भगवति विहितमतिक्रममन्यमानस्तत्क्षा
अथ विज्ञातभगवत्परस्वभावत्वात्सर्वप्रकारेण ति
श्लोकचतुष्टय-
माह ॥
सखायमेतत् किंतु सखा त्वं ममेति मत्वा यद्यादवादिशब्देनामंत्रितोऽसि या
अन्योन्यातिक्रमः कृतस्तत्सर्वमजानतो भगवन्माहात्म्यं तदानीमजानतो मे ज्ञा [illegible] ४१
त्वं तव क्षमितमिति संबंधः [illegible]

लासिकी धनपतीटीका

+ सखायं ममेति मत्वा प्रसभं हठेनानादरेण प्रमादाच्चित्तविक्षेपाद्वा स्नेहेन
वा तवेश्वरस्य महिमानं वैश्वात्म्यलक्षणमिदमनुभूयमानमजानता मयाप्य
त् हे कृष्णेत्यादि यदुक्तं तत्क्षामये त्वामित्युत्तरेणान्वयः सखेति संधिरार्षः इदमिति च
लिंगव्यत्ययः ऐश्वरः इममिति पुंलिंगं केचित्पठंति [illegible] ४१ ॥

+ एवं भगवति समनुष्यबुद्ध्या विहितमतिक्रममधुना तन्माहात्म्यसंवेदनादपराद्धं मन्यमानः तत्क्षा
त्यर्थं श्लोकचतुष्टयमाह ॥

गी॰
टी॰
प॰

पैचोलीटीका

इदानीं भगवन्महात्म्याऽपरिज्ञानात्कृतमपराधं क्षमापयन्नाह स
खेति हे कृष्ण मया तेतव इदं विश्वरूपं महिमानं माहात्म्यमजानता
प्रमादात् असावधानचित्ततया प्रणयेन स्नेहेन वा विश्वासाद्वा सखो
समानवयेति मत्वा यत् हे कृष्ण हे यादव हे सखेति प्रसभं हठादु
क्तं ४१

श्रीधरीसुबोधिनी

इदानीं भगवंतं स्वात्मानं प्रति क्षमापयति सखेति मया तवेदं वि
श्वरूपलक्षणं माहात्म्यं परमार्थतोऽजानता प्रमादाच्चित्तव्याक्षे
पादथवा प्रणयेन सखायं ममेति प्रोक्तवान्मत्वा प्रसभं साहसि
कतया हे कृष्ण हे यादवादि संबोधनपदैराह्वानं भवंतं प्रत्युक्तमपि
यच्चाप्यथवा विहारादिकर्मसु परीहासार्थं केलिषु प्राकृतवद्ध
वमसत्कृतोसि परिभूतोसि असत्करणमपि भवंतं प्रत्युक्तं य
त्कृतं अच्युतेति क्रीडयेषु एकः योऽसेकाकी सपरिभूतोऽ
न्येन व्यलीकं न जानातीति वदेका अथवा तत्समक्षं तेषां सं
सखीनां समक्षं परिभूतोसि योऽसन्यसमक्षं परिभूतः स व्यली
की परिभवतीति वत्तत्समक्षमपि तदसत्करणं तत्सर्वमप्रमेयं
प्रमात्मप्राक्रममहं त्वामये क्षमां करे मदपराधं प्रति प्रसाद
यिष्ये इति भावः ४२ ॥

मधुभाष्य

४२ ॥

भाषा अनुवाद

अब दो श्लोकके द्वारा भगवान से अर्जुन अपनी अपराध क्षमा करावते हैं कि हे कृष्ण हे यादव हे सखे ऐसे वचनों से आपको आपना सखा मानि जो हठ से मैंने तुमारी यह महिमा न जानि के अथवा भूल से या प्रणय करके अति प्रीतिसे कहा सो मेरी अ की असावधान नज्ञान की अपराध चूक आप क्षमाकरो ४१

चौपाई

सखाजान हठसें जो कहियो हे कृष्ण यादव सखा निरवहयो
जानेबिन तवमहिमा यहूं मैं मदसें वा प्रेमहि सें हुं ४१

यच्चावहासार्थमसत्कृतोसि विहारशय्यास
नभोजनेषु एकोथवाप्यच्युत तत्समक्षं तत्
क्षामये त्वामहमप्रमेयं ४२

शांकरभाष्यटीका १

यच्चेति यच्च अवहासार्थं परिहासप्रयोजनाय असत्कृतः परिभू
तोसि भवसि क्व च विहारशय्यासनभोजनेषु विहरणं विहारः पा
दव्यायामः शयने शय्या आसने आस्थायिका भोजनमदनमिति ते
षु विहारशय्यासनभोजनेषु एकः परोक्षः सन् असत् कृतोसि प
रिभूतोसि अथवा हे अच्युत तत्समक्षं तच्छब्दः क्रियाविशेषणार्थः
समक्षं वा असत् कृतोसि तत्सर्वमपराधजातं क्षामये क्षमां कारये
त्वामहमप्रमेयं प्रमाणातीतं यतस्त्वं ४२

आनंदगिरिकृतटीका २

यदयुक्तमुक्तं तत्तत्क्षन्तव्यमित्येव न किन्तु यत्परीहासार्थं क्रीडा
दिषु त्वयि तिरस्करणं कृतं तदपि सोढव्यमित्याह यच्चेति विह
रणं क्रीडा व्यायामो वा शयने तल्पादिके आसने आस्थायिका सिंहा
सनादिरूपलक्षणमेतेषु विषयभूतेष्विति यावत् एकशब्दो रहसि
स्थितमेकाकिनं कथयतीत्याह परोक्षः सन्निति अथवा परोक्षं यात
दसत्करणं परिभवनं यथा स्यात्तथा यन्मया त्वमसत्कृतोसि त
त् सर्वमिति योजनामङ्गीकृत्याह तत्क्षामये इति क्षमां कारयितव्योस
ज्ञापरिमितत्वे हेतुमाह अप्रमेयमिति वाचनिके मदीयमपराधजा
ते त्वया तत्क्षन्तव्यमित्यर्थे इदानीं मदीयोऽपराधो न त्वया गृहीतव्यो
गृहीतोपि सोढव्य इत्याह यत इति ४२

स्वामिकृतटीका ३

किंच यच्चावहासार्थमिति हे अच्युत यच्च परिहासार्थं क्रीडादिषु
तिरस्कृतोसि एकः एकलः सखीन्विना रहसि स्थित इत्यर्थः अथवा
तत्समक्षं तेषां परिहसतां सखीनां समक्षं वा आरोपितं तत्सर्वमपराधजा
तमहं त्वामप्रमेयमचिन्त्यप्रभावं क्षामये क्षमां कारयामि ४२

पैशाचभाष्यटीका ४

यद्वेति विहारः क्रीडा एकः अपसाक्षाद्यः वञ्चनप्रमत्तं तामये प्रसा
दये ४२ ॥ ॥ ॥

रामानुजभाष्यटीका ५

अथ यच्चावहासार्थं सर्वदैव सत्कारार्हस्त्वमसत्कृतोसि विहारशय्या
सनभोजनेषु सहकृतेषु एको वा सतसमक्षं वा यदसत्कृतोसि
तत्सर्वं क्षामये अप्रमेयमहं त्वामापद्ये ४२

स्पष्टार्थं ४२ ॥ अभिनवगुप्तकृतटीका ६ ॥

परमार्थप्रपाटीका ७

यद्वेति यच्च अवहासार्थं परिहासनिमित्तं मातुलपुत्रो हि विनोदा
स्पदमिति बुद्ध्या सखेः विहारे क्रीडायां एकत्र शयने आसने सभाम
ध्ये वा भोजने च एको असत्कृतो स्यवज्ञातोसि किंभूतस्त्वं के अ
चापकलः रहसि स्थितः तत्सर्वमपराधजातं त्वामप्रमेयमविं
प्रमेयप्रभावं क्षमापयेत्तं सकारयामि अयमर्थः सामवेदे हृदद
यतरादिपावमास्तुतिभिः प्रसन्नाद्भगवतो यथोलभस्विस्यादि
नश्वरफलेन हर्णा किंत्वपराधमेव क्षमापयेत्तेन पुनस्सत भजसूय
दर्शनाम्नु किं प्राप्नुयां यतः कृतापराधस्यैव शुभोनश्वरफलप्राप्ति
रिमाधयोः जनस्य श्रुतिरपि वाजसनेयारण्यके अथातः पवमा
नानामेवाभ्यारोहः स वै खलु प्रस्तोता साम प्रस्तौति स यत्र प्रस्तुया
त्तदेतानि जपेदसतो मा सद्गमय तमसो मा ज्योतिर्गमय मृत्योर्मामृ
तं गमयेति भाष्यं अथात इत्यस्य लावकवाक्योपक्रमात्पवमाना
नामभ्यारोह उक्तः स यस्मात्प्रस्तोता परमे
श्वरस्य प्रकर्षेण स्तोतान्सामरूपं परमेश्वरं स्तौति स यत्र यदा प्रस्तु
यात्तस्तुतिं कुर्यात्तत्तदा एतानि त्रीणि यजूंषि जपेत् तान्याह असत
तो मा सद्गमय १ तमसो मा ज्योतिर्गमय मृत्योर्मामृतं गमय ३ भा
ष्ये असतः असद्रूपात्स्वपदात्मां सद्रूपं गमय तमसो अज्ञा
नात्मां ज्योतिः स्वप्रकाशरूपं गमय तथा मृत्योः संसारान्मामृतं
गमयेति तेत्तिरीयकेपि यथा अश्वमेधस्य कर्तृत्वमनुष्ठानमुक्ता
दकमनुत्सर्गं हृदये तराभ्यामिक्षाप्रतिष्ठां गच्छति यथा समुद्रस्य
मध्ये पतिताः ... वै नौकामन्वर्णेषुः ... प्रतितान्नौकं ... त्रिविशेषहृदद्यतराभ्याम ज्ञानाब्धिमितास्संसारं तान्नाम प्रतिष्ठां

त्वमि स्थितिं गच्छेति अथ तत्स्वरफलमिहादित्यतिभिर्लभ्यते श्रु
तिरपि अथयानीतराणि स्तोत्राणि तेष्वात्मनेऽस्रासमागायेत्तस्मा
द्वेतेषु वरं वृणीत सकाममकामयते तमागायदिति भाष्यं अथेममन
तरेषा स्विदन्तराणि याव मामप्यप्ति रिक्ता मिस्तोत्राणि स्तिवा
क्यानि तेषु आत्मने स्वात्मार्थमत्रा यो फलं आगायेत्स्वार्थमेतत्तस्मा
त्समत्राद्देवता विशेषायं कामं कामयते यद्वरं वृणीत तत्तदागा
यत्प्राप्नुयात् ४२

वनमालीटीका ८

यच्चावहासार्थं परिहासार्थं विहारशय्यासनभोजनेषु विषयभू
तेषु मया असत्कृतोऽसि एकः सखीन् विहाय रहसि स्थितो वा हे अ
च्युत तत्समक्षं तेषां सखीनां परिहसतां समक्षं वा हे अच्युत सदैका
कारविकारशून्य तत्सर्वं वचनरूपमसत्करणरूपं वा ममेऽपराधजा
तं त्वामहं क्षमयामि त्वामप्रमेयमचिंत्यप्रभावं अचिंत्यप्रभावेन
निर्विकारेणैव परकारुणिकेन भवता त्वन्माहात्म्यानभिज्ञस्य म
मापराधाः ते त्वया क्षमणीयाः ४२

क्षमवैजयन्तीति टीका ९

किंच यच्चावहासार्थमिति हे अच्युत अप्रच्युत कारुण्यवात्सल्यसमा
दिस्वभावेनानेन मम अपराधसहनेन तव नातिप्रयास इति सूचितम्
यच्च विहारशय्यासनभोजनेषु विहारः क्रीडाव्यायामो वा शय्या तू
लिकाद्यास्तरणविशेषाः आसनं सिंहासनादि भोजनं बहूनां पंक्तौ अ
शनमेतेषु विषयभूतेषु वकारादंभ्रगजवाजिरथादिगमनेषु
अवहासार्थं परिहासाय एकः सखीन् विना विजने स्थितः अथवा त
त्समक्षं तेषां परिहसतां सखीनामग्रे स्थितं त्वं मया असत्कृतोऽसि
यवनच राजसत्व विजयी नि ते दिपः ए रसमवाक्सरलोति क्ष
पटत्वमिमं वेञ्जकशाहे रसकृदवज्ञातोसि तन्त्वामपत तत्सर्वं व
चनरूपमसत्काररूपं वाऽपराधजातं त्वां कारुण्यसिन्धुं समस्व
भगवक्षिमस्व तु न यामि कीदृशं अप्रमेयमतर्क्यप्रभावमिमनेन
त्वन्माहात्म्यानभिज्ञस्य ममापराधाः परमकारुणिकेन भवताते
न क्षन्तव्या इति सूचितं ४२

मधुसूदनीटीका १०

यच्चावहासार्थं परिहासार्थं विहारशय्यासनभोजनेषु विहारः

श्री॰ गी॰ टी॰ प

तेषां २९

क्रीडाशय्यासनेवा शय्यातल्लिकायां स्तरणविशेषः आसने सिंहासनादिभोजने वहूनां पंक्तावशाने तेषु विषयभूतेषु सत्कृतोसि मयापरिभूतोसि एकः सर्वान् विहाय रहसि स्थितो वा तं अथवा तत्समक्षं सर्वेषां परिहसतां समक्षं वा हेअच्युत सदा निर्विकार तत्सर्वं वचनरूपं असत्काररूपं वा अपराधजातं त्वामहं क्षामयामि त्वामप्रमेयम् अचिंत्यप्रभावं अचिंत्यप्रभावेण निर्विकारेण च परमकारुणिकेन भगवता त्वत्माहात्म्यानभिज्ञस्य मम अपराधाः क्षंतव्या इत्यर्थः [illegible] ४२

मधुसूदनटीका ११

यच्चैवपरिहासार्थं क्रीडाशय्यासनादिषु मया त्वं परिभूतोसि रहसि स्थितएव वा १ यद्वा तेषां सर्वेषां च समक्षं हास्यसंसदि हे निर्विकार तत्सर्वमपराधसहस्रकं त्वमात्मेकार ये चिंत्यप्रभावा हेक्रुपांबुधि अतोचिंत्यप्रभावेन निर्विकारेण च त्वया २ अतिकारुणिकेन त्वन्माहात्म्याप्रवेदिनः ममापराधाः क्षंतव्याः श्रीमद्भगवता धुना ४२

नीलकंठीटीका १२

तथा यच्च अवहासार्थं विहारादिषु सत्कृतोसि परिभूतोसि एको वा सर्वेषां वियोगकाले वा तत्समक्षं सखिजनसमक्षं वा सत्कृतोसि तत्क्षामये त्वामहं यतस्त्वमप्रमेयो चिंत्यस्वभावः करुणापरः यतः शत्रुभ्योपि शिशुपालादिभ्यउत्तमां गतिं दत्तवानसीत्यर्थः ४२

आनंदटीका

अवहासोनर्मलीलास्तत्परिहासः एकः एकाकी समक्षं समक्षं सर्वेषां तेषां वा निर्थो वा असत्कृतोसि अनादृतोसि तत्क्षमयामीत्यर्थः [illegible] ४२

रामकंठीटीका

नित्यसत्तामिति सभायां वा सतां सन्निधौ [illegible] ४२ ॥

लासिकी बलभद्रीटीका

किंच हेअच्युत विकारहेतौसत्यपिस्वस्वभावादप्रच्युत यच्चपरिहासार्थं

विहारादिषु नाटतोसि एकः सखीत्विनाऽहमिस्थितः अथवा तत्समक्षं
सखीनां प्रत्यक्षं तत्सर्वमपराहजातं क्षमापयामि त्वाम् नत्वीस्वरसाप
शाप्याचरणमनवितमित्यतो हेतुगर्भं विशेषणमाह अप्रमेयं तानिके
नरूपेण प्रत्यक्षायोगोचरम् [illegible] ४२॥

पंचोलीटीका

यच्चेति हे अच्युत वयुनः अवहासार्थपरिहासप्रयोजनाय एकः
परोक्षं अथवा तत्समक्षं विहारशय्यासनभोजनेषु विहारस्मरण
वक्रमणं च शय्याशयने आसनमुपवेसनस्थानं सिंहासनादिभो
जनाशनं तेषु असत्कृतः परिभूतोसि तत्सर्वं अपराधजातं अहमप्र
मेयं अचिन्त्यप्रभावं त्वां क्षामये क्षमां कारयेहं तत्काम्भूमौ दंडवत्प्रणा
म ४२

रणवीरसमिद्धोधिनी॥

स्पष्टार्थः ४२॥

मधुभाष

४२॥

भाषा अनुवाद

और हे अच्युत विहार शयन भोजन क्रीड़ा आदि मे अथवा सखा
गण रहित निर्जन स्थान मे जहां हम और तुम को छोड़ और
कोई नथा ऐसी जगह मे अथवा परिहास करने वाले मित्रो के बी
च मे जो हमने हसने के लिये तिरस्कार आपका किया है सो सब
अचिन्त्य प्रभावरूप आपसे हम क्षमा करवावते है ४२

चोपई

जो हास हि मैं कह्यो अनादर तोहि बैठत चलत शयन भोजन म
हि जोहि इकल एकांत वा संग जो देखा मैं तोहि अप्रमेय सो च
महुं मलेखा ४२ ॥

पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरु
र्गरीयान् न त्वत्समोस्त्यभ्यधिकः कुतोन्यो
लोकत्रयेऽप्यप्रतिमप्रभाव ४३

शांकरभाष्यटीका १

पितासीति पितासि जनयितासि लोकस्य प्राणिजातस्य चराचरस्य
स्थावरजङ्गमस्य न केवलं त्वमस्य जगतः पिता पूज्यश्च पूजार्हो
यतो गुरुर्गरीयान् गुरुतरः कस्माद्गुरुतरत्वमित्याह न च त्वत्स
मस्त्वत्तुल्योऽस्ति न हीश्वरद्वयं सम्भवत्यनेकेश्वरत्वे व्यवहारानु
पपत्तेः त्वत्सम एव तावदन्यो न सम्भवति कुत एवान्योऽभ्यधि
कः स्यात् कस्माल्लोकत्रयेऽपि सर्वस्मिन्नप्रतिमप्रभाव प्रतिमीयते
यया सा प्रतिमा न विद्यते प्रतिमा यस्य तव प्रभावस्य स त्वम
प्रतिमप्रभावः हे अप्रतिमप्रभाव निरतिशयप्रभाव इत्यर्थः ४३

आनन्दगिरिकृतटीका २

गुणाधिक्यात् पूजार्हत्वं धर्मात्मज्ञानसंप्रदायप्रवर्तकत्वेन पि
तृत्वात् गुरुत्वं गुरूणामपि ब्रह्मादीनां गुरुत्वाद्गरीयस्त्वं तदे
व प्रश्नद्वारा साधयति कस्मादिति ईश्वरान्तरं तुल्यं भविष्यती
त्याशंक्याह नहीति ईश्वरभेदे प्रत्येकं स्वातन्त्र्यादेकमत्ये हेत
भावान्नानामतित्वे चैकस्य सिसृक्षायामन्यस्य संजिहीर्षासम्भवाद्व्य
वहारलोपादयुक्तमीश्वरनानात्वमित्यर्थः अभ्यधिकासत्वे कैमु
तिकन्यायेन दर्शयति त्वत्सम इति तत्र हेतुमवतार्य व्याकरोति
अप्रतिमेत्यादिना ४३

स्वामिकृतटीका ३

अचिन्त्यप्रभावमेवाह पितेति न विद्यते प्रतिमोपमा यस्य सः अप्र
तिमस्तथाविधः प्रभावो यस्य तव हे अप्रतिमप्रभाव त्वमस्य चराचर
स्य पिता जनकोसि अत एव पूज्यश्च गुरुश्च गुरोरपि गरीयान् गुरुतरः
अतो लोकत्रयेपि त्वत्सम एव तावदन्यो नास्ति परमेश्वर[illegible]स्याभा
वात् त्वत्तोऽभ्यधिकः पुनः [illegible] कुतः स्यात् ४३

पिशाचभाष्यटीका ४ ॥ ॥

॥

स्पष्टार्थं ४३

१

श्री॰
गी॰ टी॰
५

रामानुजभाष्यटीका ५

पितासीति अस्य चराचरस्य लोकस्य पितासि अस्य लोकस्य गुरुश्चासि अतस्त्वमस्य लोकस्य चराचरस्य गरीयान् पूज्यतमः न त्वत्समोस्त्यभ्यधिकं कुतोन्यः लोकत्रयेपि त्वदन्यः कारुण्यादिना गुणेन केनापि न त्वत्समोस्ति कुतोभ्यधिकः ४३

अभिनवगुप्तकृतटीका ८

स्पष्टार्थं ४३

परमार्थप्रपाटीका ७

अथ तन्मापने वीजमाह पितेति पितोत्पादकः पूज्यः पूजनीयः गुरुरुपदेष्टा ततो गरीयान् दृष्टांताभावे कथयति अप्रतिमप्रभावः त्वत्सदृशोन्यः परमेश्वरो नास्ति कुतस्त्वत्तोधिकः स्मृतिरपि रणंतरमान्येन रान हावाश्रमो दिव्यो न पार्थिवो न जातो न जनिष्य तइमव वा मितिविनाशो वस्पष्टार्थं ४३

वनमालीटीका ८

अचिंत्यप्रभावत्वमेव प्रपंचयति पितेति अस्य चराचरस्य लोकस्य पिता जनकस्त्वमसि पूज्यश्चासि सर्वेश्वरत्वात् गुरुश्चासि शास्त्रोपदेष्टृत्वात् सर्वप्रकारैर्गरीयान् गुरुतरोसि अत एव न त्वत्समोस्त्यभ्यधिकः कुतः लोकत्रयेपि हे अप्रतिमप्रभाव नास्ति प्रतिमा तुल्योन्यः प्रभावो यस्य सोप्रतिमः अमाव प्रभावो यस्य स त्वं न त्वत्समोन्यो स्ति द्वितीयपरमेश्वराभावात् तस्माधिकोन्यः कुतः स्यात् सर्वथा न संभाव्यत एवेत्यर्थः ४३

सर्व

ऊस्तमवैजयन्तीटीका ५

अप्रमेयतामेव प्रपंचयति पितासीति अस्य चराचरस्य विश्वस्य लोकस्य त्वं पिता जनकोसि सर्वकारणत्वात् अस्य पूज्यश्चासि सर्वेश्वरत्वात् अस्य गुरुश्चासि सर्वशास्त्रोपदेष्टृत्वात् अतस्सर्वैः प्रकारैर्गरीयान् गुरुतरस्त्वमेवासि अत एव हे अप्रतिमप्रभाव न विद्यते प्रतिमा उपमा यस्य सोऽप्रतिमस्तथाविधः प्रभावो निरंकुशशाक्ति वितैश्वर्यं यस्य स तत्संबोधने कुत एव यतो लोकत्रयेपि त्वल्लोकादिष्वनालोकेपि अन्यस्त्वदन्यः कश्चिदपि त्वत्समोऽविद्यमानत्वत्स्वरूप गुणशक्त्यादिभिस्त्वत्तुल्यो नास्ति अलौकिकपलत्वेनानासीत् न भविष्यतीत्यर्थः अतोभ्यधिकस्त्वत्तः सर्वप्रकारैरधिकोऽन्यः कुतस्स्यात् हि

नीयस्य सर्वेश्वरस्याभावात् एवं स्तुतिरत्याह न त्वत्समस्त्यभ्यधि
कः कुतोऽन्य इति ४२ मधुसूदनीटीका १०॥ अचिंत्यप्रभाव तामेव प्रपंचयति॥ पूज्यश्चासि सर्वे
अस्य चराचरस्य लोकस्य पिता जनकस्त्वमसि पूज्यश्चासि सर्वैः प्रकारैर्गरीयान्
श्वरत्वात् गुरुश्चासि शास्त्रोपदेष्टा अतः सर्वैः प्रकारैर्गरीयान्
गुरुतरोसि अत एव न त्वत्समोस्त्यभ्यधिकः कुतोऽन्यः लोकत्र
येपि हे अप्रतिमप्रभाव यस्य समोपि नास्ति द्वितीयस्य परमेश्व
रस्याभा[illegible]वात् तस्याधिकोऽन्यः कुतः स्यात् सर्वेषामन संभावित
एवमर्थः [illegible] ४२ सदानंदीटीका ११ चराचरस्य लोकस्यापि
अचिंत्यप्रभाव त्वं प्रपंचयति पांडवः सर्वेषामपि
तात्वं पूज्य ईश्वरः १ गुरुः शास्त्रोपदेष्टासि गरीयान् सर्वेषां
त्वत्समो नास्ति कुतोऽपि कुतः स्यादधिको हरेः त्वत्तोऽन्य ईश्वरः सेवा
भावादप्रतिमैश्वर ४२ नीलकंठीटीका १२ पितासि अतो सा
अप्रमेयत्वमेवाह पितासीति यतस्त्वमस्माकं पितासि अतोस्मा
भिः शिशुभिः कृतापराधास्त्वया सहनीया एवेति भावः ४२
आनंदीटीका + सुगमोर्थः ४२
अप्रमेयत्वमचिंत्यप्रभावतां प्रपंचयति॥
रामकंठीटीका [illegible] [illegible] लोकत्रयेपि त्वत्
समो नास्ति कुतोऽन्योऽभ्यधिको भविष्यति॥ ४२॥
लालिकी [illegible]टीका
यतः हे अप्रतिमप्रभाव अनुपमैश्वर्य त्वमस्य चराचरस्य लोकस्य पिता ज
नकः पालको वासि पूज्यश्चासि गुरुश्चासि अतः सर्वेभ्यो गरीयान् गु
रुतमोसि अतो लोकत्रयेपि त्वत्समस्त्वादृशोऽन्यो नास्ति द्वितीयस्य परमे
श्वरस्याभावात् त्वत्तोऽभ्यधिकः कुतः पुनः स्यात् ४२॥
पंचोलीटीका
अचिंत्यप्रभावत्वमेवाह पितासीति अस्य चराचरस्य स्थावरजं
गमस्य लोकस्य जगतस्त्वं पिता जनकः न केवलं जनकः पूज्यः
पूजार्हः यतस्त्वं गुरुर्गरीयान् गुरुतरः यतो लोकत्रयेपि त्वत्स

मः कोपिनास्ति अभ्यधिकः कुतः अप्रतिमः अनुपमः भावो
यस्य सः अप्रतिमप्रभावः ४३

रणवीरसमिद्धोद्योतिनी॥

पितासीति त्वमेवास्य चराचरात्मकस्य जगतः पिता पितृवदु
त्पादयिता तथा एव गरीयान् गुरुतरप्रभावत्वात् ज्यायान् गुरुस्तत्वोप
देष्टासि यतस्त्वमप्रतिमप्रभावः त्रिष्वपि लोकेष्वप्रतिमोसमा
नः प्रभावोस्याद्वितीयत्वादिति ब्रह्मादयोप्युत्पादयितारोम
त्समाना एवेति चेदत आह नेति नह्यप्राह्वो विशेषद्योतकः अन्यो
ब्रह्मादिकः त्वत्समोपि न भवत्यप्रतिमप्रभावत्वात्कुतोभ्यधि
को निरतिशयप्रभावत्वादिति ४३॥

मधुभाष्य

४३॥

भाषा अनुवाद

अथ भगवत् का अचिन्त्य प्रभाव कहते हैं कि हे अप्रतिम प्र
भाव नहीं है प्रतिमा कहे उपमा ऐसा निरूपम प्रभाव है जि
सका सो तुम इस चराचरात्मक लोक के पिता कहे उत्पत्ति क
र नेवाले औ पूजनीय तथा गुरु के भी गुरु हौ इस हेतु परमे
श्वर जो तुम तुमारे समान को त्रिलोकी मे कोई नही तो अधि
क फेरि और कहा होय सकै है ४२

चौपई

पितावराचरको तुं होई तुंजगपूज्यगुरुगरिष्ट हि सोई नहि
तव सम को अधिक हि और तीनलोक असमप्रभाव हि तोरा ५४

तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यं पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुं ॥४४॥

शाङ्करभाष्यटीका॰ १

यत एवं तस्मादिति तस्मात् प्रणम्य नमस्कृत्य प्रणिधाय प्रकर्षेण नीचैर्धृत्वा कायं शरीरं प्रसादये प्रसादं कारये त्वामहमीशमीशितारमीड्यं स्तुत्यं त्वं पुनः पुत्रस्यापराधं पिता यथा क्षमते सर्वं सखा इव सख्युरपराधं यथा वा प्रियः प्रियाया अपराधं क्षमते एवमर्हसि हे देव सोढुं प्रसहितुं क्षन्तुमित्यर्थः ॥४४॥

आनन्दगिरिकृतटीका॰ २

निरतिशयप्रभावत्वे हेतुं कृत्वा प्रतिमेत्यादिना प्रसादये प्रणामपूर्वकं त्वामित्याह यत इति प्रसादनानन्तरं भगवता कर्तव्यं प्रार्थयते त्वं पुनरिति प्रिय इव प्रियाया इतीवकारो लुप्यते प्रियायार्हसीति छान्दसः सन्धिः त्वं मे मदपराधजातमिति शेषः ॥४४॥

स्वामिकृतटीका॰ ३

यस्मादेवं तस्मादिति त्वामीशं जगतः स्वामिनमीड्यं स्तुत्यं प्रसादयामि कथं कायं प्रणिधाय दण्डवन्निपात्य प्रणम्य अतस्त्वं ममापराधं सोढुं त्वमर्हसि कस्य क इव पुत्रस्यापराधं कृपया पिता यथा सहते सख्युर्मित्रस्यापराधं सखा निरुपाधिर्बन्धुर्यथा प्रियश्च प्रियापराधं तत्प्रियार्थं यथा तद्वत् ॥४४॥

पैशाचभाष्यटीका॰ ४

तस्मादिति प्रणिधाय प्रकर्षेण नीचैर्दण्डवद्भूमौ कायं निपात्य सोढुमित्युपचारः ॥४४॥

रामानुजभाष्यटीका ५

तस्मादिति यस्मात्त्वं सर्वस्य पिता पूज्यतमो गुरुश्च कारुण्यादिगुणैश्च सर्वाधिकोऽसि तस्मात्त्वां प्रणम्य प्रणिधाय कायं प्रसादये यथा कृतापराधस्यापि पुत्रस्य यथा सख्युः प्रणामपूर्वकं प्रार्थितः पिता सखा वा प्रसीदति तथा त्वं परमकारुणिकः प्रियाया इव मे सर्वं सोढुमर्हसि ॥४४॥

अभिनवगुप्तकृतटीका ६ ॥

स्पष्टार्थं ॥४४॥ ॥

परमार्थप्रपाटीका ७

116

यदेवं तस्मात्कायं प्रणिधाय दंडवन्निपात्य प्रणम्य त्वामहं प्रसादये प्र-
सन्नं करोमि किंभूतमीशमीड्यं स्तुत्यं अनेकप्रकारेण त्वमप-
राधं मे सोढुमर्हसि कस्य क इव पिता पुत्रस्येव सखा सख्युः प्रियः प्रि-
यायाः प्रियायाश्च यथा तत्परफलार्थं स्तुतिः ज्ञानतारमिदं सवितार
मिदं इह वेस्सहवमित्यादि श्रमेयं तत्प्राह स्तोकश्च श्रुद्धानघ्नवसा
पिनो पि भगवद्बहुमानभिन्नसमतद्वाक्याल्लमितादरस्पष्टहेतोः श्री
कारैः मा श्राशिषः श्रुत्वा पक्व तमारणं स पश्यासा सा स्वात्मभोग-
श्रिरादात्मामित्यपराधजातमधुनाश्राद्धहरे दशाने ४४

हवे — सखेव

वनमालीटीका ८

तस्मात्प्रणम्य प्रणिधाय प्रकर्षेण नीचैः कायं धृत्वा दंडवद्भूमौ पति-
त्वा प्रसादये त्वामीशमीड्यं सर्वस्तुत्यमहमपराधी यतो हे देव पितेव
पुत्रस्यापराधं सखेव सख्युरपराधं प्रियः प्रियायाः पतिव्रताया अप-
राधं ममापराधं त्वं सोढुं सहनमर्हसि अनयोरत्वा मम प्रियायार्ह-
सीत्यत्रैवशब्दलोपः संधिश्च छांदसः ४४

१०८

कममवैजयन्तीटीका ९

किंच यस्मात्त्वं सर्वलोकस्य पिता गुरुः पूज्योऽतः कृतं स्वस्वरूपगुणा-
दिभिस्सर्वप्रकारेण सर्वाधिकोऽसि तस्मात्कायं प्रणिधाय प्रणम्य भू-
मौ साष्टांगं प्रणतिं कृत्वा दत्तवदपराधी त्वन्महिमानभिज्ञः ईशं सर्व-
स्य नियंतारं स्वामिनं वा ईड्यं सर्वस्तुत्यं विश्वाकारं भगवंतं प्रसादये
प्रसन्नं करोमि न त्वपराधिनः प्रणामेन वाहं प्रसन्नः कथं स्यामिति संप-
ताया स्वस्वाभाविककारुण्यादिगुणाश्रयत्वेन प्रणामादिसाधनत्वि-
नैवत्वं प्रसन्नः स्यादिति स्वजनापराधसहनेन दृष्टांतत्रयेण भगवतो
योग्यतामाह पितेव पुत्रस्य यथापराधिनः पुत्रस्यापराधं पिता सहते
यथा वा सख्युरपराधं पिता सहते यथा च सखा सख्युरपराधं सखा सहते
यथा प्रियायाः पतिव्रतायाः अपराधं प्रियः पतिः सहते यथा हे दे-
वापराधिनो ममाप्यपराधं सोढुं त्वं नैककरुणावरुणालयः ह सि
योग्यो भवसि प्रियायार्हसीत्यत्रैवशब्दलोपः संधिश्च छांदसः ४४

मधुसूदनीटीका १०

यस्मादेवं--
तस्मात्प्रणम्य नमस्कृत्य त्वां प्रणिधाय प्रकर्षेण नीचैर्धृत्वा कायं दंड-
वद्भूमौ पतित्वेति यावत् प्रसादये त्वामहमीशमीड्यं सर्वस्तुत्यमहम
पराधी अतो हे देव पितेव पुत्रस्यापराधं सखेव सख्युरपराधं प्रियः प

तिरिव प्रियायाः पतिव्रतायाः परार्धं ममाप्यपराधं त्वं सोढुमर्ह
सि अनन्यशरणत्वान्मम। प्रियायार्हसी यद्वत् इव शाह्लोपः संधि
श्लोकः [illegible]
[illegible] ॥४॥

सदानंदी टीका ॥

तस्मात्त्वामहं नमस्कृत्य पतित्वा दंडवत्स्थितो प्रसादये खिलस्त्वं
त्वामीश्वर पदाम्पदे १ यथा पुत्रस्य तनयस्यापराधं पिता यथा
सख्युः सखा पतिः तस्या भार्यायाः त्वमनेयथा २ तथा ममापरा
धं त्वं सोढुमर्हसि केशव अनन्यशरणत्वाद्वकल्याणगुणसागर
३ इत्थं त्वं नमति शे जगतामधीशः क्षमस्व कृपाजलधे यतो मम
तोषात्मनः स्तोत्रीयं पदेन यतिशांति तत्त्वैकधाम्यपत्वं भवेन मतनमी
शमहं प्रमुदे ॥४॥

नीलकंठी टीका १२

एतदेवाह तस्मादिति यस्मात्त्वं पिता गुरुश्च तस्मात्त्वां कायं शरीरं प्र
णिधाय भूमौ कृत्वा दंडवत्प्रणम्य त्वामहं प्रसादये ईशं ईड्यं स्तुत्यमहमन
त ॥४॥

आनंदी टीका

कायं प्रणिधाय दंडवद्भूमौ पतित्वा प्रणम्य नमस्कृत्य अथेश्वरस्य
माहात्म्यमत्यभिज्ञानमाह दिव्यानि कर्माणि तवाद्भुतानि पूर्वाणि पूर्वे
ऋषयः स्मरंति नान्योस्ति कर्ता जगतस्त्वमेको धाता विधाता च विभु
र्भवश्च धाता धारयिता विधाता स्रष्टा तवाद्भुतं किं न भवेदसह्यं किं वा
शक्यं परतः कीर्तयिष्ये कर्तासि सर्वस्य यतस्त्वमेवैव विभो नंतं सर्वमिदं
त्वमेव अत्यद्भुतं कर्मनेतदुष्करं तेक मौपमानं न हि विद्यते ते न ते गुणा
नां परिमाणमस्ति न तेजसो नापि बलस्य नर्द्धेः दिव्यानि कर्माणि त्वा
दिक श्लोकद्वयमेतद्वार्षेयं नास्ति [illegible]
[illegible] ॥४॥

रामकंठी टीका मूलश्लोकं स्पष्टार्थम् पाठत्रमोप्यत्र

अथ विज्ञातमहिमानमावेदयितुमाह दिव्यानि कर्माणि तवाद्भुता
नि पूर्वाणि पूर्वे ऋषयः स्मरंति नान्योस्ति कर्ता जगतस्त्वमेको धा
ता विधाता च विभुर्भवश्च तवाद्भुतं किन्नु भवेदसह्यं किं वा शक्यं परतः

श्री॰ गी॰ टी॰ ए॰

कीर्तयिष्ये कर्तास्मि सर्वस्य यतस्त्वं वै विभो नतः सर्वमिदं त्वमेव अ
त्यद्भुतकर्म तदुष्करं ते कर्मोपमानं न हि विद्यते ते तत्तेषु गणानां परि
माणमस्ति न तेजसो नापि बलस्य नर्द्धेः पूर्वैर्भगवन्तत्रापि सर्व
ताविषयस्तव कर्माणि स्मरेति अतएव तेषामृषीणामपि ता
नि पूर्वाणीति जगतः सर्गप्रलयादीनां भगवत्कर्मणां सनादित्र
वे प्रवृत्तत्वप्रतिपादनपरमेतत् पूर्वैर्व्याख्यातमेवमन्यत् स
वोऽयं किं तथा तत्पारयिता विधाता स्रष्टा तव स्वरूपः स्वमायः
किमद्भुतमाश्चर्यं च यत्कर्म स्वेच्छामात्रोपकारणासि कस्य कर्तुं
त्वया सत्त्वमतएव सत्कार्यादिकारणानि रूपेण तत्रास्य तः सा
त्वव्यतिरिक्तात्तत्कृत्स्निच्छक्व साध्यं किं वा ते कथयिष्यामीत्युक्त्वा
त्वमानेन तया गतस्त्वं सर्वस्य वस्तुनस्तस्य निर्माता ततो हेतं त
राभावात्त्वमेवेदं सर्वं त्वत्कृतिर्वर्णित्वत्कार्यस्तत्रुषुः तत्रस्मान्मा
श्चर्यरूपमपि कर्म न ते दुष्करमित्यादि सुष्ठुम् [illegible]

[illegible]

[illegible] ॥

लासिकी टीका

तस्मात्ततो हेतोः प्रणम्य नत्वा कायं प्रणिधाय दण्डवद्भूमौ निपात्य
त्वामहमीशमीड्यं प्रसादये हे देव पिता पुत्रस्यापराधं जातमिव सखा
सख्युरिवापराधम् प्रियः प्रियायाइवापराधं ममापि त्वं मर्हसि
प्रियायाइति विसर्गलोपः संधिरार्षः [illegible] ४४

पंचोलीटीका

यस्मादेवं तस्मादिति कायं देहं प्रणिधाय भूमौ पातयित्वा प्रण
म्य नमस्कृत्य अहं त्वामीशमीड्यं पितेव पुत्रस्य प्रसादये प्रसादं
कारये हे देव ममापराधं सोढुमर्हसि यथा पुत्रस्यापराधं पिता
सहते यथा सख्युरपराधं सखा सहते प्रियायाः अपराधं प्रियः सह
ते तथा त्वमपि ४४

यस्मादेवं तस्मात्कारणाद्दंडवत्पूर्वं कायं शरीरं प्रणिधाय प्रकर्षे
णा प्रह्वं दंडवन्निधाय तदनुप्रणम्य प्राणमवचनस्तुत्का त्वामीशं
स्वामिनमीड्यं कीर्तनीयमाहात्म्यं प्रसादये प्रसन्नं कारये इत्यर्थः ॥
पुनः प्रार्थयते पितेति यथाहि पुत्रेरपराधित्वादिधर्मव्यापारवत्त्वेपि
तुरेवेति पुत्रस्य पितेव यथाच सख्युः कुमार्गादिभ्यो व्यावर्तकत्वादि
धर्मवत्त्वं सख्यावेवेति सख्युः सखेव तथा त्वमपि ममेति किंच
प्रियः प्रियायार्हसि देव सोढुमिति देव यथाच प्रियः प्रियतमः स्वा
दिकः प्रियाय पित्रादेर्हिताय भवति तथा त्वमपि ममेति महिषया
नपराधान्सोढुमर्हसि अपराधिनमपि मां प्रति प्रसीदेति भावः
४४ ॥

मधुभाष्य

४४ ॥

भाषा अनुवाद

इस से हे ईस स्वामिन् स्तुति के योग्य ईश्वर जो आप तिन को मै शरीर से दण्ड की नाई अष्टाङ्ग प्रणाम करि प्रसन्न करावता हूं कि जैसे पुत्र की अपराध कृपा करि के पिता सहि लेता और मित्र की अपराध मित्र मनमे नही धरता तथा पत्नी की अपराध पति भी प्रीति से सह करता है तैसे हीहे देव पिता औ मित्र तथा स्वामी रूप आप भी मेरी अनजान बालक समान प्रीतिपात्र सेवक की अपराध क्षमा कीजिये ४४

चौपई

ताते नमहुं भूमिधर शीषा करौं प्रसन्न मै तोहि स्तुत्य हिं ईशा
सुत को पित सम हितको हित होई प्रियेहि प्रिया त्यों योग्य देव सहन कोई ४५

अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथि
तं मनो मे तदेव मे दर्शय देव रूपं प्रसीद दे
वेश जगन्निवास ४५

शांकरभाष्यटीका १

अदृष्टपूर्वमिति अदृष्टपूर्वं न कदाचिदपि दृष्टपूर्वमिदं विश्व
रूपं तव मया अन्यैर्वा तदहं दृष्ट्वा हृषितोऽस्मि भयेन च प्रव्यथितं
मनो मे ऽतस्तदेव मे मम दर्शय हे देव रूपं यत्मत्सखं प्रसीद दे
वेश जगन्निवास जगतो निवासो जगन्निवासः हे जगन्निवास ४५

आनन्दगिरिकृतटीका २

हेतूक्तिपूर्वकं विश्वरूपोपसंहारं प्रार्थयते अदृष्टेति हृषितो हृ-
ष्ट इति यावत् भयेन तदद्भुतविकृतदर्शनेनेत्यर्थः ४५

स्वामिकृतटीका ३

एवं क्षमापयित्वा प्रार्थयते अदृष्टपूर्वमिति द्वाभ्यां हे देव पूर्वमदृष्टं
तव रूपं दृष्ट्वा हृषितोऽस्मि तथा भयेन च मे मनः प्रव्यथितं तस्मान्मम
व्यथानिवृत्तये तदेव रूपं दर्शय हे देवेश हे जगन्निवास प्रसन्नो भव ४५

पिशाचभाष्यटीका ४

अदृष्टपूर्वमिति हृषितो हृष्टरोमा ४५

रामानुजभाष्यटीका ५

अदृष्टेति अदृष्टपूर्वमत्यद्भुतमत्युग्रं च तव रूपं दृष्ट्वा हृषितोऽस्मि
भयेन च प्रव्यथितं च मे मनः अतस्तदेव प्रसन्नं रूपं मे दर्शय प्रसीद दे तं^
वेश जगन्निवास मयि प्रसादं कुरु देवानां ब्रह्मादीनामपीश जग
दाश्रयभूत ४५

अभिनवगुप्तकृतटीका ६

स्पष्टार्थः ४५ ॥ ॥ ॥

परमार्थप्रपाटीका ७

अपत्क्षमापणं प्रार्थयते अदृष्टपूर्वमिति द्वाभ्यां पूर्वं जन्मजन्मांतरे
ष्वपि न दृष्टमिदमदृष्टपूर्वं विश्वरूपात्मकं तव भुजरूपं दृष्ट्वा मा दृष्टपाला
मपमलभ्यलाभ इति हृषितोऽस्मि अनंतरं दृष्ट्वा करालानि रूपा
णि दृष्ट्वा भयेन च मे मनः प्रव्यथितं अतः परं भो देवेश जगन्निवास प्र

श्री॰
गी॰टी॰
प

सीदप्रसन्नोभव प्रसादे किंफलमित्यत आह तदेवप्रथमत्रुपलब्धं
हर्षजनकंचतुर्भुजंरूपंमह्यतिमोदर्शय तावतैवकृतार्थःस्यामित
र्थः ४५

वनमालीटीका ८

एवमयापराधान्क्षमापयित्वासर्वदास्वानुभूतरूपदर्शनंप्रार्थ
यते अदृष्टेतिद्वाभ्यां कदाप्यदृष्टपूर्वंपूर्वमदृष्टं विश्वरूपंदृष्ट्वाहृ
षितोहृष्टोस्मितद्रूपदर्शनजेनभयेनमेमनोव्यथितंव्याकुलीकृतं
अतस्तदेवसदामयाभ्यस्तंममप्राणसहस्रादपितयापिप्रियंतत्प्र
सादंविनायोगीश्वराणांमनसाप्यगम्यंरूपंममदर्शयचक्षुर्गोचरं
कुरु हेदेवेशहेजगन्निवासप्रसीदमदतिवल्लभरूपदर्शनरूप
प्रसादंमेकुरु ४५

अनुमवैजयन्तीटीका ९

एवमात्मनोपराधक्षमांसंप्रार्थ्येदानींभगवतोविश्वरूपोपसंहा
रेणप्राग्रूपदर्शनायभगवन्तमर्जुनःप्रार्थयतेद्वाभ्यां अदृष्टपूर्व
मिति अदृष्टपूर्वंमयाकदापिपूर्वंनदृष्टंनवेदमेश्वरंविश्वरूप
दृष्ट्वावलोक्याहंहृषितोऽस्मिमत्मित्रसेदेवेदमसाधारणरूपमिति
मुदितोऽस्मि अथचमेममनोतिभयानकंनवंदघोररूपमव
लोक्यतद्विकृतरूपदर्शनजेनभयेनप्रव्यथितंव्याकुलीकृतंभव
ति अतइदमहंत्वांप्रार्थयेहेदेवेशब्रह्मादिदेवनियंतःस्वामिन्वा
हेजगन्निवाससर्वजगदाधारप्रसीदत्वमपिप्रसादंकुरुमत्प्रसादे
नकिंफलमित्यपेक्षायामाह तदेवेतिमेममप्राणेभ्योऽप्य
तिप्रियंतदेवपूर्वदृष्टमेवदेवरूपंचतुर्भुजाकारंतेनैवरूपेणच
तुर्भुजेनैनमनंतरमेववसतेदर्शयप्रसादभावयदेवेतिसंबोधन
रूपंभिन्नंप्रदेवाहंदेवमनेनलोकदृष्ट्यामनुष्याकारोपित्वंनमा
नुषःकिंतुपरमेश्वरएवासंद्याहंजानेइतिसूचितं ४५

+ एवंनिजापराधक्षमांसंप्रार्थ्य पुनःप्राग्रूपदर्शनंविश्वरूपोपसंहारेणप्रार्थयतेद्वाभ्यां ॥

मधुसूदनीटीका १०

+कदापिअदृष्टपूर्वंपूर्वमदृष्टंतवविश्वरूपंदृष्ट्वाहृषितोहृष्टो
स्मितद्विकृतरूपदर्शनजेनभयेनमप्रव्यथितंव्याकुलीकृतंमनोमे
अतस्तदेवप्राचीनमेवममप्राणेभ्योपितयापिप्रियंरूपंमेदर्शयहेदे
वेशहेजगन्निवासप्रसीदप्राग्रूपदर्शनरूपप्रसादंमेकुरु

सदानंदीटीका ११

अपराधक्षमापणमो प्रार्थ्य पुनः प्राग्रूपदर्शनं विश्वरूपोपसंहारद्वारा
प्रार्थयते पुना १ कदाप्यदृष्टपूर्वं यद्विश्वरूपं महत्तरं दृष्ट्वा हृष्टो
स्मि तद्रूपं श्रीमद्भगवतो हरेः २ भीषणत्वाद्भयेन च मनो मे व्या
कुलीकृतं अतस्त्वं देव प्राचीनं मम प्राणादपि प्रियं ३ मह्यं दर्श
य देवेश प्रसीद जगतां पते ४५

नीलकंठीटीका १२

एवं स्तुत्वा स्वेष्टं प्रार्थयते अदृष्टपूर्वमिति हे देव कदाचिदपि
पूर्वं न दृष्टं तादृशं अदृष्टपूर्वं त्वद्रूपं दृष्ट्वा हृषितोऽ
स्मि तथापि विकरालरूपदर्शनजेन भयेन च मे मम मनः प्रव्य
थितं अतस्तदेव धारणाविषयभूतं रूपं मे मह्यं दर्शय ४५

आनंदीटीका ॥ अथैतद्रूपं मनुष्यशक्तित्वाच्चिरकालं द्रष्टुमशक्तश्चि
रपरिचितमेव रूपं द्रष्टुं प्रार्थयतेऽर्जुनः ॥
हृषितोऽस्मि रोमांचितोऽस्मि ४५ ॥

रामकंठीटीका स्पष्टार्थम् ४५

अथानुग्रहलक्षणाद्भुतभगवत्स्वरूपाव्यतिरिक्तसमाधेर्निष्क्रान्तस्तदा --- विध
मत्युग्रं भगवद्रूपं मनुष्यधर्मप्रत्यापत्तेश्चिरं द्रष्टुमशक्तः प्राकृतमेव दि --- दृक्ष
माणमिदमाह ॥

लासिकी [illegible]टीका

किंच हे जगन्निवास अदृष्टपूर्वं तवैश्वरं रूपं दृष्ट्वा भयेन च मम मनः प्र
व्यथितं व्याकुलीभूतम् ऐश्वररूपसमावेशसंस्कारवैवश्येन पुरः
स्थितमपि श्रीकृष्णरूपमनुपलभ्यमानत्वाद्दर्शयितुं प्रार्थयते त
देवेति हे देव हे देवेश तदेव प्राचीनं रूपं मे मह्यं दर्शय प्रसीद प्रसन्नो भ
व [illegible] ४५

पंचोलीटीका

एवं क्षमाप्य प्रार्थयते अदृष्टपूर्वमिति द्वाभ्यां हे देव हे भगवन्
अदृष्टपूर्वं तवेदं विश्वरूपं दृष्ट्वा हृषितोऽस्मि च अत्यन्तं भयेन मे
मनः प्रव्यथितं प्रचलितं मम तदेव रूपं यत्सत्त्वं तदेव दर्शय
हे देवेश जगन्निवास प्रसीद प्रसादं कुरु ४५

अदृष्टपूर्वमिति पूर्वमदृष्टमेतत्ते रूपं संप्रति दृष्ट्वा हृषितो।
स्मि मनश्च मे भयेन प्रव्यथितमिति हर्षकंपमिश्रस्वभावमा
न्ममव्यथानिवृत्तिर्नाभूद्देवत्वद्रूपाख्यातेरित्यतस्तदेव रूपं
दर्शय येनाहं स्वस्थितः स्यामित्याह तदेवेति तदेव रूपमेद
र्शयाथ देव देवेश जगन्निवासेति संबोधनत्रयं भक्तान्यत्व
प्रदर्शनार्थं इति मां प्रति प्रसीदेत्यनेनैव प्रसादेन निरतिशय
सुखो भवामीति प्रसादफलमिति भावः ४५॥

मधुभाष्य

४५

भाषा अनुवाद

इस प्रकार से क्षमा कराय अब अर्जुन दो श्लोक के द्वारा भग
वानसे प्रार्थना करते हैं कि हे देव श्रीकृष्ण अदृष्टपूर्व यह
आपका रूप देखि के मैं अति प्रसन्न भया हौं परन्तु भयके
मारे मेरा मन थिर नहीं है इससे हे देवेश जगत के निवा
स अब मेरे पर प्रसन्न होउ और वही पूर्व रूप देखावो यह
प्रार्थना करता हूं ४५

चौपई

अदृष्ट पूर्व देखि हरि मे हर्षा पुन भयसें मन मोरहि कर्षा
ताते देव दर्षी पसोई रूपा हर्षसु देषा जगवास स्वरूपा ४५

किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुम
हं तथैव तेनैव रूपेण चतुर्भुजेन सहस्रबा
हो भव विश्वमूर्ते ४६

शाङ्करभाष्यटीका १

किञ्च किरीटिनमिति किरीटिनं किरीटवन्तं तथा गदिनं गदा
वन्तं चक्रहस्तमिच्छामि त्वां प्रार्थयिता द्रष्टुमहं तथैव पूर्वव
दित्यर्थः यत एवं तस्मात् तेनैव रूपेण वसुदेवपुत्ररूपेण च
तुर्भुजेन सहस्रबाहो वार्तमानिकेन विश्वरूपेण भव विश्वमू
र्ते उपसंहृत्य विश्वरूपं तेनैव रूपेण वसुदेवपुत्ररूपेण भवे
त्यर्थः ४६

आनन्दगिरिकृतटीका २

तदेव दर्शयेत्युक्तं किं तद्दिदृक्षायामाह किरीटिनमितीति चक्रं
हस्ते यस्य तमिति श्रुतमिति गदी त्वाह चक्रेति मदीयेच्छाफलप
ष्ठित्वा कर्तव्यमाह यत इति चतुर्भुजत्वे कथं सहस्रबाहुत्वं तत्रा
ह वार्तमानिकेनेति सति विश्वरूपे कथं पूर्वरूपभाक्त्वं तत्राह
उपसंहृत्येति ४६

स्वामिकृतटीका ३

तदेव रूपं विशेषयन्नाह किरीटिनमिति किरीटवन्तं गदावन्तं चक्र
हस्तं च त्वां द्रष्टुमिच्छामि पूर्वं यथा दृष्टोऽसि तथैव अतो हे सहस्रबा
हो विश्वमूर्ते इदं रूपं संहृत्य तेनैव किरीटादियुक्तेन चतुर्भुजेन
भवाविर्भूतो भव तदनेन श्रीकृष्णमर्जुनः पूर्वमपि किरीटादियु
क्तमेव पश्यतीति गम्यते यत्तु पूर्वमुक्तं विश्वरूपदर्शने किरीटिनं
गदिनं चक्रिणं च पश्यामीति तद्विश्वरूपे किरीटाद्यभिप्रायेण यद्वा
एतावन्तं कालं यं त्वां किरीटिनं चक्रिणं च सम्प्रसन्नमपश्यं तमे
वेदानीं तेजोराशिं दुर्निरीक्ष्यं पश्यामीत्येवं तत्र वचनव्यक्तिरिति
न विरोधः ४६

पिशाचभाष्यटीका ४

यथा पूर्वं दृष्टवानहं तथैव संयुक्तो भव ४६

रामानुजभाष्यटीका ५

किरीटिनमिति तथैव पूर्ववत् किरीटिनं गदिनं चक्रहस्तं त्वां द्रष्टु
मिच्छामि अतस्तेनैव पूर्वसिद्धेन चतुर्भुजेन रूपेण युक्तो भव सहस्र

श्री
गी टी०
५

वाहो विश्वमूर्ते इदानीं सहस्रबाहुत्वेन विश्वशरीरत्वेन दृश्यमान
रूपत्वं तेनैव रूपेण चतुर्भुजो भवेत्यर्थः ४६

अभिनवगुप्तकृतटीका ९ ॥

स्पष्टार्थं ४६ ॥

परमार्थप्रपाटीका १

अथोपक्रमः दृष्टपूर्वं कीदृशमित्याह किरीटिनमिति मुकुटव
न्तं गदिनं च चक्रिणं चेत्युपलक्षणमेतत् सर्वायुधयुक्तमिति तेषं अ
यमर्थः विश्वरूपदर्शनोपक्रमे दिव्यदृष्ट्या यच्चतुर्भुजं तेजोरूपमति
मनोरमरूपं दृष्टं तदुत्कण्ठविना नामज्ञानुभवगोचरं भवतीति पू
र्वेष्वागतादिभ्यः अतमासीत् तदद्यापि मतोमया नैव दृष्टमिति दर्श
जनकं तेष्वानन्तरं दृष्ट्वा करालमत्युग्रपतनं च प्रयत्नेन कथनं तत्त्वदेव
किरीटाद्युपस्कृतरूपं दृष्टुमिच्छामि नतु भयजनकं तत्स्माद्धे विश्व
मूर्ते सहस्रबाहो तेनैव चतुर्भुजेन रूपेणाभवआविर्भव अथवा विश्व
रूपदर्शना[illegible]नन्तरमर्जुनस्य चतुर्भुजमेव रूपं दृष्टवानिति व
न्दिष्यत्युपाभिदेवाश्च वेदेद इत्यत्र किरीटिनं गदिनं चक्रिणं चेति
पुनर्वक्ष्यत अनूद्यते किंच चतुर्भुजरूपं हि देवं न मानुषं तथा
च यथामतो देवरूपप्रतीतो अज्ञानतो महिमानं तवेदं तथापि वा
वहासार्थमसत्कृतोसीति तत्रोच्यते किंच अवजानन्ति मां मूढा
मानुषीं तनुमाश्रितं तथा दृष्टेदं मानुषं रूपं तव सौम्यं जनार्दनेत्युप
क्रमोपसंहाराभ्यां सर्वमनुष्यसाधारणमपस्य ४६ द्विभुजत्वं पस्यैव निर्दिष्टमानु

वनमालीटीका ८

किरीटवन्तं [illegible] वक्रहलवन्तं द्रष्टुमिच्छामि तथैव तेनैव
महद्भ्यलरूपेण चतुर्भुजेन सहस्रबाहो हे विश्वमूर्ते यथापि
वानन्तरूपलक्ष्याममवितन्तस्मिन्नेवरूपेनुरक्तमतो ममतदेवद
र्शयं अविमानेन गुणालयेवा सदेवैकस्मिन्नेवानन्तरूपाकृति
शीयतितावद्देव सम्पश्यति नन्तरूपान्तरमतीभ्यासमावि विश्वरूपा
न्निरस्मिन् रूपपिगूहितविश्वरूपलोकैः तथा चतुर्भुजरूपान्तरस्मेगोपन
भूजमेव रूपमस्वादयन्तस्मत्क्रम ४६

तत्त्वमवेजयन्तीटीका ४

तद्रूपं कीदृग्भवतीत्यपेक्षायामाह किरीटिनमिति किरीटिनं किरीटो
पलक्षितं कुंडलकटककेयूरहारकटिसूत्रनूपुराद्यलंकारवंतं गदि
नं गदावंतं चक्रहस्तं चक्रं हस्ते यस्य तं एवं पदे शंखपद्मवतोपि
लयोरप्युपलक्षणं तत्र चतुर्भुजो हि सिद्धेः तथाविधं पद्मवंतं वेत्स
थुः ईदृशं चतुर्भुजं तदेहं त्वां द्रष्टुमहमिच्छामि अतो हे सहस्रबाहो हे
शः ईदृशं चतुर्भुजं तदेहं त्वां द्रष्टुमहमिच्छामि पूर्ववद्देवतनेनैवानितसो
विश्वमूर्ते इदानीमिदं रूपमंतर्भाव्य तेनैव चतुर्भुजेन रूपेण विशिष्टः संभव प्रादुर्भवः ४६
दर्शितगुणप्रकृतेनैव चतुर्भुजेन रूपेण विशिष्टः

मधुसूदनीटीका ९

तदेवरूपं विद्धणोति ॥
किरीटवंतं गदावंतं चक्रहस्तं च त्वां द्रष्टुमिच्छाम्यहं तथैव पूर्व
वद्देव अतस्तेनैव रूपेण चतुर्भुजेन वसुदेवात्मजत्वेन भव हे स
हस्रबाहो हे विश्वमूर्ते उपसंहृत्य विश्वरूपं पूर्वरूपेणैव प्र
कटो भव मर्थः एतेन सर्वदा चतुर्भुजादिरूपमर्जुनेन भगव
तो दृष्टपूर्वमिति [illegible] ४६
[illegible]
[illegible] ४६

सदानंदीटीका ११

प्रार्थनीयं स्वरूपं तद्विवृणोति हरे त्वेयः किरीटिनं गदावंतं चक्रह
स्तमहं पिये १ पूर्ववद्द्रष्टुमिच्छामि तो श्रियो वा समस्तु तं चतुर्भुज
तेनैव रूपेण प्रकटो भव २ सहस्रबाहो विश्वात्मन्नुपसंहृत्य सर्व
तः विश्वरूपं स्वसौम्यतरूपेण प्रकटो भव ४६

नीलकंठीटीका १२

तदेवरूपमाह किरीटिनमिति एतेन अर्जुनस्य चक्रगदाकिरी
टोपेतं चतुर्भुजं भगवतो रूपं धारणाविषय इति दर्शितं हे सहस्र
बाहो हे विश्वमूर्ते सहस्रबाहुत्वादिकमुपसंहृत्य तेनैव रूपेण चतुर्भुजेन
भव प्रकटो भव ४६

श्रानंदीटीका

स्वबोधमेतत [illegible] ४६

रामकंठीटीका स्पष्टार्थं ४६

लाक्षिकी टीका ॥ कालरूपसंहरणाय तदेवरूपं विशिनष्टि ॥

श्री
गी टी०
प
153

तथैव पूर्ववद्देवतेनैव किरीटादिपक्तेन यतेनपूर्वमपि वत्तमेजाया
कारेणाश्रीकृष्णमर्जुनः पश्यतिस्मेतिगम्यते [illegible]
[illegible] ४६

पंचोलीटीका

तदेवरूपंविशेषेणआह किरीटिनमिति हेसहस्त्रवाहोअहंत्वां
तथैवकिरीटिनंगदिनंचक्रहस्तंद्रष्टुमिच्छामिहेविश्वमूर्तेतेनैवच
तुर्भुजेनरूपेणभव ४६

भावार्थबोधिनी॥

तदेवरूपंदिदृक्षुरर्जुनोभगवंतंपुनःप्रार्थयते किरीटिनमिति
यत्पूर्वमेव किरीटिनमित्याद्युक्तं तेनैवरूपेणसंयुक्तोभवेति
वाक्यार्थः ४६॥

मधुभाष्य

४६॥

भाषा अनुवाद

अब सोई पूर्व रूप कहेत हैं कि हे सहस्रबाहो हे विश्वमू
र्ते सोई किरीट मुकुट दिये गदा औ चक्र हाथ मे लिये आप
को देखने को इच्छा करता हों इससे अब आप इस विश्वरूप
को संहार करि के वे सही चतुर्भुज रूप स्वरूप धारण करो ४६

चौपई

गदाकिरीट चक्रधरजैसें चाहत देखा मैं तोहि तैसें तोहे च
तुर्भुज रूपहि सोहु सहसबाहु विश्वमूर्ति होहु ४६॥

श्रीभगवानुवाच मयाप्रसन्नेनतवार्जुनेदं रूपंपरंदर्शितमात्मयोगात् तेजोमयंविश्व मनन्तमाद्यंयन्मेत्वदन्येननदृष्टपूर्वं ४७

शाङ्करभाष्यटीका १

अर्जुनं भीतमुपलभ्य उपसंहृत्यविश्वरूपंप्रियवचनेनाश्वासय न् श्रीभगवान् मयेति मयाप्रसन्नेन प्रसादोनामत्वय्यनुग्रहबुद्धिस्त हता [illegible] प्रसन्नेन मया तव हे अर्जुन इदं परं रूपं विश्वरू पं दर्शितमात्मयोगात् आत्मन ऐश्वर्यस्य सामर्थ्यात्तेजोमयं ते जःप्राय विश्वं समस्त मनन्तं अन्तरहितं आद्यं भवमाद्यं यद्रूप मेममत्वदन्येन त्वत्तोऽन्येन केनचिन्न दृष्टपूर्वं ४७

आनन्दगिरिकृतटीका २

अर्जुनेनस्थाने हृषीकेशेत्यादिनोक्तस्य भगवतोवचनमवतारय ति अर्जुनमिति भगवत्प्रसादेकोपायलभ्यं तद्दर्शनमित्याशयेनाहम येति ४७

स्वामिकृतटीका ३

एवंप्रार्थितःसन्तमाश्वासयन् श्रीभगवानुवाच मयेतित्रिभिः हेअर्जुन किमितित्वंबिभेषियतोमयाप्रसन्नेन कृपयातवेदंपरंउत्त मंरूपंदर्शितं आत्मनोममयोगात्योगमायासामर्थ्यात् परमत मेवाह तेजोमयं विश्वंविश्वात्मकं मनन्तमाद्यं चयन्ममरूपंत्वदन्ये नत्वादृशात्भक्तादन्येननपूर्वंदृष्टंतत् ४७

चिद्घनभाष्यटीका ४

एतदर्जुनस्यवचनंश्रुत्वाभगवानुवाच मयेति आत्मयोगादात्म स्वरूपेणयोगः ४७

रामानुजभाष्यटीका ५

श्रीभगवानुवाच मयेतियन्मेतेजोमयंतेजोराशिंविश्वंसर्वात्मभू तमनन्तमन्तरहितंप्रदर्शनार्थमिदंआदिमध्यान्तरहितंआद्यंत्व त्तस्यादिभूतंत्वदन्येनकेनापिनदृष्टपूर्वंपूर्वंतदिदंप्रसन्नेनम यामद्भक्तायतेदर्शितं आत्मनःसत्यसंकल्पत्वयोगयुक्तत्वात् ४७

अभिनवगुप्तकृतटीका ६

स्पष्टार्थं ४७

१

श्री॰
गी॰ टी॰
८

155

परमार्थप्रपाटीका १

~~विश्वरूपस्यैवनिर्देशात्~~ अथाश्वासयन्भगवानाह मयेति त्रिभिः
त्वयायदुक्तंमह्यापिलोनराज्ञाप्रवृत्तिंनविदामीतितर्हिंआकस्मिकाद्भुत
भयानकरूपदर्शनेनभयमुत्पद्यतेप्रकृतेतुप्रसन्नेनमयादिव्यदृ
ष्टिदानपूर्वकंतवेदमात्मयोगात्स्वमायावैभवेनरूपमुत्कृ
ष्टंरूपंदर्शितंत्वतएवतदभिविशेषणैराह तेजोमयंविश्वमनंत
माद्यंयत्त्वदन्येनकेनापिनदृष्टपूर्वं ४७

वनमालाटीका ८

एवंप्रार्थितोभगवान्भक्तिविह्वलहृदयेविश्वरूपदर्शनस्यतुलभमवे
दर्शयन्नर्जुनमाश्वासयन्नाह मयेति हेऽर्जुन किमितिबिभेषिम
याप्रसन्नेनकृपयायावत्तवदेवपरमुत्कृष्टंममप्रमुखंविश्वरूपं आत्म
योगात्दर्शपमपिस्वसामर्थ्यात्दर्शितं तेजोमयंप्रकाशात्मकंवि
श्वंव्यापकमनंतगुणपूर्णंच अनंतंदेशकालादिपरिच्छेदशून्यम
मयदिदंरूपमेतादृशप्रसादहीनेनत्वदन्येननदृष्टपूर्वं यद्यपि
श्रीव्यासप्रसादात्संजयेनापरैरपिभीष्मादिभिरन्यैरपिकैश्चिद्दृष्टं
तथापियथार्जुनेनदृष्टंतथान्येनेदृष्टमर्जुनइवात्यन्तभगव
त्प्रसादस्याभावात् ४७

प्रमेयजयन्तीटीका॰

एवमर्जुनेनप्रार्थितोविश्वरूपमुपसंहृत्यकृपापूर्णनेत्राभ्यांसम
यन्निवसमवलोक्यतमुपलभ्यचयथावित्तमहदत्ववचनेनतमाश्वा
सयन्श्रीभगवानुवाचत्रिभिः मयाप्रसन्नेनेति हेऽर्जुनशृणुतत्कार
णयतोदृष्टुमिच्छामितेरूपमित्यादिवाक्यैर्येनपाप्रसन्नेनत्वद्दिष
यकृपातिशयवतामया आत्मयोगात् आत्मनःस्वस्ययोगात्समर्थ
संकल्परूपयोगात्स्वसामर्थ्यादित्यर्थःपरमंवत्कृष्टमिदंरूपंवि
श्वरूपंतवदर्शितंमतोभयंनकार्यमित्यभिप्रायःपरत्वंविहृणो
तितेजोमयंतेजोराशिंविश्वंसर्वात्मभूतमनंतंआदिमध्ययोरंत
रहितं अनुपलक्षणंआदिमध्यांतरहितमित्यर्थःआद्यंसर्वस्यादिभूत
मिदंमत्कंममरूपंविश्वरूपंत्वयादृष्टंतत्वदन्येनकेनापिजनेन
दृष्टपूर्वंपूर्वंनदृष्टंयत्तत्वमसदृशादिदानीत्वदन्यैरपिदेवादिभि
र्दृष्टंतदेतन्ममरूपंभक्तिदर्शनंभक्तैर्नान्यैरितिप्रदर्शयितुमयात्व
दृष्टस्यतस्यवहमानिकत्वाय देवायदेवादिभ्योपिभक्तिमत्त्वातुःप्र

\+ एवमर्जुनेन प्रसादितो भयबाधितमर्जुनमुपलभ्योपसंहृत्य विश्वरूपमुचितेन वचनेन तमाश्वासयन् ॥

दर्शितं यद्येतादृशं पुनः भीष्मद्रोणादिभिर्दृष्टं न त्वदेवविधमि
नित्वदन्येन न दृष्टपूर्वमित्युक्तं ४७

मधुसूदनी टीका ९

श्रीभगवानुवाच हे अर्जुन मा भैषीः यतो मया प्रसन्नेन त्वद्विषयकृपातिशयवता
इदं विश्वरूपात्मकं परं श्रेष्ठं रूपं तव दर्शितमात्मयोगात् असा
धारणात् निजसामर्थ्यात् परत्वे विवृणोति तेजोमयं तेजः
प्रचुरं विश्वं समस्तमनन्तमाद्यं च यन्मम रूपं त्वदन्येन केनापि न
पूर्वं दृष्टपूर्वं न दृष्ट [illegible]
[illegible] ४७

सदानंदी टीका ११

एवं प्रसादितो विस्मभीतं दृष्ट्वार्जुनं प्रियं उपसंहृत्य तद्रूपमुवा
चाश्वासयन् ॥ १ मा भैषीस्त्वं यतः पार्थ प्रसन्नेन मया तव वि
श्वरूपात्मकं श्रेष्ठं दर्शितं करुणावशात् असाधारणसामर्थ्या
दात्मयोगाभिधात्परं तेजोमयं समस्तं चाद्यमनन्तविवर्जितं
त्वदन्येन न केनापि दृष्टपूर्वं कथंचन ४७

नीलकंठी टीका १२

एवमर्जुनेन प्रार्थितस्तं स्तुवन् भगवानुवाच मयेति त्रिभिः हे
अर्जुन प्रसन्नेन मया तव तुभ्यं इदं परं रूपं दर्शितं आत्मयोगात् स्व
सामर्थ्यात् करुणया न तु त्वद्दर्शनेऽधिकारोऽस्ति तथा च प्रागुक्तं
कर्मण्येवाधिकारस्तेऽइति तेजोमयं चिद्रूपं दिव्यं विश्वं विश्वात्मकं
आद्यं अनादि अनन्तं च यत् रूपं त्वदन्येन कदाचिदपि न पूर्वं दृष्टं
दृष्टपूर्वं ४७

आनंदी टीका

अथैवं प्रार्थितो भगवानुवाच ॥
आत्मयोगात् स्वात्मज्ञानोपदेशेन मयि तव योगः तथापि च मम योग
स्यैव यस्मैव प्रकारात् परमैश्वर्यसंबद्धमेतद्रूपं प्रकटीकृतम् [illegible]
[illegible] ४७ ॥

रामकंठी टीका

एवं प्रार्थितः सन्नमाश्वासयन् ॥
अथैवंविधमुक्तो भगवानुवाच स्वबोधमेतत् किं त्वात्मयोगाद्दर्शित
मित्येतदेवं वोढुं मयेदं त्वयदृष्टपरेणामयात्वमात्मनि परस्मिन् स्वभावे
योगं समाधिं प्रापितस्तदैतद्रूपं तव प्रत्यक्षीकृतं [illegible]

गी
टी॰प॰

श्रीभगवानुवाच — लासिकी…टीका

हे अर्जुन माभैषीः यतो मया प्रसन्नेन सता इदं तव अनुभूतं परमुत्
कृष्टमैश्वरं रूपमात्मयोगात् आत्मन ईश्वररूपस्य योगसमाव
शं प्राप्य त्वज्ञोपेपं वमीतवदर्शितम् इष्टं तयाहृदात्मतया
मयफलं परतमेवाह तेजोमयं विश्वं विश्वात्मकं तेपितेजोमयं वि
वकाशमयम् अनंतमपरिछिन्नम् आद्यं विश्वोत्मेषस्यकारण
भूतं यन्मम रूपं त्वदन्येन नादृष्टाद्ग्येन पूर्वं न दृष्टं
४७

पंचोलीटीका

अर्जुनं भीतमुपलभ्य विश्वरूपमुपसंहृत्य प्रियवचनेन आश्वा
सयन् श्रीभगवानुवाच मयेति हे अर्जुन मया प्रसन्नेन इदं परं
रूपं विश्वरूपं तेजोमयं तेजः प्रायं विश्वं समस्तमनंतमंतरहितं
आदौ भवमाद्यमात्मयोगात् आत्मैश्वर्यसामर्थ्याद्दर्शितं यन्मे
यद्रूपं मे मम त्वदन्येन न दृष्टपूर्वं ४७

रणवीरसमिद्धोधिनी॥

अथ भगवानर्जुनं संभ्रांतमसमाश्वासयन् विश्वरूपदर्शन
लक्षणं प्रसादमंगीकुर्वंतं प्रत्युवाच मयेति अर्जुनेति संबोधनं
प्रकृवितत्व सूचनार्थमिदानीं त्वां प्रति प्रसन्नेन मयेदं विश्वरूपा
ख्यं परं रूपमात्मयोगादात्मनो योगः सामर्थ्यं तस्माद्धेतोर्दर्शितं
कीदृशं तत्तेजोमयं तेजएव प्राचुर्येण यत्र तत्तेजोमयं अनंतमा
द्यमाद्यंतरहितं किं तदित्याह यन्मेइति यत्परं रूपं त्वत्तोन्येन त्व
क्षादिनापि न दृष्टपूर्वं पूर्वं सर्गस्याराद्वं तेचन दृष्टं भगवदनुग्र
हपात्रत्वाभावादिति ४७॥

मधुभाष्य

४७॥

भाषा अनुवाद

भगवान श्रीकृष्ण जब ऐसे प्रार्थना किये गये तब अर्जुन को समझाते हुये तीनि श्लोक से यह कहने लगे कि हे अर्जुन तुम भय काहे लिये करते हो मै ने अति प्रसन्न होय अपनी योग माया की सामर्थ्य से यह अपना अपूर्व उत्तम रूप तुम को कृपा करि के देखाया है और इस तेजोमय विश्वात्मक आदि अन्त रहित मेरे रूप को तुमारे समान भक्त के विना कसी और भक्तने कभी भी नहीं देखा है ४७

चौपई

मैं प्रसन्न होय यह अर्जुन तोहि रूप दिखायो स्वयोग हूं सों
हिं तेजोमय विश्व अनंत रु आदि पूर्व न दृष्ट जो तें और न
यादि ४७ ॥

न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न
तपोभिरुग्रैः एवंरूपः शक्य अहं नृलो
के द्रष्टुं त्वदन्येन कुरुप्रवीर ॥ ४८

शाङ्करभाष्यटीका १

आत्मनो मम रूपदर्शनेन कृतार्थ एव त्वं संवृत्त इति ततः
स्तौति न वेदेति न वेदयज्ञाध्ययनैर्न दानैश्चतुर्णामपि वेदा-
नामध्ययनैर्यथावत्यज्ञाध्ययनैश्च वेदाध्ययनेनैव यज्ञाध्य
यनस्य सिद्धत्वात् पृथक्यज्ञाध्ययनग्रहणं यज्ञविज्ञानोपल
क्षणार्थं तथा न दानैः तुलापुरुषादिभिर्नैव क्रियाभिरग्निहो
त्रादिभिः श्रौतादिभिर्नापि तपोभिरुग्रैश्चान्द्रायणादिभिरुग्रैः
घोरैः एवं रूपो यथा दर्शितं विश्वरूपं यस्य सोहमेवंरूपः
शक्यो न शक्यः अहं नृलोके मनुष्यलोके द्रष्टुं त्वदन्येन कुरुप्र
वीर ४८

आनन्दगिरिकृतटीका २

तस्यैवेन सुकृतं दर्शनं प्रपञ्चयते वेदाध्ययनात् पृथक्
यज्ञाध्ययन ग्रहणं पुनरुक्तेरयुक्तमित्याशङ्क्याह न वेदेति
न च वेदाध्ययन ग्रहणादेव यज्ञविज्ञानमपि गृहीतमध्य
यनस्यार्थावबोधान्तत्वादिति वाच्यं तस्यान्तरङ्गग्रहणान्त
या हेतोः साधितत्वादिति भावः श्लोकस्य तात्पर्यमसाहितक
रणे त्वमोसे न मदनुग्रहविहीनेनेति शेषः ४८

स्वामिकृतटीका ३

एतद्दर्शनमतिदुर्लभं लब्ध्वा त्वं कृतार्थोसीत्याह नवेदेति वे
दाध्ययनातिरेकेण यज्ञाध्ययनस्याभावात् यज्ञशास्त्रेन यज्ञवि
द्याः कल्पसूत्रायालक्ष्यन्ते वेदानां यज्ञविद्यानां चाध्ययनैरित्य
र्थः नच दानैर्न च क्रियाभिरग्निहोत्रादिभिर्नैवोग्रैस्तपोभिश्चान्द्रा
यणादिभिः एवंरूपोहं त्वत्तोन्येन मनुष्यलोके द्रष्टुं शक्यः अ
पितु त्वमेव केवलं मत्प्रसादेन दृष्टवान् कृतार्थोसीति ४८

पिशाचभाष्यटीका ४

१ श्री॰ गी॰ टी॰ प
158

नुवेदयज्ञैरध्ययनैर्यज्ञाध्ययनैः नवक्रियाभिः उग्रपरिवर्णाभिः ४८

रामानुजभाष्यटीका ५

अनन्यभक्तिव्यतिरिक्तैः सर्वैरपि साधनैर्यथावदवस्थितोऽहं द्रष्टुं न शक्य इत्याह नवेदेति एवंरूपो यथावस्थितोऽहं मयि भक्तिमतस्त्वत्तोऽन्येन एकान्तभक्तिरहितेन केनापि पुरुषेण केवलवेदयज्ञादिभिः द्रष्टुं न शक्यः ४८

अभिनवगुप्तकृतटीका ६

स्पष्टार्थ ४८

परमार्थप्रपाटीका ७

अथास्य दुर्लभत्वमाह नवेदैरिति वेदाङ्गादयः पत्तात्रसूमेधादयः अध्ययनं शास्त्रपठनं तैः नापि तल्लाभकृपादिदानैः नवक्रियाभिः श्रौतस्मार्तकर्मभिः नतपोभिः कृच्छ्रचान्द्रायणादिभिः नलोके मनुष्यलोके अनेकभूमौ त्वदन्येन द्रष्टुमशक्यः कुरुप्रवीरेति निर्भयत्वेऽपि भयोत्पत्तिरयुक्तेति सूचितं ४८

वनमालीटीका ८

एतद्रूपदर्शनात्मकमतिदुर्लभं मत्प्रसादलब्धं कृतकृत्यमपूर्वासि त्वमित्याह नेति वेदानामध्ययनैरक्षरग्रहणरूपैः तथा मीमांसाकल्पसूत्रादिद्वारा यज्ञानां वेदबोधितकर्मणामध्ययनैरर्थविचाररूपैर्दानैस्तुलापुरुषादिभिः क्रियाभिरग्निहोत्रादिश्रौतकर्मभिः तपोभिः कृच्छ्रचान्द्रायणादिभिः कायेन्द्रियशोषकैरेवंरूपोऽहं न शक्यः नृलोके मनुष्यलोके द्रष्टुं त्वदन्येन त्वंभूतमत्प्रसादस्तेन त्वद्विना कुरुप्रवीर शक्योऽहमिति विलक्षणविसर्गलोपश्छान्दसः प्रत्येकं नकारस्याभ्यासो निषेधपरः दार्ढ्याय ४८

कृसमवैजयन्तीटीका ९

मद्भक्तिं विनान्यैः साधनैरीदृशो मत्प्रसादोऽतिदुर्लभ इति इति इत्थं स्वस्वरूपस्य दुर्लभतामाह नवेदयज्ञाध्ययनैरिति वेदानां यज्ञानां च अध्ययनैः पदक्रमजटाद्यभ्यासरूपैः कल्पसूत्रादिद्वारा तदर्थविचाररूपैश्च नदानैः स्वेष्टभोग्यवस्तूनां समाप्तेभ्यो दानैः नक्रियाभिरग्निहोत्रादिकर्मभिः नतपोभिः कृ

कृच्छ्रचान्द्रायणादिभिरुग्रैर्देहशोषकत्वेन दुष्करैर्भक्तिरिक्तैः केवलै
रेभिर्वेदाध्ययनादिभिः हे कुरुप्रवीर कुरुवंशश्रेष्ठ त्वदन्येन यथा
साधनान्तरापेक्षारहितकेवलमद्भक्त्येकनिष्ठो राजर्षिः कुरूणाम्
तथा त्वमपि मद्भक्तासीति सूचितम् त्वदन्येन मद्भक्तिप्रभावात्
नोऽन्येन भक्तिरहितेन केनापि पुरुषेण नृलोके मनुष्यलोके इ
त्युपलक्षणं लोकमात्रेणाभिमतेन न स्वर्गलोकेऽप्येवं दर्शने दुर्ल
भम् देवाद्यप्यस्य रूपस्य नित्यं दर्शनकांक्षिण इत्युक्तत्वात् मनुष्य
लोकेऽत्रातिदुर्लभमिति सूचितं एवंरूपोऽहं द्रष्टुं न शक्यः शक्यो
हमिति वक्तव्ये विसर्गलोपश्छान्दसः प्रत्येकं नकाराभ्यासो नि
षेधदार्ढ्यार्थः चकारस्तूक्तसाधनान्तरसमुच्चायकः ४८

+ एतद्रूपदर्शनात्मकमतिदुर्लभं मत्प्रसादलब्धं कृतार्थ एवासि त्वमित्याह ॥

मधुसूदनीटीका: ९

+ [illegible] भयंकरं [illegible]
[illegible] भयनिमित्ताभावात् [illegible]
[illegible] विमूढभावो व्याकुलचित्तत्व [illegible]
[illegible] व्यपेतभीरपगतभयः प्रीतमनाश्च [illegible]
[illegible]
[illegible]
[illegible] वेदानावरणामप्य *मां
[illegible] गायत्ता लो
[illegible] तथा मीमांसाकल्पसूत्रादिज्ञागयज्ञाध्ययने
अध्ययनैरक्षरग्रहणरूपैः अध्ययनैरर्थविचाररूपैर्वेदयज्ञाध्ययने
वेदबोधितकर्मणामध्ययनैरर्थविचाररूपैः क्रियाभिरग्निहोत्रादिश्रौतकर्मभिः
दानैस्तुलापुरुषादिभिः क्रियाभिरग्निहोत्रादिश्रौतकर्मभिः कायेन्द्रियशोषकत्वेन दुः
तपोभिः कृच्छ्रचान्द्रायणादिभिरुग्रैः नृलोके मनुष्यलोके द्रष्टुं त्वदन्ये
करैः एवंरूपः अहं न शक्यः नृलोके मनुष्यलोके द्रष्टुं त्वदन्ये
न मदनुग्रहहीनेन हे कुरुप्रवीर शक्योऽहमिति वक्तव्ये विस
र्गलोपश्छान्दसः प्रत्येकं नकाराभ्यासो निषेधदार्ढ्याय नच
क्रियाभिरित्यत्र चकारादनुक्तसाधनान्तरसमुच्चयः ४८

सदानन्दीटीका: ११

एतन्मद्रूपमैश्वर्यं यदेतद्दृष्टं सुदुर्लभं कृतार्थोऽसि त्वमित्याह
नैतल्लभ्यं वरैर्नृभिः १ अध्ययनेन वेदानां वेदार्थस्य विचार
तोः तुलापुरुषादिदानैः श्रौतकर्मभिरप्युत २ कृच्छ्रादिभि

२ श्री गी टी ० प

159

स्तपोभिर्वा उग्रैर्देहशोषकैः एवंरूपो न शक्योऽहं त्वदन्येन म-
हीतले २ द्रष्टुं कुरुकुलश्रेष्ठ मदनुग्रहमंतरा ४८

नीलकंठी टीका ४८

योगैकगम्यमेतत्कस्मिंश्चिदपि नास्तीत्याह नवेदेति वेदानां या-
ज्ञानां च अध्ययनैरधिगमैः न च दानैः न च क्रियाभिः स्वस्वकर्मा-
भिराष्ट्रर्तादिभिर्वापीकूपारामादिभिः तपोभिः कृच्छ्रचांद्राय-
णाद्यैः उग्रैः मासोपवासाद्यैः नृलोके एवंरूपोहं द्रष्टुं न शक्यः
रोकत्वाभावश्चार्थः त्वदन्येन कुरुप्रवीर ४८

कोस्य स्वरूपस्येत्याह ॥ ज्ञानेश्वरी टीका ॥ यस्त्वेनं विधमेनं योगं न प्राप्तः स द्रष्टुमश-
शक्य अहमिति ज्ञान समाधिः ४८

वर्तितिकृत्वेनास्य पारमेश्वरस्वरूप रामकंठी टीका स्यद्रष्टुमशक्यत्वादतएवाह ॥
वेदानां यज्ञानां वा द्वन्द्वात् अधिगमवद्धत्वमधिगमशब्देन वाध्ययन
श्रवणादयो गृह्यन्ते श्रुतिपादिताः दानक्रियातपश्शब्दैस्तदनुष्ठा-
ने क्रियाशब्देनानुष्ठीयमानब्रह्मचर्यादिकर्मविशेषवाचकः
एतच्चैवंविधमदाचारस्यावस्थितैरपि परज्ञानसूक्ष्मत्वादशक्यदर्-
शनमेतत्परमैश्वर्यं रूपं मदनुग्रहादेवोन्मीलितदिव्यचक्षुषा तया
दृष्टं तेनाभयमोहादीनां कोवसरः प्रत्युत मत्स्वरूपनिष्ठा तु संथा
तावदितात्मनानयानेदेवसमतेत्यभिप्रायः ४८

+ किंच कालरूपसंवलितस्य विश्वा-
त्मकस्य दर्शनं मनुष्यलोके शक्यमित्याह ॥

यतानां लासिकी

नवेदानां चतुर्णां यज्ञविद्यानां कल्पसूत्रादीनां अध्ययनैर्नच दा-
नैर्न च क्रियाभिरग्निहोत्रादिभिः न चाग्रैः कायेंद्रियशोषकैस्तेनत्व-
त्तो मनुष्यलोके त्वदन्येन द्रष्टुं शक्यः एवंरूपः कालरूपसंवलितोहमी
कुरुप्रवीरेति सामर्थ्यं स्तवकमामंत्रणम् अतोदिमन्यथः परिछिन्न
भयानकवस्तुदर्शनादेवमहत्ता प्राणानां नाशात् तत्र शोभावाना
त्तकापुनः कथा स्पर्शनस्य वस्तुनः ४८ ॥ शक्योहमितिवक्तव्ये विसर्गलोपश्च

ति

पंचोलीटीका

एतद्दर्शनमतिदुर्लभं लब्ध्वात्वं कृतार्थोसीति स्तवन्नाह नवेदे॰
ति हे कुरुप्रवीर अहं नृलोके मनुष्यलोके एवंरूपः दर्शितरूपवद
न्येन द्रष्टुं न शक्यः नवेदयज्ञाध्ययनैः चतुर्णामपि वेदयज्ञाध्ययनै
र्यज्ञावेदानां यज्ञविद्यानां कल्पसूत्रादीनां चाध्ययनैः नचक्रियाभि
र्नदानैस्तपोभिरुग्रैर्घोरैस्तपोभिश्चान्द्रायणादिभिरहं द्रष्टुं न शक्यः

४८

रामवीरसमिद्बोधिनी

किंच कुरुप्रवीरेति कुरुषु मध्ये प्रकर्षेण वीरो विक्रान्तो यस्तस्य
संबोधनं अहं नृलोके मनुष्यलोके एवंरूप एवंप्रकाशितवि
श्वरूपोहं द्रष्टुं साक्षात्कर्तुं लब्धुं शक्यो त्वदन्येन त्वत्तोन्येनाभक्ते
न नु याकश्चेति ननु ये हि वेदादिकाविद्या वेदान्तावीकुर्वन्ति यज्ञांश्चत
दीर्घैरेव मंत्रब्राह्मणैः प्रतिपादयंति तदध्ययनं च चतुर्वर्गफलसा
धनत्वावगमात् कुर्वन्तीति वेदाध्ययनस्य मोक्षं प्रतिसाधनत्वं सूवि
तमिति तथाच ये दानशीला दानैरेवात्मानं संभावयंतः एतत्कर्म
कुर्वन्ति तेच फलसाधनत्वावधारणात् एवं दानसाफल्यं वन्तीति
दानशीलस्यापि मोक्षं प्रत्यधिकारित्वं सूचितमिति एतत्तद्रूपाभिर्वे
दाध्ययनपूर्वकयज्ञदानक्रियाभिस्तपोभिर्घोरैः कर्मभिश्च
किं नैवं रूपोहं द्रष्टुं शक्योपि तत्प्रकार एवेति किमनेन यन्मे त्वदन्येन
न द्रष्टुं शक्यः इत्याशंक्याह नवेदेति एवंरूपो विश्वरूपोहं न वे
दैः सर्वैः क्रियाभिर्द्रष्टुं शक्यो भगवद्भक्तेरभावादि
ष्टैर्नापि यज्ञदानादिभिः
तिभावः ४८॥

अथ भाष्य

भाषा अनुवाद

और यह अति दुर्लभ दर्शन पायके तुम अब कृतार्थ भये
हो सोई कहते हैं कि न वेद अध्ययन से न यज्ञ अध्ययन
करके यज्ञविद्या जो कल्पसूत्र आदि कर्मकाण्ड के अर्थ सूत्र
हैं किये ग्रन्थ तिन से अर्थात् न यज्ञविद्या ध्यायन से और
दानन् न से न अग्निहोत्र आदि क्रियों से न चान्द्रायण आदि उग्रक
हे कठिन तपस्यों के द्वारा यह मेरा रूप नरलोक में देख
ने के शक्य है सो हे कुरुप्रवीर अर्जुन तुम को छोड़ि और
कोई नहीं नरलोक में इस रूप को देख शका है सो तुम मे
रे अनुग्रह से इस मेरे रूप का दर्शन करि अपने को कृता
र्थ भये जानो ४८

चौपई

वेद न यज्ञ पठन दान हि सोई क्रिया किये तप उग्र हि जो
है मैं नरलोक न पाको यह रूप हि कुरुप्रवीर तो हि अ
न्यत्र दर्शाहि ४८ ॥

माते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोर
मीदृङ्ममेदं व्यपेतभीः प्रीतमनाः पुनस्त्वं
तदेव मे रूपमिदं प्रपश्य ४९

शाङ्करभाष्यटीका १

माते व्यथेति माते व्यथा मा भूत्ते भयं मा च विमूढभाव विमूढ
चित्तता दृष्ट्वोपलभ्य रूपं घोरमीदृक् यथा दर्शितं ममेदं व्यपे
तभीर्विगतभयः प्रीतमनाश्च सन् पुनर्भूयस्त्वं तदेव चतुर्भुजं रू
पं शङ्खचक्रगदाधरं तवेष्टं रूपमिदं प्रपश्य ४९

आनन्दगिरिकृतटीका २

विश्वरूपदर्शनमेवं स्तुता यदस्माद्दृश्यमानाद्बिभेषि तर्हि तदु
पसंहरामीत्याह माते व्यथेति वक्तृत्वमनुभूतवदभिप्रायं
तदेव मत्कं इदमिति ४९

स्वामिकृतटीका ३

एवमपि चेत् तवेदं घोरं रूपं दृष्ट्वा व्यथा भवति तर्हि तदेव रूपं
दर्शयामीत्याह माते इति ईदृक् ईदृशं घोरं रूपं दृष्ट्वा ते व्यथा
मास्तु विमूढभावो विमूढत्वं च मास्तु व्यपगतभयः प्रीतमना
श्च सन् पुनस्त्वं तदेवेदं मम रूपं प्रपश्य प्रकर्षेण पश्य ४९

पिशाचभाष्यटीका ४ ॥ ॥

स्पष्टार्थम् ४९ ॥

रामानुजभाष्यटीका ५

माते इति ईदृशघोररूपदर्शनेन ते या व्यथा यश्च विमूढभावो
वर्तते तदुभयं मा भूत् त्वयाभ्यस्तपूर्वमेव सौम्यरूपं दर्शयामि
तदेव मम रूपं प्रपश्य ४९

अभिनवगुप्तकृतटीका ६ ॥ ॥

स्पष्टार्थम् ४९ ॥

परमार्थप्रपाटीका ७

अत एवाह माते व्यथेति ईदृग्घोरं भयानकं मे रूपं दृष्ट्वा ते व्यथा
भङ्गुरत्वं [illegible] विमूढभावो भ्रान्तत्वं मास्तु अतः परं व्यपेतभीः प्रीत-
मनाः सन् तदेव पूर्वानुभूतं पुनः प्रपश्य ४९

वनमालीटीका ८

१ श्री॰
गी॰टी॰
प

162

इदं घोरमीदृगनेकबाह्वादियुक्तत्वेनातिभयंकरं मम रूपं दृ॰
ष्ट्वा स्थितस्य ते तव या व्यथा भयनिमित्ता पीडा सा मा भूत् तथा म॰
द्रूपदर्शने पि यो विमूढभावो व्याकुलचित्तत्वमपरितोषात्स्व॰
तो भक्तो पि मा भूत् किंतु व्यपेतभीरपगतभयः प्रीतमना प्रस॰
न्नः पुनस्त्वं तदेव चतुर्भुजं वासुदेवाख्यं त्वया सदा परिचितं रूपं प्र॰
पश्य भयराहित्येन संतोषेण च प्रपश्य ४९

नानावैजयन्तीटीका ४

शेषयोः प्रथमार्जुनवीक्षापितृत्वमेव स्थितायेस्सर्वे धर्मज्ञाश्च पि॰
भीष्माद्यस्तेन द्वर्षेण प्रकुपितेन मयैव हन्तव्या न वत्तन्निहन्तेने
न को पि भारो ऽस्तीति बोधयितुं मया इदमतिघोरं जगत्संहाररूपं
दर्शितं यदेतद्दृष्ट्वा तव व्यथा भीतिर्हि तदेव चतुर्भुजरूपं प्रपश्य
माहमानेव्यथेति मेदमीदृक् ग्रसहस्रबाहुशीर्षकादिप्रकार
केघोरमतिभयंकरं रूपं दृष्ट्वा मा ते तव व्यथा तद्दर्शनजभय॰
निमित्तपीडा जाता सा मा मा भूत् च पुनर्यत्तद्दर्शनेन विमूढ
भावो व्याकुलचित्तत्वेनापरितोष स्तो पि मा भूत् व्यपेतभीःनि
र्भयः प्रीतमनाः प्रसन्नचित्तः सन् त्वं पुनर्भूयो मे मम तदेव त्व
सारथिभूतं द्विभुजं चतुर्भुजं वा रूपं विग्रहं प्रपश्य प्रकर्षेणाति
हर्षेणावलोकय ४९

एवं त्वदनुग्रहार्थमाविर्भूतेन
रूपेणानेन चेत्त्वं वोद्वेगमस्तर्हि

मधुसूदनीटीका ९

इदं घोरमेतादृक् अनेकबाह्वादियुक्तत्वेन भयंकरं मम रूपं दृष्ट्वा
स्थितस्य तेन व[illegible] व्यथा भयनिमित्ता पीडा सा मा भूत् तथा म
द्रूपदर्शने पि यो विमूढभावो व्याकुलचित्तत्वमपरितोषः सो
पि मा भूत् किंतु व्यपेतभीरपगतभयः प्रीतमना प्रसन्नः पुन
स्त्वं तदेव चतुर्भुजं वासुदेवत्वादिविशिष्टं त्वया सदा पूर्वं दृष्टं रू
पमिदं विश्वरूपापसंहारेण प्रकटी क्रियमाणं प्रपश्य प्रकर्षे
णभयराहित्येन संतोषेण च प्रपश्य ४९

सनातनीटीका ११

मा ते भयनिमित्ते पीडा भूत्मा विमूढता इदं घोरं मह रूप
मीदृक् अतिभयंकरं । दृष्ट्वा सर्वात्मकं नानाकारयुक्तं मे मे व

रं निर्भयो भव प्रीतात्मा पुनस्त्वं पश्य मद्वपुः तदेववक्त्रनश्ण
मंचतत्वांकं श्रियोज्वले ४९

नीलकंठीटीका ५२

इदमतिदुर्लभदर्शनं रूपं दृष्ट्वापि चेदमुष्य सेनहि उपसंह
रामीदमिमाशयेनाह मातेइति ममइदंईदृक् घोरं रूपं
दृष्ट्वा ते तव व्यथा माभूदिति शेषः विमूढभावो मोहश्च ते
माभूत् व्यपेतभीः निर्भयः प्रीतमनाश्च पुनस्त्वं भूत्वा तदेव
यत्त्वया दृष्टं प्रार्थितं मे मम मेदं रूपं प्रपश्य ४९

आनंदीटीका स्पष्टार्थं

[illegible] ४९

रामकंठीटीका

घोरं कालपुरुषाद्याकृतियोगादुग्रं संहारकर्मणामाशिष्टं स्पष्टम् ४८

लालिकी[illegible]टीका

मम ऐश्वरस्य रूपं मोहग्रिषवात्मकमिदं तव दृष्ट्वा भूतं घोरं कालपुरुषा
कृतियोगादुग्रं कारं दृष्ट्वा मत्तस्तव व्यथा भयं मास्तु विमूढभावो मो
हेनस्त्वत्वताच मास्तु भयंकरं दर्शनेहि वीरस्यापि व्यथास्त्वतु तयोरम
नस्त्वं तत्वैव विगतभयः प्रीतमना त्वत्वाभाविनममत्वं वतासे त्वं पुनः
तदेवैश्वररूपदर्शनात्प्राग्दृष्टं चतुर्भुजत्वादिलक्षणामिदं परिचिन्त्तते
नेदं तया पुरो भासमानं मे श्रीकृष्णस्य रूपं प्रपश्य सम्यक्त्वमापि सं
स्कारमवधूय इष्टमहीभव [illegible] ४९

पंचोलीटीका

यदा एवमिदं घोरं रूपं दृष्ट्वा ते व्यथा जायते नहि तदेव प्रागनुभू
तं रूपं दर्शयामीत्याह मातेव्यथेति हे अर्जुन मम इदानीं ईदृक्
रूपं घोरं दृष्ट्वा ते तव व्यथा भयं माभूत् मा च विमूढचित्तताभू
त् व्यपेतभीः विगतभयः प्रीतमनाः पुनस्त्वं तदेव चतुर्भुजं शंखच
क्रगदापद्मधरं तवेष्टं मे मम इदं रूपं प्रपश्य ४९

रानावीरसमसिद्धेपिनी ।।

इदानीमेतादृग्घोररूपदर्शनेन मास्तु ते व्यथेत्याह मा ते इ
ति ममेदं दृश्यमानं घोरं विश्वाकारं रूपमीदृग्यथा दर्शितं
कं मया दर्शितं संप्रति दृष्ट्वा ते व्यथा भयं चलनं वा मास्तु अ
थवा विमूढभावश्च मूर्छितत्वमपि मास्तु किं तर्हि पुनर्मू
यपवस्तु तेदं रूपं तदेव तद्भावेनैव पश्य साक्षात्कुरु तत्स्व
त्वाच्च प्रीतमनाः संस्तु रूपस्य हर्षजनकत्वात् तथापि व्यपीतभी
र्भव संत्यक्तशोकमोहो भवेति वरदानतस्तस्मिनो भगवदनुग्र
हः सिद्ध इति ४९ ।।

मधुभाष्य

४९

भाषा अनुवाद

जो ऐसा घोर भयानक रूप देखि तुम को क्लेश होता है तो जिसमे तुमे मेरा रूप देखि व्यथा औ मूढता न होय इस से अब तुम विगतभय प्रसन्नचित्त होय फेरि हमारा सोई वह पूर्व रूप जो देखा चाहते हौ सो देखो ४९

चौपई

ना तोहि व्यथा न मूढता होई घोर रूप मोहि देखे सोई भय कर विगत हर्ष मन होउ फिर देव रूप मोहि देखहु सोउ ४९॥

संजयउवाच इत्यर्जुनंवासुदेवस्तथोक्त्वास्व
कंरूपंदर्शयामासभूयः आश्वासयामास
चभीतमेनंभूत्वापुनःसौम्यवपुर्महात्मा ५०

शांकरभाष्यटीका १

इत्यर्जुनमिति इत्येवमर्जुनं प्रति वासुदेवस्तथाभूतं वचनं उ
क्त्वा स्वकं वसुदेवगृहे जातं रूपं दर्शयामास दर्शितवान् भूयः
पुनराश्वासयामास चाश्वासितवान् भीतमेनंभूत्वापुनःसौम्य
वपुःप्रसन्नदेहोमहात्मा ५०

आनन्दगिरिकृतटीका २

प्रसक्तयोग्यत्वं तदिदं वृत्तं राज्ञे सूतोनिवेदितवानित्याह सञ्ज
य इति तथाभूतं वचनं मया प्रसन्नेनेत्यादि चतुर्भुजं रूपं किंत
स्य रूपस्य परिचितपूर्वस्य^ प्रसन्नदेहत्वेन चार्जुनं भयादाश्वासनं ^प्रदर्शनेन^
व^ भगवतोयुक्तमित्यत्र हेतुमाह महात्मेति ५०

स्वामिकृतटीका ३

एवमुक्त्वाप्राकृतमेवरूपंदर्शितवानिति संजयउवाच इतीतिश्री
वासुदेवोऽर्जुनमेवमुक्त्वायथारूपमासीत् तथाकिरीटादियुक्तंच
तुर्भुजंरूपंपुनर्दर्शयामास एवमर्जुनंभीतमेवंप्रसन्नवपुर्भूत्वापु
नराश्वासितवान्महात्माविश्वरूपःकृपालुरितिवा ५०

पिशाचभाष्यटीका ४ ॥ ॥

स्पष्टार्थं संजय^उवाच^ ५०

रामानुजभाष्यटीका ५

संजयउवाच इतीतिएवंपाण्डुतनयंवासुदेवस्तूक्त्वाभूयःस्व
कीयमेवचतुर्भुजंरूपंदर्शयामास अपरिचितरूपदर्शनेनभीत
मेनंपुनरपिपरिचितसौम्यवपुर्भूत्वाश्वासयामासचमहात्मासत्य
संकल्पस्यसर्वेश्वरस्यपरमपुरुषस्यपरब्रह्मणोजगदुपकृतमर्त्य
स्यवसुदेवसूनोश्चतुर्भुजमेवस्वकीयरूपंकंसभीतवसुदेवप्रा
र्थितेनकंसवधात्पूर्वंभुजद्वयमुपसंहृतंपश्चादाविःकृतंवज्ञा
तोऽसिदेवदेवेशशंखचक्रगदाधरदिव्यंरूपमिदंदेवप्रसादेनोप
संहरउपसंहरसर्वात्मन्रूपमेतच्चतुर्भुजमितिहिप्रार्थितंपितृ

श्री॰
गी॰ टी॰
१

पालस्यापि द्विषतोऽनवरतभावनाविषयं चतुर्भुजमेव वसुदेवसू-
नो रूपं उदारपीवरचतुर्बाहुं शंखचक्रगदाधरमिति अतः पार्थेनानेनै-
व रूपेण चतुर्भुजेनेत्युच्यते ५०

अभिनवगुप्तकृतटीका १

स्पष्टार्थम् ५०

परमार्थप्रपाटीका ७

पुनः संजय इति इत्युक्त्वा प्रकारं वासुदेव उक्त्वा स्वकं रूपं चतुर्भु-
जं दर्शयामास ५०

वनमालीटीका ८

वासुदेवोऽर्जुनेनोत्थं सुहृत्सख्यवत् क्रियते प्रकाश्यत इति स्वकं स्व-
स्वरूपं विश्वरूपं ज्ञानतोऽस्य वन्नप्रकाशयति पुनर्रूपेण नतो वि-
श्वरूपं स्वयंप्रकाशयति रूपेण परापरत्वेचाधिकारिणमपेक्ष्य
भगवद्रूपे पुरातनस्याभावात् यद्वा स्वकं स्वकीयमर्जुनीयं सदा-
र्जुनसेव्यं शंखचक्रगदादियुक्तं दर्शयामास भूयः आश्वासयामा-
स च भीतमेनमर्जुनं भूत्वा पुनः पूर्ववत् सौम्यवपुः सुग्रहशरीरः
महात्मा परमकारुणिकः सर्वेश्वरः सर्वज्ञ इत्यादिकल्याणगुणाकरः ५०

गतमवैजयन्तीटीका ९

एवमपरिचितरूपदर्शनेन व्याकुलचित्तमर्जुनमुक्त्वा भगवांस्त-
त्परिचितमेव स्वकं रूपं तं दर्शितवानिति संजयो धृतराष्ट्रमुवाच
इत्यर्जुनमिति वासुदेवो वसुदेवपुत्र इत्येवमर्जुनमुक्त्वा तथा
स्वयं कल्पेनैव विश्वरूपदर्शितवान् तथैव भूयः पुनरपि स्वकमेव
श्यामं पीताम्बरधरं किरीटकुंडलकटकांगदकौस्तुभहारकटिसूत्र-
नूपुराद्यनेकभूषणभूषितं शंखचक्रगदापद्मोपशोभितमरविं-
दरीकनयनं स्मयमानमुखं चतुर्भुजं निजं रूपं चतुर्भुजविग्रहं
दर्शयामास पुनः सौम्यवपुरतिकारुण्यापवात्सल्यशान्तिकांत्या-
दिगुणपुष्कशरीरो भूत्वा महात्मा सुदारमनाः इत्यनेन भगवतः
स्वयं न स्थितिमहत्त्विकत्वेपि भक्ताधीनविग्रहत्वं सूचितं भीत-
मपरिचितघोराकारदर्शनेन भययुक्तमेनमर्जुनमाश्वासया-
मास हे पार्थ त्वं मम सि मत्तस्तव भयं नास्ति स्वसारथिं मामवलोक-
येत्यादिनम्रवचनेनाश्वासितवान् चकारेण सर्वेश्वरस्य भगव-
तोऽयं प्रतीदृशी क्रिया तस्यैव विजयस्य विजयो भविष्यतीत्युक्ता-
दयः कृपाः सर्वेऽन्तापवेत्सदेमन्मेत्वमपि मम त्वमपि मत्यबेति

°मित्रम

165

द्योतितम् ५०

मधुसूदनीटीका ५०

वासुदेवोऽर्जुनमितिप्रागुक्तमुक्त्वा यथापूर्वमासीत् तथास्व
कं रूपं किरीटमकरकुण्डलगदाचक्रादियुक्तं चतुर्भुजं श्री
वत्सकौस्तुभवनमालापीताम्बरादिशोभितं दर्शयामास भू
यः पुनः आश्वासयामास च भीतमर्जुनमेनं भूत्वा पुनः पूर्वव
त्सौम्यवपुरत्युग्रशरीरः महात्मा परमकारुणिकः सर्वेश्वरः स
र्ववेत्तृत्वादिकल्याणगुणाकरः ५०

सदानंदटीका ११

इत्येवमर्जुनं प्रोक्त्वा स्वकीयं रूपमीश्वरः किरीटिनं गदाशंखच
क्रादियुतमद्भुतं चतुर्भुजं च श्रीवत्सकौस्तुभप्रभयान्वितं
वनमालापरीतांगं हारकेयूरशोभितं २ पीताम्बरपरस
वसौंदर्यरसवारिधिं दर्शयामास भीतं तं भूत्वा सौम्यवपु
र्हरिः पुनराश्वासयामास पूर्ववत्करुणाकरः सर्वज्ञः सर्व
शक्तिश्च कल्याणगुणसागरः ५०

नीलकंठीटीका २२

संजय उवाच इतीति वासुदेवः अर्जुनंप्रति इति पूर्वोक्तरी
त्या उक्त्वा यथापूर्वमासीत्तथा स्वकं मानुषरूपं भूयः पुनर्दर्श
यामास यदर्जुनेन प्रार्थितं चतुर्भुजं धारणाविषयं रूपं तद
पितिरोदधे इत्यर्थः तथा महात्मा व्यापकोऽपि सन् सौम्यव
पुरत्युग्रदेहो भूत्वा भीतं एनं आश्वासयामास च ५०

आनंदटीका स्पष्टार्थं

अथैतद्धृतराष्ट्रंप्रतिसंजय
उवाच ५०

रामकंठीटीका

अथैतद्धृतराष्ट्राय संजय उवाच किं तु महात्मा विश्वरूपः सन्सौ
म्यवपुः पुनः प्राकृतपुरुषविग्रहात्मदर्शनाकृतिर्भूत्वा भगवाने
नमस्त्वं तथाविधाद्भुतदर्शनसंत्रस्तचित्तं वद समाश्वासनप्रत्याश्वा ५०
सयदिति तात्पर्यं

श्री
गी टी॰
प

१६

संजयउवाच

लासकी [illegible]टीका

एवंवासुदेवउक्त्वाअर्जुनेयथापूर्वंदृष्टं तथास्वकंरूपंकिरीटादि
युक्तंभूयोदर्शयामासएवंतेनभगवता अर्जुनस्तत्रापतिस्म भ
गवांस्तत्रप्रयोजकोभूदित्यर्थः समहात्माविश्वरूपः श्रीकृष्णः
कालरूपोपसंहारेणसमाधिसंस्कारनिरस्तेनचसौम्यवपुःस
दर्शितनिर्भूता एवंभीतमर्जुनंपुनर्वेदमागोनप्रकारेणाश्वा
सयामासच सांत्वयामासच [illegible]

५०

पंचोलीटीका

एवमुक्तायोक्तंतमेवस्वरूपंदर्शितवानिति संजयउवाच इत्य
र्जुनमितिवासुदेवःअर्जुनंतथेतितथाभूतंवचनमुक्त्वाभूयः
पुनरपिस्वकेरूपंवसुदेवगृहेजातंदर्शयामासचपुनःमहा
त्मापुनःसौम्यवपुर्भूत्वाएनंभीतमाश्वासयामास ५०

वराणवीरसमिद्धोथिनी॥

एतदेवहृतांतंधृतराष्ट्रंप्रतिसंजयउवाच इत्यर्जुनमि
ति स्पष्टार्थः ५०॥

मधुभाष्य

५०॥

भाषा अनुवाद

ऐसे वचन कहि कर भगवान ने अर्जुन को वही पूर्वरूप अपना देखाया यह सञ्जय धृतराष्ट्र से कहते हैं कि महात्मा वासुदेव श्रीकृष्णजी ने अर्जुन को सोई चतुर्भुज किरीटधारी अपना शान्त स्वरूप फेरि देखाया और डरे भये अर्जुन को आश्वास दिया ५०

चौपई

वासुदेव कहि नरको ऐसे फिर निजरूप दिखायो तैसें
अस्तभय कहूं करी आश्वासा भय पुन सौम्य रूप जगवासा
५०॥

अर्जुन उवाच दृष्ट्वेदं मानुषं रूपं तव सौम्यं जना
र्दन इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः
५१

शाङ्करभाष्यटीका १

दृष्ट्वेदमिति दृष्ट्वेदं मानुषं रूपं मत्सखं प्रसन्नं तव सौम्यं
जनार्दनेत्यर्दतेर्गतिकर्मणः सर्वाणां देवप्रतिपक्षजनानां श
मण वियोगजनकत्वार्थप्रयोजनं सर्वैर्जनैर्याच्यत इति वा रम
णीयत्वाद्वा जनार्दनः अभ्युदयनिःश्रेयसपुरुषार्थाय इदानीमधु
नास्मि संवृत्तः संजातः सचेताः किं प्रसन्नचित्तः प्रकृतिं स्वभावं
गतश्चास्मि ५१

आनंदगिरिकृतटीका २

एवं भगवदाश्वासितः सन्नर्जुनस्तं प्रत्युक्तवानित्याह अर्जुन इ
ति ५१

स्वामिकृतटीका ३

ततो निर्भयः सन् अर्जुन उवाच दृष्ट्वेदमिति सचेताः प्रसन्नचि
त्तः इदानीं संवृत्तो जातोस्मि प्रकृतिं स्वास्थ्यं च प्राप्तोस्मि शेषं स्पष्टं
सुकृतस्यानुग्रहस्यातिदुर्लभं दर्शयन् ५१

पैशाचभाष्यटीका ४

अर्जुन उवाच दृष्ट्वेदमिति इदं परं प्रामिकारणं ५१

रामानुजभाष्यटीका ५

अर्जुन उवाच दृष्ट्वेति अनवधिकातिशयसौन्दर्यसौकुमार्य
लावण्यादियुक्तं तवैवासाधारणं मनुष्यत्वसंस्थानस्थितमति
सौम्यमिदं रूपं दृष्ट्वा इदानीं सचेताः संवृत्तोस्मि प्रकृतिं गतश्च ५१

अभिनवगुप्तकृतटीका ६ ॥ ॥

स्पष्टार्थम् ५१ ॥ ॥

परमार्थप्रपाठीटीका ७

पुनरर्जुनः प्राह दृष्ट्वेदमिति मानुषं मनुष्ये ईदृग्योग्यं सचेताः
प्रसन्नचित्तः संवृत्तो जातोस्मि प्रकृतिं स्वास्थ्यं च गतोस्मि ५१

वनमाली टीका ८

इदानीं सचेता भयकृत[illegible]व्यामोहाभावेनाव्याकुलचित्तः सं

१
श्री॰
गी॰ टी॰
५

वृत्तोस्मि तथाप्रकृतं भयकृतव्यथारहितेन स्वास्थ्यं गतोस्मि स्पष्टमन्यत् ॥५१॥

हनुमच्चैतन्यटीका ५

भगवतस्सौम्यरूपादर्शनात्तदाश्वासनाच्च निर्भयः शांतचित्तः सन्नर्जुन उवाच दृष्ट्वेदमिति हे जनार्दन त्वदीयं सन्तं इष्टजनात् हे बान्धवजनात्तस्मात् तिष्ठत्येव तिष्ठति तव विश्वरूपस्यानंतविभूतिपतेः सर्वस्वरस्येदं मनेत्रविषयभूतं सौम्यमतिरवयिकातिशयसौंदर्यसौकुमार्यसौहार्दसौगन्ध्यसौस्पर्शसौशील्यसौरस्यलावण्यमनोज्ञतादिगुणविशिष्टमानुषं मानुष्यत्वसंस्थानं स्थितं रूपं देहं दृष्ट्वेदानीमद्य सचेताः प्रसन्नचित्तः भयकृतव्यामोहाभावेनाव्याकुलचित्त इत्यर्थः संवृत्तोस्मि जातोस्मि तथाप्रकृतिं गतः भयकृतव्यथारहितेन स्वास्थ्यं प्राप्तोस्मि एवं मया प्रसन्नेन तवात्मनेदं न वेदयज्ञाध्ययनैर्न दानैरिति द्वाभ्यां स्वस्य विश्वविग्रहस्य दुर्दर्शत्वमुक्त्वा मधुनास्य दुर्दर्शमिदमित्यादिना मत्कर्मकृदित्यन्तेन स्वकस्य मानुषविग्रहस्यापि सुदुर्दर्शत्वं दर्शयन् ॥५१॥

ततो निर्भयः सन् — मधुसूदनीटीका १०

इदानीं सचेताः भयकृतव्यामोहाभावेनाव्याकुलचित्तः संवृत्तोस्मि तथाप्रकृतिं भयकृतव्यथारहितेन स्वास्थ्यं गतोस्मि स्पष्टमन्यत् [illegible] ॥५१॥

सदानंदी टीका ११

ततोसौ निर्भयो भूत्वा वाक्यमाहार्जुनो हरिं दृष्ट्वेदं सौम्यरूपं तेवासुदेवाभिधं परं । इदानीं निर्भयो भूत्वा स्वास्थ्यं प्राप्यात्मनो गतः ॥५१॥

नीलकंठीटीका १२

ततो निर्भयः सन्नर्जुन उवाच दृष्ट्वेति सचेताश्चाव्याकुलः प्रकृतिं गतः स्वास्थ्यं प्राप्तः संवृत्तो जातोस्मि ॥५१॥

ततो निर्भयः सन्नर्जुन उ आनंदीटीका स्पष्टार्थः

[illegible] वाच ॥५१॥

वाच स्पष्टमेतत् ॥५१॥ [illegible] रामकंठीटीका ॥ एवं स्वस्थ्यागतप्रकृतिरर्जुन उ ॥५१॥

लासकी [illegible]टीका

ततःसम्यग्व्यक्तितोऽर्जुन
उवाच हेजनार्दनतेपुरःस्फुरत्सौम्यंसुदर्शनंमानुषंरूपंतवदृष्ट्वाइदानीयुक्ता
त्मानेप्रकृतिंस्वस्वभावंजीवद्रूपंगतःप्राप्तःसन् सचेतास्वंतःकरणान्
वितोऽहंसंवृत्तःसंपन्नः [illegible] ५१

पंचोलीटीका

ततोनिवर्त्यमानभयोऽर्जुनउवाच दृष्ट्वेदमिति हेजनार्दनतवे
दंसौम्यंमानुषंरूपंदृष्ट्वाइदानीमधुनासचेताःप्रसन्नचित्तःसंवृत्तः
संजातःप्रकृतिंस्वभावंगतश्चास्मि ५१

शुणवीरसमिद्धोधिनी॥

एवंभगवतोऽत्यद्भुतंरूपंदृष्ट्वाजाताह्लादोऽर्जुनउवाच दृष्ट्वेदमि
ति अत्रजनार्दनेतिसंबोधनमनिशनिहतीशपतिसाधनत्वा
त तवेदंमानुषं मनुष्यावतारकं सौम्यमाह्लादकंस्वरूपंदृष्ट्वेदानी
मेवसंवृत्तःस्वधर्मेप्रवृत्तःस्वधर्मस्यैवभगवद्भक्तिमूलत्वमोदं
प्रतिसाधनत्वावधारणादित्येतादृशोऽहंसचेताः चेत्यतेस्वभा
वोऽनेनेतिचेतः स्वभावसंवितेनसहवर्त्ततेइतितत्संवित्त्यैवप्र
कृतिंसहजतांगतः संशयसमस्वस्वभावइतियावदिति ५१॥

मधुभाष्य

५१॥

169

भाषा अनुवाद

तिसके अनन्तर निर्भय होय अर्जुन ने कहा कि हे जनार्द
न तुमारा यह शान्त मनुष्य स्वरूप देखि मै अब प्रसन्नचित्त
औ सावधान भया हौं ५१

दोहा

स्वधर्मस्थित
मनुज रूप यह देषके सौम्य जनार्दन तोर
अब में भयो स्वाभावक चितमोर ५१

श्रीभगवानुवाच सुदुर्दर्शमिदं रूपं दृष्टवा
नसि यन्मम देवाअप्यस्य रूपस्य नित्यं दर्श
नकांक्षिणः ५२ शांकरभाष्यटीका १

सुदुर्दर्शमिति सुदुर्दर्शं सुष्टु दुःखेन दर्शनमस्येति सुदुर्दर्श
मिदं रूपं दृष्टवानसि यन्मम देवादयोऽप्यस्य मम रूपस्य नि
त्यं सर्वदा दर्शनकांक्षिणो दर्शनेप्सवोऽपि न त्वमिव दृष्टवन्तो न
द्रक्ष्यन्ति चेत्यभिप्रायः ५२ आनन्दगिरिकृतटीका २

उपासनाय विश्वरूपं स्तौति भगवद्भक्तिं उत्थापयति भग
वानिति त्वद्व्यतिरिक्तानामिदं रूपं द्रष्टुमशक्यमित्येतद्विशद
यति देवादय इति ५२ स्वामिकृतटीका ३

यन्मे विश्वरूपं दृष्टवानसि तत्सुदुर्दर्शमत्यंतं द्रष्टुमशक्यमतो दे
वाअप्यस्य रूपस्य दर्शनमिच्छंति केवलं न पुनरिदं पश्यंति ५२
पिशाचभाष्यटीका ४ ॥ ॥
स्पष्टार्थं ५२ ॥ रामानुजभाष्यटीका ५

श्रीभगवानुवाच सुदुर्दर्शमिति ममेदं सर्वस्य प्रशासनेवस्थि
तं सर्वाश्रयं सर्वकारणभूतं यत् दृष्टवान् तत् सुदुर्दर्शं न
केनापि द्रष्टुं शक्यं अस्य रूपस्य देवा अपि नित्यं दर्शनकांक्षिणः
न तु दृष्टवंतः [illegible] ५२ अभिनवगुप्तकृतटीका ६

स्पष्टार्थम् ५२ परमार्थप्रपाटीका ७

पुनर्भगवान् सुदुर्दर्शमत्यंतं दुःखेनापि द्रष्टुमशक्यं मम रूपं य
दृष्टवानसि अस्य रूपस्य देवा अपि नित्यं दर्शनमिच्छंति मनोरथ
मात्रं कुर्वंति परं तु न प्राप्नुवंति ५२

वनमालीटीका ८

स्वकृतस्यानुग्रहस्यातिदुर्लभत्वं दर्शयति सार्द्धैस्त्रिभिः मम यद्रू
पमिदानीं त्वं दृष्टवानसि इदं विश्वरूपं सुदुर्दर्शं अत्यंतं दुष्प्रा

श्री. ११
गी.टी.
प

कं यतो देवा अप्यस्य रूपस्य नित्यं सर्वदा दर्शनकांक्षिणो न तु त्वमि-
व पूर्वं दृष्टवंतो न त्वाग्र इदं पश्यंतीत्यभिप्रायः दर्शनकांक्षाया नित्यत्वो-
क्तेः ५२

कृष्णमवैजयन्तीटीका ५

श्रीभगवानुवाच सुदुर्दर्शमिदमिति मम सर्वविश्वप्रशासनेऽ-
वस्थितस्य सर्वाश्रयस्य सर्वकारणभूतस्य यद्रूपं विश्वरूपद-
र्शनात्मकं त्वं दृष्टवानसि तदेवेदमिदानीं तत्तद्रूपं यदहं कलोद्भ-
वं देवकीपुत्रं मनुष्याकारविग्रहं सुदुर्दर्शनं केनापि दृष्टं शक्यं
विश्वरूपं तु दुर्दर्शमिदं तत्सुदुर्दर्शमिति विशेषः अस्य सुदुर्दर्श-
त्वमेवाह देवा इति अस्य मनुष्यत्वं संस्थापास्थितस्य रूपस्य देवा
अपि ब्रह्मादयोऽपि नित्यमनवरतं दर्शनकांक्षिणं सन्तं न तु दृष्टवं-
तः अयं भावः यथा भगवतो मम विश्वविग्रहस्यैनोऽवलेशं सूर्या-
दीनां क्रूरत्वं भयंकरत्वादीनां च गुणानां व्याप्यापरमेश्वराय-
मिति याथात्म्येन देवैरपि न ज्ञातो मनुष्यत्वकाकषा तथा कृष्ण-
रूपे मनुष्यविग्रहेऽपि सौंदर्यलावण्यबलपौरुषवृष्ण्यादिभि-
र्गुणैः पशुचारणपरदाररमणवधूतत्वारिष्टभयपलायन-
वनवनीतचौर्यादिकमभिव्याहृतमीश्वरत्वं याथात्म्येनैव ब्रह्मा-
दयोऽपि न जानन्तीति तत्र किमु वक्तव्यं मनोरमं मदनुग्रहेणैव सुदर्श-
मन्यथा सुदुर्दर्शमिति ५२

स्वकृतस्यानुग्रहस्याति दुर्लभत्वं दर्शयन् चतुर्भिः श्रीभगवानुवाच

मधुसूदनीटीका १३

मम यद्रूपमिदानीं त्वं दृष्टवानसि इदं विश्वरूपं सुदुर्दर्शमत्यंत-
दुष्प्रसमशक्यं यतो देवा अप्यस्य रूपस्य नित्यं दर्शनकांक्षिणः
न तु त्वमिव पूर्वं दृष्टवंतः नवाग्रे द्रक्ष्यन्तीत्यभिप्रायः दर्शना-
कांक्षाया नित्यत्वोक्तेः [illegible]
५२

* सर्वदा

सदानंदीटीका ११

स्वकृतस्य प्रसादस्यातिदुर्लभत्वं प्रदर्शयन् उवाच भगवानेवं
स्वभावस्यार्जुनं प्रति १ विश्वरूपं मदीयं यत्त्वमिदं दृष्टवानसि
तदत्यंतमशक्यं हि द्रष्टुं देववरैरपि २ देवास्तद्द्रष्टुमिच्छंति सं-
ततं स्वाविकाश्यपि न तत्त्वमिव पूर्वं ते दृष्टवंतः कदाचन न चे-
वाग्रेऽपि द्रक्ष्यन्ति श्रीहरेरयमाशयः ५२

नीलकंठीटीका ५२

अस्यविश्वरूपदर्शनस्यदौर्लभ्यंदर्शयन् श्रीभगवानुवाच सुदुर्दर्शमिति दर्शनकांक्षिणः दर्शनंकांक्षंतेएवनतुलभंते ५२

अस्यरूपस्यदुर्लभदर्शनतांआचष्टे श्रीधरीटीका न् श्रीभगवानुवाच ॥

देवाब्रह्मादयोपिनित्यंस्वर्गादिस्वाधिकारस्थअविज्ञतयापरमेश्वरस्वभावः [illegible] ५२

अर्जुनमाश्वासयन्भगवानुवाच ॥ रामकंठीटीका

नित्यदर्शनाकांक्षाप्रायमेतत् यतः स्वर्गादितन्त्रस्वाधिकारस्थअविज्ञत्वात्परमेश्वरस्वभावात्ब्रह्मादयोदेवा अप्यस्यरूपस्यसदासाक्षात्कारमभिकांक्षंतिनतुलभंते ५२॥

लासिकी धनपतीटीका ॥ स्वकृतस्यानुग्रहस्यातिदुर्लभत्वं

दर्शयन् दृष्टवान्साक्षात्कृतवान् अस्यस्वरूपम[illegible] ५२ ॥

पंचोलीटीका

स्वकृतस्यानुग्रहस्यातिदुर्लभत्वंदर्शयन् श्रीभगवानुवाच सुदुर्दर्शमिति हेअर्जुनममइदंरूपंसुदुर्दर्शंसुष्ठुअतीवदुर्दर्शं यत् दृष्टवानसिदेवाअपिअस्यरूपस्यनित्यंनिरंतरंदर्शनकांक्षिणोभवंति ५२

ररणवीरसमिद्धोदयिनी ॥

अथभगवानर्जुनंपुनराश्वासयितुमाह सुदुर्दर्शमिति गतार्थमेतच्छ्लोकद्वयं ५२॥

मधुभाष्य

५२॥

भाषा अनुवाद

तिसके बादि भगवान अपनी कृपा की दुर्लभता देखाव ते हैं कि जो यह हमारा विश्वरूप स्वरूप तुम ने देखा इस का दर्शन अति दुर्लभ है देखो देवतागण भी इस रूप के दर्शन की इच्छा सर्वदा करते हैं परन्तु इसका दर्शन नहीं पावते हैं ५२

दोहा

दुर्लभ अतिशय रूप यह जो मम देषा तेहुं सुर अभिलाखी
दर्शके नित्य याहि रूप के पहुं ५२॥

नाहं वेदैर्नतपसानदानेननचेज्यया श
क्यएवंविधोद्रष्टुंदृष्टवानसियन्मम ५३

शाङ्करभाष्यटीका १

कस्मात् नाहमिति नाहं वेदैः ऋग्यजुःसामाथर्ववेदैश्चतु
र्भिरपि न तपसोग्रेण चान्द्रायणादिना न दानेन गोभूहिरण्या
दिना न चेज्यया यज्ञेन पूजया वा शक्य एवंविधो यथा दर्शि
तप्रकारो द्रष्टुमस्मैः शक्योदृष्टवानसि मां यथा त्वं ५३

आनन्दगिरिकृतटीका २

दर्शनोपायाभावात् दुर्दर्शत्वमिति शङ्कते कस्मादिति वेदादिषूपा
येषु सत्स्वपि भगवानुक्तरूपो न शक्यो द्रष्टुमित्याह नाहमिति न
हि दर्शनायोग्यत्वात् द्रष्टुमशक्यत्वमित्याशङ्क्याह दृष्टवानिति ५३

स्वामिकृतटीका ३

तत्रहेतुर्नाहमितिस्पष्टार्थः ५३

॥ पैशाचभाष्यटीका ४ ॥

स्पष्टार्थम् ५३

रामानुजभाष्यटीका ५

नाहमितिभक्तोति वेदैः अध्यापनप्रवचनाध्ययनश्रवणजपवि
षयैर्यागदानहोमतपोभिश्चमद्भक्तिविरहितैः केवलैर्यथावदव
स्थितोहंद्रष्टुमशक्यः ५३

अभिनवगुप्तकृतटीका ६

नमेनमद्रूपमनेनयोनः पूर्णंभक्त्यतिशयाविष्कारार्थंयदेवभग
वतातिक्रान्ताध्यायेऽभ्यधायिस्वस्वरूपं तदेवार्जुनःप्रमतोपलभ
विषयापन्नेत्रद्वारेणप्रकटयतीतितद्ध्यानंकेवलंयोनक
नामसंगायेतिविरम्यते ५३

परमार्थप्रपाटीका ७

नाहंवेदैरितिगतार्थं ५३

वनमालीटीका ८

कस्माद्देवाप्यनद्रूपंनदृष्टवन्तोनवाद्रक्ष्यन्तिमदीयतादृशानुग्रह
शून्यत्वादित्याह नवेदयज्ञाध्ययनैरित्यादिनागतार्थः श्लोकःपरम
दुर्लभत्वोपपादनायाभ्यासः ५३

श्री·
गी· टी·
174

हनूमद्वैजयन्तीटीका ९

यथा मम विश्वरूपं भक्तिहीनैः पुरुषैर्वेदाध्ययनादिभिः साधनै
र्दर्शितं तथा मनुष्यरूपमपीत्याह नाहं वेदैरिति यथा त्वं मानु
षरूपं मां दृष्टवानसि तथैवंविधो वसुदेवसूनुर्हि भुजश्चतु
र्भुजो वा वत्सारथिरहं मद्भक्तिशून्यैः कैश्चिदपि पुरुषैर्वेदाध्य
यनादिभिरपि साधनैर्द्रष्टुं न शक्यः ५३

कस्माद्देवा अपि तद्रूपं न द्र
ष्टुं ते न वा ये द्रक्ष्यन्ति मद्भ
क्तिशून्यत्वादित्याह ॥

मधुसूदनीटीका १०

न वेदयज्ञाध्ययनैरित्यादिना गतार्थो यं श्लोकः परमदुर्लभत्व
ख्यापनाय पुनरभ्यस्तः [illegible]
[illegible] ५३

सदानन्दीटीका ११

कुतः पतन्न देवा अपि दृष्टवन्तो न वा पुनः इत्यतीति स्पष्टमेवं मद्भ
क्तियोग्यमलत्वम् १ न त्वेषां साक्षात्कारमान ते न ज्ञाधिकारिणः
वेदैरधीतैर्नाल्पप्रसादादानैर्यज्ञैरहं हरिः २ द्रष्टुमेवंविधो नास्मि
शक्यो दृष्टो यथा त्वया ३ ५३

नीलकंठीटीका १२

नाहमिति न वेदयज्ञाध्ययनैरित्यनेनोक्तपूर्वार्थः पुनरुच्यते
विश्वरूपदर्शनस्यातिदौर्लभ्यसूचनाय स्पष्टार्थश्च श्लोकः ५३

आनंदीटीका + स्पष्टार्थम् ५३ अत्रोपायमाह ॥

रामकंठीटीका

ततः स्वतरामवैराग्यकेन विदुष्करदर्शनमेतस्य त्वया मत्प्रसादाद्विभू
तपस्त्यागादत्तवा चाहं मत्तो यथा मां त्वं ततः साक्षात्कृतवांस्त्वया दाना
दिक्रियामन्त्रैर्द्रष्टुमशक्यो [illegible]

लाक्षिकी [illegible]टीका

तत्र हेतुः ॥ स्पष्टोर्थः [illegible] ५३ ॥ ॥

पंचोलीटीका

नाहमिति नवेदैः ऋग्यजुःसामाथर्वभिः तपसोग्रेणचान्द्रायणा
दिनानदानेनदानेनगोभूहिरण्यादिनानचेज्ययायज्ञेनअश्वमेधा
दिनाएवंविधोद्रष्टुंनशक्यः यथात्वंमांदृष्टवानसि ५३

शणवीरसमिद्धोयिनी॥

स्पष्टार्थः ५३॥

मधुभाष्य

५३॥

भाषा अनुवाद

उस अपने रूप के दुर्लभ दर्शन मे कारण कहते हैं कि तुम ने जो रूप मेरा देखा वह वेद अध्ययन औ तपस्या या दान यज्ञ के द्वारा किसी की देखने की सामर्थ्य नहीं है पर

दोहा

यह विधि देष न
नामे तपयज्ञदान सें वेदहि से पुनपडू
पाकर हों जिहविधि देषातेहू ५३॥

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ५४

शांकरभाष्यटीका १

कथं पुनः शक्य इत्युच्यते भक्त्येति भक्त्या तु किं विशिष्टयेत्याह अ
नन्यया अपृथग्भूतया भगवतोऽन्यत्र पृथक् न कदाचिदपि
भवति सा त्वनन्या भक्तिः सर्वैरपि करणैर्वासुदेवादन्यन्न लभ्यते
यया सानन्या भक्तिस्तया शक्योऽहमेवंविधो विश्वरूपप्रकारो हे
अर्जुन ज्ञातुं शास्त्रतो न केवलं ज्ञातुं शास्त्रतो द्रष्टुं च साक्षात्क
र्तुं तत्त्वेन तत्त्वतः प्रवेष्टुं च मोक्षं च गंतुं परंतप ५४

आनंदगिरिकृतटीका २

केनोपायेन तर्हि द्रष्टुं शक्यो भगवानिति पृच्छति कथमिति शा
स्त्रीयज्ञानद्वारा तद्दर्शने सफले सिध्यतीत्याह उच्यत इति न भक्ति
मात्रं तत्र हेतुरिति न शङ्कार्थं स्फुटयति किमित्यादिना अनन्यभ
क्तिमेव व्यनक्ति सर्वैरिति ५४

स्वामिकृतटीका ३

केनोपायेन तर्हि त्वं द्रष्टुं शक्य इति तत्राह भक्त्येति अनन्यया मदेकनि
ष्ठया भक्त्या त्वेवंभूतो विश्वरूपोऽहं तत्त्वेन परमार्थतो ज्ञातुं शक्यः शा
स्त्रतो द्रष्टुं च प्रत्यक्षतः प्रवेष्टुं च तादात्म्येन शक्यो नान्यैरुपायैः ५४

पैशाचभाष्यटीका ४ ॥

स्पष्टार्थम् ५४ ॥

रामानुजभाष्यटीका ५

अनन्यया भक्त्या तत्त्वतः शास्त्रैर्ज्ञातुं तत्त्वतः साक्षात्कर्तुं तत्त्वतः प्रवेष्टुं
च शक्यः तथा च श्रुतिः नायमात्मा प्रवचनेन लभ्यो न मेधया न बहु
ना श्रुतेन यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वा
मिति ५४

अभिनवगुप्तकृतटीका ६ ॥

स्पष्टार्थं ५४ ॥

परमार्थप्रपाटीका ७ यद्यपि [illegible] ज्ञातत्वेन द्रा
किंतु हे अर्जुन एवंविधोऽहमनन्य [illegible]
तुं शास्त्रतः द्रष्टुं प्र[illegible] तत्त्वतः प्रवेष्टुं तादात्म्येन शक्यः नान्यथा ५४

वनमालाटीका ८

वेदतपोदानेज्यादिभिर्द्रष्टुमशक्यस्त्वं तर्हि केनोपायेन द्रष्टुं शक्योऽसीत

१ श्री॰ गी॰ टी॰ ५

तथाहं भक्त्येति साधनान्तरव्यावृत्त्यर्थस्तु शब्दः भक्त्यैवानन्यया मदेक
निष्ठया सर्वैरनपेक्षितानपूर्वकाविच्छिन्नप्रेमप्रवाहरूपया एवंविधो
दिव्यानन्तनिरतिशयैश्वर्यविशिष्टविश्वरूपवानहं शास्त्रतो ज्ञातुं श
क्यः अहमिति च्छेदसो विसर्गलोपः न केवलं शास्त्रतो ज्ञातुं शक्योऽपि
तु तत्त्वेन द्रष्टुं च प्रत्यक्षतो भक्तिपूर्वकवेदान्तश्रवणमनननिदिध्यास
नादिभिरनन्तगुणलयोद्भूतैश्वर्यविश्वरूपात्मनैव रूपवान् स्वयोग्य
तानुसारेण शोषितया साक्षात्कर्तुं शक्यः प्रवेष्टुं मत्साक्षात्कारानन्त
रं मत्प्रसादेन निवृत्तिनिःशेषाविद्यतया मुक्तेन शाम्यं शक्यः प्रवेशो
हि भगवत्सायुज्यादिकं तल्लोकप्रवेशः सायुज्यादिरूपं संसृष्टविशि
ष्टप्रवेश एव प्रवेशः ५४

अथ वैजयन्तीटीका ५

ननु यदि वेदतपोदानेज्याभिः साधनैस्त्वं न शक्यस्तर्हि केनोपाये
न द्रष्टुं शक्योऽसीति चेत्तत्राह भक्त्या त्वनन्ययेति तु शब्दः साधनान्त
रनिरासार्थकः हे परन्तप यथा विश्वरूपधरोऽहं भक्त्यैव द्रष्टुं शक्यो ना
न्येनोपायेन तथैवंविधो ज्ञानेन साकारस्तत्वतो भूतोऽहमनन्यया भक्त्या भिद्या
दिभिर्देवान्तरोपासनरहितया भक्त्या साध्यसाधनरूपया प्रयोप्या
शक्यः किं केवलं शक्योऽसीत्यपेक्षायामाह ज्ञातुमिति वेदान्तादिशास्त्रे
भ्यो नन्यया सम्यक् स्वरूपगुणादिकत्वेन ज्ञातुं द्रष्टुं च पुनर्लीनत्वेन द
ष्टुं साक्षात्कर्तुं च तत्त्वेन प्रवेष्टुं मद्भावापत्तिलक्षणमोक्षं प्राप्तुं श
क्योऽनायासेनोपायो नास्तीत्यर्थः नायमात्मा प्रवचनेन लभ्यो न मेधया न ब
हुना श्रुतेन यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वा
मित्यादिश्रुतेरप्येकार्थत्वात् परन्तपेति संबोधनेन मद्भक्तिरहितान
न्यसाधनकरस्तामसकशत्रुनाशकत्वमेवासि नान्यः इति सूचितम् ५४

अथ मधुसूदनीटीका ६

यदि वेदतपोदानेज्याभिर्द्रष्टुमशक्यस्त्वं तर्हि केनोपायेन
द्रष्टुं शक्योऽसीत्यत आह

साधनान्तरव्यावृत्त्यर्थस्तु शब्दः भक्त्यैवानन्यया मदेकनिष्ठयानि १
शयप्रीत्या एवंविधो विश्वरूपधरोऽहं ज्ञातुं शक्यः शास्त्रतः हे अर्जुन
शक्यः अहमिति च्छेदसो विसर्गलोपः पूर्ववत् न केवलं शास्त्रतो ज्ञातुं
शक्योऽविदान्तवाक्यश्रवणमनननिदिध्यासनपरिपाकेन तत्त्वेन द्रष्टुं
प्रसाक्षात्कारादविद्यानिवृत्तौ नेति तत्त्वेन प्रवेष्टुं च मद्रूपतया चैवाहं
शक्यः हे परन्तप अज्ञानशत्रुमर्दनेनेति प्रवेशयोग्यतां सूचयति

नायपुंजीकृत्योच्यते ५४

सदानंदीटीका ११

यदि दृष्टुमशक्यस्त्वं तपोवेदाध्ययनादिभिः केनोपायेन तर्हि द्रष्टुं
शक्योसि चेति चेत् १ साधनांतरमाह भक्त्येति शक्योऽवगंतुमैः म
देकनिष्ठया प्रेमभक्त्यैवाहं महेश्वरः २ दिव्यरूपपरोक्षतेशक्यः
शास्त्रात्तरोत्तमैः साक्षात्कर्तुं स्वरूपेण वेदवाक्योत्थया धिया श
क्यश्चास्मि सदाप्रेमभक्त्यैवाराधितो जनैः साक्षात्कारादविद्यांतका
र्येतामाप्तवत्तत्त्वतः ४ मत्स्वरूपतयैवास्मि शक्योहं हे परंतप अन
न्यैव भक्त्या त्वं सदाभीमाश्रयान्नेन ५४

नीलकंठीटीका ११

कथं तर्हि द्रष्टुं शक्यस्त्वमत आह भक्त्येति भक्त्याऽऽराधनेन अन
न्यया अव्यभिचरितया [illegible] अहं एवंविधो ज्ञातुं शक्यः
तत्त्वेन याथात्म्येन [illegible] शोधकशास्त्रतः द्रष्टुं शक्यो ध्यानतः
[illegible] तत्त्वमसिवाक्यार्थज्ञानतः हे परंतप ज्ञातान प्रवेष्टुं
प्रवेष्टुं च परंतप ५४

श्रीधरीटीका स्पष्टार्थः ५४ ॥

[illegible]

रामकंठीटीका

केन तर्ह्युपायेन शक्योसीत्याह ॥

[illegible] परिचर्ययानन्य
भक्त्या मदेकविषयेव परदेवसर्गाभिजातत्व [illegible] भजनीयवि
भावाद्देवाविर्भूतसमस्तगत्तान्तत्वाद्विद्यमानमद्व्यतिरिक्तभजनीयवि
षयत्वेसत्यनन्यया [illegible] वारितावगमेनवाहुंतथासमस्तगत्तान
ल्लोनोपायेन द्रष्टुं गोचरीकर्तुं तथा [illegible] यथापरिशीलनाभ्या
सातिशयान्मवेद्यमात्मतया वगाढुमेवं विधोयथा [illegible] तः
कोहं [illegible] परस्यास्वरूपस्य [illegible] समाश्रवसिद्धि
परांभूमिमधिरूढस्तेन [illegible] संबंधः स्यर्थः
ज्ञातत्त्वेदानीमदृष्टपरमार्थजनो [illegible] ५४ ॥

[illegible]

लासिकी [illegible] टीका

नन्वेवं चेत्केनोपायेन तर्हि द्रष्टुं शक्य इति [illegible] तत्राह ॥

अनन्यया महानिरिक्तया कांक्षणी रहितया भक्त्या प्रेमातिशय
युक्तेनोपासनेन एवंविधस्त्वहं भक्तो विश्वात्मको हं ज्ञातुं प्रत्यभिज्ञा
तुम् द्रष्टुं साक्षात्कर्तुं प्रवेष्टुं मोक्षतया वा प्राप्तुं च शक्यः नान्यैरुपाये
स्तस्य पारगो साधनांतरव्याहृत्यर्थः [illegible]

पंचोलीटीका

केनोपायेन तर्हि द्रष्टुं शक्य इति तत्राह भक्त्येति हे अर्जुन त्वदु
नः अहमेवंविधो अनन्यया भक्त्या न विद्यते अन्य उपाधिर्यस्यास्
तया अनन्यया भक्त्या सर्वैरपि करणैर्वासुदेवादन्यन्नोपलभ्यते
तत्त्वेन तत्त्वतः याथात्म्येन द्रष्टुं शक्यः च पुनः अन्यत् शास्त्रतो ज्ञातुं
द्रष्टुं परमेश्वरेणैक्यं गंतुं हे परंतप अहं शक्यः ५४

रणवीरसमिद्धोयिनी॥

भक्त्येति हे अर्जुन भक्त्या तु तपआद्यो यज्ञादिभ्यो विशिष्टपदप्रा
प्तिसाधकत्वद्योतकः अनन्यया योन्यत्र विहितया भक्त्या यद्दृष्ट
तकर्मणो मम द्रष्टः श्रवणकीर्तनध्यानात्मिकया शुश्रूष
यादमेव श्रवणादिकं मत्तो ज्ञातुं तत्त्वतः द्रष्टुं तत्त्वेन परमार्थ
देहनाप्रवेष्टुं च भक्तेन प्राकोतं तत्वन्तमा यज्ञसाध्यस्वर्ग
कामेष्ट्येति भावः ५४॥

मधुभाष्य

५८॥

भाषा अनुवाद

जो के यि कौन उपाय से आप दर्शन दे शकते हो जो यह कहो तो कहते हैं कि हे अर्जुन अनन्य कहे मदेकचित्त भक्ति ही के द्वारा ऐसे विश्वरूप से हम प्रगट होशकते हैं और वह भक्त भी हमें जानि शके है और हे परन्तप अर्जुन शास्त्र से प्रसन्न को तत्त्व रूप प्रवेश अर्थात् उस रूप मे लीन हम कराय शकते हैं और कोई भी उपाय नहीं है ५४

दोहा

अनन्य भक्तिकर शकत मैं अर्जुन यादि विधान जानन देषन तत्वसें प्रवेश परंतप जान ॥ ५४

मत्कर्म्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ५५
इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मवि
द्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे वि
श्वरूपदर्शनो नामैकादशोऽध्यायः ११

शाङ्करभाष्यटीका १

अधुना सर्वस्य गीताशास्त्रस्य सारभूतोऽर्थो निःश्रेयसार्थोऽनुष्ठे
यत्वेन समुच्चित्योच्यते मत्कर्म्मकृदित्यादि मत्कर्म्म मदर्थं क
र्म्म मत्कर्म्म तत् करोतीति मत्कर्म्मकृत् मत्परमः करोति भृ
त्यः स्वामिकर्म्म न त्वात्मनः परमा प्रेत्य गन्तव्या गतिरिति स्वा
मिनं प्रतिपद्यते अयन्तु मत्कर्म्मकृन्मामेव परमां गतिं प्रति
पद्यते इति मत्परमोऽहं परमः परा गतिर्यस्य सोऽयं मत्परमः
तथा मद्भक्तः मामेव सर्व्वप्रकारैः सर्व्वात्मना सर्व्वोत्साहेन भजत
इति मद्भक्तः सङ्गवर्जितः धनमित्रपुत्रकलत्रबन्धुवर्गेषु स
ङ्गवर्जितः सङ्गः प्रीतिः स्नेहवर्जितो निर्वैरो निर्गतवैरः अतः स
र्वभूतेषु शत्रुभावरहितः आत्मनोऽत्यन्तापकारप्रवृत्तेष्वपि
य ईदृशो मद्भक्तः स मामेत्यहमेव तस्य परा गतिर्नास्य कदाचि
द्भवतीति ५५ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां यो
गशास्त्रे श्रीशाङ्करभाष्यटीकायामेकादशोऽध्यायः ११ ॥

आनन्दगिरिकृतटीका २

भक्त्यादिति विशेषणादस्यैषामहत्वमाशंक्याह अधुनेति स
मम पुष्टिम मेलित्य पुञ्जीकृत्येति यावत् मत्कर्म्मकृदित्युक्ते भग
इमत्वे आर्थिके इति पुनरुक्तिमाशंक्याह करोतीति निष्ठा सिध्यतीत्याह
वानेव परमा गतिरिति निश्चयवतस्तत्रैव धनादिलिप्सादि कष्टतादिमाशे
तथेति ननु तत्रैव सर्वप्रकारैर्भजनं निष्ठाचरणं वैरं अनपकारिषु तद्भाव
क्याह सङ्गेति द्वेषपूर्वकानिष्टाचरणं वैरं शङ्कित्वाह आत्मन इति एतच्च सर्वे
पि भवत्येवापकारिष्विति सर्वेति इष्टो भगवत्प्राप्तिरव
मेति प्रानुष्ठानार्थमुक्तमेव तदेवं भगवतो विश्वरूपस्य
स्माविनीमुपसंहरति अयमिति

त्यादि॰

सर्वात्मनः सर्वज्ञस्य सर्वेश्वरस्य मत्कर्मकृदित्यादेन क्रमसुक्ति
फलमभिध्यानमभिवदता तमदवाद्योऽर्थोऽव्यवस्थापितः ५५
इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीआनं
दगिरिकाटीयां एकादशोऽध्यायः ११

स्वामिकृतटीका २

अतः सर्वशास्त्रसारं परमरहस्यं सूत्रमाह मत्कर्मकृदिति म
दर्थं कर्म करोतीति मत्कर्मकृत् अहमेव परमः पुरुषार्थो य
स्य सः ममैव भक्तिमाश्रितः पुत्रादिषु संगवर्जितः निर्वैरः सर्व
भूतेषु एवंभूतो यः स मां प्राप्नोति नान्य इति ५५ देवैरपि दु
र्दर्शं तपोदानादिकोटिभिः भक्ताय भगवानेवं विश्वरूपमदर्श
यत्॥ इति श्रीभगवद्गीतासुबोधिन्यां टीकायां विश्वरूपदर्शनं
नामैकादशोऽध्यायः ११

पिशाचभाष्यटीका ४

अहं वासुदेवः परमे प्रधाने यस्य स मत्परमः ५५ इति श्रीभ
गवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे पैशाचभाष्यटी
कायां एकादशोऽध्यायः ११

रामानुजभाष्यटीका ५

मत्कृदिति वेदाध्ययनादीनि सर्वाणि मदाराधनरूपाणीति यः क
रोति स मत्कर्मकृत् मत्परमः सर्वेषामारंभाणामहमेवोद्देश्यो
यस्य स मत्परमः अत्यर्थमत्प्रियत्वेन मत्कीर्तनस्तुतिध्यानार्च
नप्रणामादिभिर्विना आत्मधारणमलभमानो मदेकप्रयोजनत
याः सततं तानि करोति स मद्भक्तः संगवर्जितः मदेकप्रियत्वे
नेतरसंगमसहमानः निर्वैरः सर्वभूतेषु मत्संश्लेषवियोगैकदुः
खस्वभावत्वात् स्वदुःखस्य स्वापराधनिमित्तत्वानुसंधानात् सर्
वभूतानां परमपुरुषतंत्रत्वानुसंधानाच्च सर्वभूतेषु वैरनिमित्ता
भावात्तेषु निर्वैरः य एवंभूतः स मामेति मां यथावदवस्थितं प्रा
प्नोति निरस्ताविद्याद्यशेषदोषगंधो मदेकानुभवो भवतीत्यर्थः
५५ इति श्रीमद्भगवद्गीतासु रामानुजाचार्यविरचितश्रीमद्भग
वद्गीताभाष्यटीकायां एकादशोऽध्यायः ११

अभिनवगुप्तकृतटीका ६

सकलोपसंहारेणेन परमप्रशान्तरूपो बलतत्स्थितिमिदानीमि
उपसंहारे भगवतः सौम्यता अविद्यमानानामप्येतैर्यरमणीयायेषां

भक्तिः परिपोषकारीति तेषां वासुदेवं सर्वमिमादिष्टवीभि
हितोपदेशाच्चमत्काराद्दिस्वात्मकं वासुदेवतत्त्वमयत्नतय
ववोधपदवीमवतरतीतिशिवम् ५५ शुद्धाशुद्धविमिश्रो
घमविदैक्यप्रकाशनात् भूर्भुवःस्वस्त्रयं पश्यन् समतेनस
मोमुनिः उपोद्घातसंग्रहः इति श्रीमदाचार्याभिनवगुप्तवि
रचिते श्रीभगवद्गीतार्थसंग्रहे एकादशोऽध्यायः ११

परमार्थप्रपाटीका १

अथ रहस्यं सूचयन्नाह मत्कर्मकृदिति मदर्थं कर्म करोतीति
मत्कर्मकृत् अहमेव परमः पुरुषार्थो यस्य स मत्परमः मद्भक्तो
मदाश्रितः पुत्रकलत्रादिसंगवर्जितः सर्वभूतेषु निर्वैरो भ
वति [illegible] मामाप्नोति नान्यः तदुक्तं मत्स्याभिर्भक्तियोगेना
नारंगोरन्नेगात्सुयमभिलिखेत्सुविधिशाभ्यामलभ्यसौरम्य
नेवतस्मिन्ननुसरणहृदये मेऽङ्गलेचेऽङ्गरम्यैः नीव्रतेजनविलो
सांद्रं १ कीतिमिरनिरसनेन्दुदानंदमेमामाभ्यासभाजो न सलभ
मपि तन्नीयहन्तेस भक्त्या ५५ अध्यायेनानेनैतमात्रुष्णमि
त्यस्ये चेत्यन्यिनदर्पनेय भूर्भुवः स्वर्महान्तः सीकारैर्वैभवं
चाभयमस्तनानिर्दृष्टमिश्नास्तिनेवेत् तमस्यणा गतिव
गेनिहितमिहमयाद्दर्शयादिव्यदृष्ट्या वृद्धीतुर्देवदेवालिति ह्मां १
यद्यतिनाम्नोक्तमेकादशेऽस्मिन्॥ इति श्रीमदेवैष्णपति
नस्थूर्ये विरचितायां भगवद्गीताटीकायां परमार्थप्रपायां
विश्वरूपात्मिमध्यममात्मनिरूपणं नामैकादशोऽध्यायः ११

[illegible]टीका १

अधुना सर्वस्य गीताशास्त्रस्य सारभूतो योऽर्थो निःश्रेयसार्थिना
मनुष्ठानाय पुञ्जीकृत्योक्तः मत्कर्मकृत् मत्कर्मकृत् मत्प
रायणः मत्स्योऽमर्थं कर्मकारी स्वर्गादिकामनायामस्तोक
थमेवमितिनेत्याह मत्परमः प्राप्यत्वेनं निश्चितो नतस्स
र्गादिर्यस्य मः अत एवं प्रासीद्धया मद्भक्तः सर्वोत्तमत्वधी
सर्वं कमत्येम युक्तः पुत्रादिषु स्नेहसतिकं ध्वत्येवप्रेमस्यादि मनूं १

माह संगवर्जितः बा॰ वसत्स्पृहाभूत्यः शत्रुषु द्वेषे सति कथमेवंस्या
दित्याह निर्वैरः सर्वभूतेष्वपकारिष्वपि द्वेषशून्यो यः स मामेति
दवचने सदनेन तु णालयं वं सद्देवनन यमेति निर्मुक्ता विषयः स
न्मनस्तामसंप्राप्नोतीत्यर्थः निरंजनः परमं साम्यमुपैतीति श्रुतेः
मम साधर्म्यमागता इति च स्मरणाच्च अयमर्थस्त्वया ज्ञातुमि
ष्टो मयोपदिष्टो नातः परं किंचिद्वक्तव्यमस्तीत्यर्थः ५५ इतिश्री
वनमालीकायां भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योग॰
शास्त्रे गीताटीकायां एकादशोऽध्यायः ११

अत्र नवेजयन्तीटीका १

ननु यद्येवं तर्हि वेदतपोदानेज्यानां साधनानां का गतिरित्यपेक्षा
यां यथार्थविषयया भक्त्या त्वेतानेहं द्रष्टुं प्रवेष्टुं च शक्योऽस्मि तया भक्
त्वद्भक्तः कीदृशो भवतीत्याशंकायामाह मत्कर्मकृदिति यो म
दाराधनार्थ्येव कर्माणि वेदतपोदानेज्यादीनि करोति स मत्क
र्मकृत् न त्विहामुत्र चानेकभोगकामनया यो मां कथमेवं नि
श्चितः स्यादिति चेत्तत्राह मत्परमः अहमेव परमः सर्वेषामनुष्ठा
भूतानां कर्मणामुद्देश्यो यस्य स मत्परमः न त्विहामुत्र च भोगेच्छु
रित्यर्थः न तु मित्रपुत्रकलत्रादिषु स्नेहे सति कथमेवं स्यादिति
चेत्तत्राह संगवर्जितः सर्वेषु स्वानुकूलेषु प्राकृतवस्तुषु राग॰
रहितः न तु शत्रुवर्गेषु द्वेषे सति कथमेवं स्यादिति चेत्तत्राह
निर्वैरः सर्वभूतेषु स्वप्रतिकूलेष्वपि भूतेषु प्राणिषु निर्वैरो वै
रस्पृहः यतोऽस्य सर्वेष्वपि मद्दर्शित्वेन द्वेष्याभाववत्त्वमुपपन्न
मेवेत्यर्थः ईदृशो यस्स एव मद्भक्तः समश्रवणकीर्तनादिनव॰
लक्षणाया भक्तेराश्रयो नान्यः हे पाण्डव पाण्डुतनय स एव च म
त्स्वरूपाभानेनो मामसर्वेश्वरं सर्वकारणं सर्वेषां योगिध्येयं यद
मनुजे श्रीमुकुन्दमेति मद्भावापत्तिलक्षणमोक्षं प्राप्नोति नान्यः श्र
तः परं किंचिद्वक्तव्यं ज्ञातव्यं कर्तव्यं नास्तीत्यभिप्रायः ५५ यो हि
विश्वम्भरो देवो विश्वरूपेण मोहनम् सत्त्वेरतानतामिश्रमहत्
तेन माम्यहम् १ इति श्रीनियमानन्ददेवपावनेशोक्तस्तदापस्ता

५

+ अधुना सर्वस्य गीताशास्त्रस्य सारभूतोऽर्थो निःश्रेयसार्थिनामनुष्ठानाय पुंजीकृत्योच्यते ॥

तेवाशिना गिरिधारिदासेन विरचितायां गीतार्थकुसुमवैजयं
त्यामेकादशोऽध्यायः ११ मधुसूदनीटीका ११

+ मदर्थं कर्म वेदविहितं करोतीति मत्कर्मकृत् स्वर्गादिकामना
योऽस्माकं कथमेवं स्यादिति तेनेमाह मत्परमः अहमेव परमः प्रा
प्यत्वेन निश्चितो न तु स्वर्गादिर्यस्य सः अत एव मत्प्राप्त्याशया
मद्भक्तः सर्वैः प्रकारैर्मम भजनपरः पुत्रादिषु स्नेहसत्त्वे कथ
मेवं स्यादिति तेनेमाह सङ्गवर्जितः बाह्यवस्तुस्पृहाशून्यः शत्रुषु द्वे
षसत्त्वे कथमेवं स्यादिति तेनेमाह निर्वैरः सर्वभूतेष्वपका
रिष्वपि द्वेषशून्यो यः स मामेति अभेदेन पाण्डव अयमर्थस्त्वया
ज्ञातुमिष्टो मयोपदिष्टो नातः परं किंचित्कृत्यमस्तीत्यर्थः ५५
इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरसरस्वतीपा
दशिष्यश्रीमधुसूदनसरस्वतीविरचितायां विश्वरूपदर्शन
निरूपणं नामैकादशोऽध्यायः ११

सदानंदीटीका ११

गीताशास्त्रस्य सर्वस्य सारभूतोऽर्थ आदरात् निःश्रेयसार्थिनां सम्य
गनुष्ठानाय चाधुना पुंजीकृत्योच्यते श्रीमद्धरिणा करुणाब्धिना
मदर्थं कर्म वेदोक्तं कुर्वन्यो मत्परायणः सम्प्राप्यत्वेन यस्याहं नि
श्चितो नापरोऽर्थकः मद्वाप्त्याशया तत्र मद्भक्तः सर्वथात्मना मा
मेव सर्वथा प्रीत्या सर्वोत्साहेन सर्वदा सर्वात्मना यो भजते मम
मय्याविष्टमानसः पुत्रवित्तकलत्रादिभोगेषु स्नेहवर्जितः सर्वभू
तेषु मद्दृष्ट्यात्मकशत्रुमतिः शुभान् ५ स्वस्यासंतापकारादि
हितेषूपकारकृत् द्वेषाद्यभावो यो मद्भक्तो मामनुपैति सः
६ परागतिरहं तस्य हरिरेव न चापरा अयमर्थस्त्वया ज्ञातुमिष्टो
ऽतस्ते मयोदितः ७ नातः परं वक्तव्यं किंचिदिति माशयो हरेः ५५
सम्यग्वेदैरपीतैः स्मृतिमतैर्विधिना कृतं अनुष्ठानतोषितात्मके
शीलपोभिर्निजसमकनकैः ब्राह्मणैर्योऽपि दृष्टैः यः शक्यो नैव
लोके कथमपि दिविजैरष्टसिद्धाद्रिरीशाः शक्यो योऽनन्यभक्त्या
प्रविशाद्दृश्यमेष सह्रलः सभक्तिः ५५ इति श्रीभावप्रकाशे
श्रीसदानंदविद्याकृते हरिप्रसादमाहात्म्यपूर्तिर्नामैकादशोऽध्यायः ११

शास्त्रं सर्वं स्वसंग्रहणाति मत्कर्मकृदिति मदर्थमेव कर्माणि क
रोतीति मत्कर्मकृत् अहमेव परमो निष्कलः प्राप्यो यस्येति मत्प
रमः एतेन कर्मतत्त्वः कर्मयोगो ध्यानयोगश्च त्वंपदार्थशोधक उक्तः
मम भक्त आराधनकृदिति उपासनाकांडार्थसंग्रहः संगवर्जित
इत्यनेन पंचकोशभगवत्ध्याननिष्ठ इत्युक्तं निर्वैर इति विश्वं भग
वदात्मतापश्यैदित्युक्तं अन्यथा भेदबुद्धिमतो निर्वैरत्वासंभवात्
एवंभूतो यः स मां तत्पदलक्ष्यार्थभूतमविज्ञानैकघनं प्रतिप्राप्नो
ति अमृतगभेदेन हेपांडव विशुद्धवंशज त्वमेवैतज्ज्ञातुं शक्तोऽसी
ति भावः ५५ इति भीष्मपर्वणि नैलकंठीये भारतभावदीपे ए
कादशोऽध्यायः ११ ३५

सर्वप्रकरणसारभूतमर्थं सिद्धांतीकृ आनंदीटीका त्यध्यायमुप र्थं
संहरति मत्कर्मकृत् कर्मसु दितानि वर्णाश्रमकर्माणि मदर्थमेव करोति
न तु फलांतरार्थम् अत एव मत्परः अहमुपादेयो यस्य मद्भक्तः स
र्वावस्थासु मय्येव समाहितचित्तः सर्वभूतेषु संगवर्जितो रागही
नः निर्वैरो द्वेषहीनः स मामेव ब्रह्मैकात्म्यं प्राप्नोति ५५ इति श्री
भगवद्गीता आनंदीटीकायां एकादशोऽध्यायः ११ ॥ ॥

एतमेवार्थं सिद्धांतीकृत्य ध्यायार्थमुप रामकंठीटीका
संहरति एवं योगशास्त्रविशिष्टोपाधिकं श्रेष्ठं फलमुक्तः समामेति मद्भेदल
क्षणां सिद्धिमपि गच्छतीति कीदृशो मत्कर्मकृत् शास्त्रचोदितानि तानि
वर्णाश्रमक्रमागतानि कर्माणि करोति किं तु मदर्थं यथोपपत्त्या म
त्कृते यस्य तत्रासमर्थानि तिकृत् मत्परः अहमेवोपादेयतया
नान्यमेव मद्भक्तः सर्वावस्थासु मय्येव समर्पितांतःकरणस्तथा सहि
सर्वभूतेषु चराचरभावेषु नि संगो रागरहितो निर्वैरो द्वेषवर्जितः
त्वपुनिरतिशयामृतनिर्भरं मत्स्वरूपमेव मननतन्मनभवति समा
मेवैति सिद्धोमुक्तः इहाप्यवेतरतितात्पर्यमित्यर्थम् संवत्सेव स्वभावं

नवतत्वज्ञविधेरेकमेकांतस्युदृष्प्रेक्षद्भीवभेदैतिति विहितपरामर्श
ज्ञातुमात्मानम् स्वात्मन्येवैश्वर्यंवामगोमक्तुरः इत्यवाप्यतो वैश्वरूप्य
स्वाध्यायस्यास्यन्नीतेस्फुटमभिमुखतोव्याख्ययैकादशस्य ५५ ॥
इति श्रीभगवद्गीता रामकंठीटीकायां एकादशोऽध्यायः ११ ॥

अथ सर्वशास्त्रसारमुपदिशति॥ [illegible]की टीका

हे पांडव एवंविधो मद्भक्तो मद्धामकोपः समां प्राप्नोति किंविध इत्या
ह मत्कर्मकृत् मन्मात्रार्थमेवाक पुत्राकर्म करोति तथा संगवर्जि
तः आसक्तिरहितः तथा सर्वभूतेषु निर्वैरः मैत्र्यादिविलयरिक
र्मसंपन्नः इति सूक्तानेनिरोधेन मत्परमः अहमेव सर्वथा प्राप्यः स
र्थः इति शिवम् महात्मा पुत्राविश्वरूपदर्शनेसमदर्शीयत यःप्रेष्ठ
यार्जुनायैव भक्ताधीनेन मामितम् ५५ इति श्रीभगवद्गीता
वसन्तमीटीकायां विश्वरूपदर्शने नामैकादशोऽध्यायः ११ ॥

पैचोलीटीका

इदानीं सर्वस्य गीताशास्त्रस्य सारभूतोऽर्थः निःश्रेयसार्थोनुष्ठेय
त्वेन सस्त्वित्योच्यते मत्कर्मकृदिति हे पांडव यः मत्कर्मकृत्
दर्थं कर्म करोति इति मत्कर्मकृत् मत्परमः अहं परमा गतिर्यस्य स
मय्येव प्रकारैः भजते इति मद्भक्तः यत् पुत्रकलत्रेषु संगवर्जितः
प्रीतिस्नेहवर्जितः सकलभूतेषु निर्वैरः अप्राप्तभावनः आत्मनः
अत्यंतास्ने हेतु नेप्यपिनिर्गतवैरस्य यः ईदृशोमद्भक्तः स मामेति
अहमेव तस्य परा गतिः ५५ इति श्रीपचोलेआचार्यकृतटीका
यां एकादशोऽध्यायः ११

[...]चीरसमिन्द्राधिनी॥

इदानीं सर्वसंग्रहवाक्यमुपदिशति मत्कर्मकृदिति मत्कर्मकृ
न्मयैव पूर्वमेव यत्कर्म कृतं मय्येवैतेनिदत्ताः पूर्वमेवेत्यादि

वचनात्कृतं तद्देवकर्म करोतीति मत्कर्मकृदेव स्वधर्मत्वादिति
अथवा मदर्थं कर्म मत्कर्म तदपि स्वधर्मत्वलक्षणं कर्म मदर्थं
मय्यर्पितभावनया कुर्वतो न ते हिंसादोषः अथवा मत्कर्म मत्तो
विश्वरूपकर्माणि नान्यस्मात् यत्कृतं तदेव येषां ते मत्कर्माणो महि
मत्वा मत्कृतपापवस्त्वात्कृतं जानाति मायन्तीति मत्कर्मकृदेवेति
भगवदाज्ञैव सर्वं स्वयं कृतं तस्य निर्लेपत्वादिति तथा मत्परमः
मत्तो मत्सकाशाद्दातोऽहं भवेति शेषः परात्रिस्वनीनातीति म
त्परमो भवेति अथवा मत्परमोऽहमेव धर्मविरुद्धान्यरान्मीना
ति भगवदाज्ञयैव शत्रून्हन्मीति बुद्ध्या त्या मत्परमो भवेति अथ
वा मत्परमोऽहमेव परमः पूज्यो यस्य सम्पतादृल्लक्षणो भवेति
न ते कश्चिद्दोषः तथा मद्भक्तो नपवसंगरहितो निर्लेपश्चेत्येता
दृल्लक्षणो यस्त्वं सर्वभूतेषु सर्वेषु परापरेषु च प्राणिषु निर्वैरः
सन्नपराधरभेदराहित्यधर्मेव त्वात्तवेति संग्राममदत्वग्रहः स
त्वं मामरक्षितिपदमेषि इण्गताविति धातोः गत्यर्था ज्ञाना
र्था इति वचनादेवि जानासीत्यर्थो बोध्यत इति अत्र पाण्डवेति
संबोधनपदं महाकाम्स तरसपूर्णांस्वभावत्वाद्धिगतस्वधर्मा
चरणविषयसंदेहस्य विगमलवसंभावनाप्रतिपादनार्थमि
ति विश्वरूपदर्शनमाहात्म्यात्पाण्डवः संजातसमग्राहृदः
स्वधर्माचरणसमुत्सुको बभूवेति भावः ५५ इति श्री[illegible]
वीरसमिद्धोपिन्यां श्रीगीताव्याख्यायां विश्वरूपदर्शनं ना
मैकादशोऽध्यायः ११

मध्वभाष्य

५५ इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भ
गवद्गीताभाष्ये एकादशोऽध्यायः [illegible] ११

: भाषा अनुवाद

अब शास्त्र के अर्थ का सारांश परम रहस्य कहते हैं कि हे पाण्ड
व मत्कर्म कृत कहे मेरी प्रीति के अर्थ जो कर्म करै है और
मत्परम कहे मेंही हो परम प्रयोजन जिसको और मद्भक्त
हे मेरे आश्रित यथा पुत्र स्त्री धन मे आशक्ति हीन और भूत
कहे प्राणि मात्र मे वैर रहित जो है सोई हमको प्राप्त होता है
५५ इतिश्रीजगन्नाथ शुक्ल विरचितायां मनभावनीटीकायां
एकादशोध्यायः ११

दोहा

मोरे कर्ममो परम हि संगत जहो मो भक्त सभीजीवमेवैर
विनसो पांडव मो प्राप्त ५५ ॥